भरण्यां जायते लोकः सुसुखी धनवानपि ॥ २ ॥

भरणी नक्षत्रमें जन्म लेनेवाला मनुष्य रोगराहित, सत्यवक्ता, सत्प्राण अर्थात् अधिक पराक्रमवाला, सुखी और धनी होता है ॥ २ ॥

कृपणः पापकर्मा च क्षुधालुर्नित्यपीडितः।
अकर्म कुरुते नित्यं कृत्तिकासंभवो नरः॥ ३ ॥

कृत्तिकानक्षत्रमें जन्म लेनेवाला मनुष्य कृपण, पापकर्म करनेवाला, क्षुधावाला, नित्य पीडासे युक्त और सदा नीचकर्म करनेवाला होता है ॥ ३ ॥

धनी कृतज्ञो मेधावी नृपमान्यः प्रियंवदः।
सत्यवादी सुरूपश्च रोहिण्यां जायते नरः ॥ ४ ॥

रोहिणीनक्षत्रमें जन्म लेनेवाला मनुष्य धनी, कृतज्ञ, बुद्धिमान्, राजासे मान पानेवाला, प्रियवक्ता, सत्यवादी और सुन्दर रूपवान् होता है ॥ ४ ॥

चपलश्चतुरो धीरः कूटकर्मस्वकर्मकृत्।
अहङ्कारी परद्वेषी मृगे भवति मानवः ॥ ५ ॥

मृगशिरनक्षत्रमें जन्म लेनेवाला चपल, चतुर, गंभीरस्वभाववाला, कूटके कर्मोंमें अकर्म करनेवाला, अहंकारी और दूसरेसे ईर्षा करनेवाला होता है ॥ ५ ॥

कृतघ्नः कोपयुक्तश्च नरः पापरतः शठः।
आर्द्रानक्षत्रसंभूतो धनधान्यविवर्जितः ॥ ६ ॥

आर्द्रानक्षत्रमें जन्म लेनेवाला मनुष्य कृतघ्नी, क्रोधी, पापी, शठ और धनधान्यसे रहित होता है ॥ ६ ॥

शान्तः सुखी च संभोगी सुभगो जनवल्लभः।
पुत्रमित्रादिभिर्युक्तो जायते च पुनर्वसौ॥ ७ ॥

पुनर्वसु नक्षत्रमें जन्माहुआ मनुष्य शांतस्वभाववाला, सुखी, भोगी, मनोहर, सबका प्यारा और पुत्रमित्रादिकोंसे युक्त होता है ॥ ७ ॥

देवधर्मधनैर्युक्तः पुत्रयुक्तो विचक्षणः।
पुष्ये च जायते लोकः शान्तात्मा सुभगः सुखी ॥ ८ ॥

पुष्यनक्षत्रमें जन्म लेनेवाला देवताओंकी सेवा करनेवाला, धार्मिक और धनी, पुत्रवान्, विद्वान्, शांतचित्तवाला, मनोहरशरीरवाला और सुखी होता है ॥ ८ ॥

सर्वभक्षी कृतान्तश्च कृतघ्नो वञ्चकः खलः ।
आश्लेषायां नरो जातः कृतकर्मा हि जायते ॥ ९ ॥

आश्लेषानक्षत्रमें जन्म लेनेवाला मनुष्य भक्ष्य एवं अभक्ष्य वस्तुको खानेवाला, नीच कर्म करनेवाला, कृतघ्न, धूर्त, शठ और कर्मी होता है ॥ ९ ॥

बहुभृत्यो धनी भोगी पितृभक्तो महोद्यमी ।
चमूनाथो राजसेवी मघायां जायते नरः ॥ १० ॥

मघानक्षत्रमें जन्म लेनेवाला मनुष्य बहुत नौकरोंवाला, धनवान्, भोगी, पिताका भक्त, बहुत उद्यम करनेवाला, सेनाका मालिक और राजसेवी होता है ॥ १० ॥

विद्यागोधनसंयुक्तो गंभीरः प्रमदाप्रियः ।
पूर्वाफाल्गुनिकाजातः सुखी पण्डितपूजितः ॥ ११ ॥

पूर्वाफाल्गुनी नक्षत्रमें उत्पन्न हुआ मनुष्य विद्या गौ और धनसे युक्त, गंभीर स्वभाववाला, स्त्रियोंको प्रिय, सुखी, पंडित और पूजित होता है ॥ ११ ॥

दान्तः शूरो मृदुर्वक्ता धनुर्वेदार्थपण्डितः ।
उत्तराफाल्गुनीजातो महायोद्धा जनप्रियः ॥ १२ ॥

उत्तराफाल्गुनी नक्षत्रमें जन्म लेनेवाला मनुष्य तपस्याके क्लेशको सहनेवाला, शूरवीर, मीठे वचन बोलनेवाला, धनुर्वेदमें निपुण, बडा योद्धा और मनुष्योंको प्रिय होता है ॥ १२ ॥

असत्यवचनो धृष्टः सुरापो बन्धुवर्जितः ।
हस्ते जातो नरश्चौरो जायते पारदारिकः ॥ १३ ॥

हस्तनक्षत्रमें जन्म लेनेवाला मनुष्य झूठ बोलनेवाला, निर्दयी, मदिरा पीनेवाला, बंधुरहित, चोर और परस्त्रीगामी होता है ॥ १३ ॥

पुत्रदारयुतस्तुष्टो धनधान्यसमन्वितः ।
देवब्राह्मणभक्तश्च चित्रायां जायते नरः ॥ १४ ॥

चित्रानक्षत्रमें जन्म लेनेवाला मनुष्य पुत्र और स्त्रीसे युक्त, संतोषी, धनधान्या-दिसे पूर्ण, देवता ब्राह्मणका भक्त होता है ॥ १४ ॥

विदग्धो धार्मिकश्चैव कृपणः प्रियवल्लभः ।
सुशीलो देवभक्तश्च स्वातौ जातो भवेन्नरः ॥ १५ ॥

स्वातीनक्षत्रमें जन्म लेनेवाला मनुष्य बडा चतुर, धर्मात्मा, कृपण, स्त्रीको प्यार करनेवाला, सुंदरशीलस्वभाववाला, देवताका भक्त होता है ॥ १५ ॥

अतिलुब्धोऽतिमानी च निष्ठुरः कलहप्रियः ।
विशाखायां नरो जातो वेश्याजनरतो भवेत् ॥ १६ ॥

विशाखानक्षत्रमें जन्म लेनेवाला मनुष्य अत्यन्त लोभी, बडा मानी, निष्ठुर (दुष्ट), कलहसे प्रीति करनेवाला, वेश्याबाज होता है ॥ १६ ॥

पुरुषार्थप्रवासी च बन्धुकार्ये सदोद्यमी ।
अनुराधाभवो लोकः सदा धृष्टश्च जायते ॥ १७ ॥

अनुराधानक्षत्रमें जन्म लेनेवाला मनुष्य परोपकारी, परदेशमें रहनेवाला, बन्धुओंके कार्यमें सदा उपाय करनेवाला अर्थात् सहारा देनेवाला और सदा दया करनेवाला होता है ॥ १७ ॥

बहुमित्रप्रधानश्च कविर्दान्तो विचक्षणः ।
ज्येष्ठाजातो धर्मरतो जायते शूद्रपूजितः ॥ १८ ॥

ज्येष्ठा नक्षत्रमें पैदा हुआ मनुष्य बहुत मित्रोंवाला, प्रधान, कवि, तपस्या करनेवाला, बडा चतुर, धर्ममें तत्पर, शूद्रोंसे पूजित होता है ॥ १८ ॥

सुखेन युक्तो धनवाहनाढ्यो हिंस्रो बलाढ्यः स्थिरकर्मकर्ता ।
प्रतापितारातिजनो मनुष्यो मूले कृती स्याज्जननं प्रपन्नः ॥ १९ ॥

मूलनक्षत्रमें जिसका जन्म हुआ हो वह बालक सुखी और धन वाहनसे युक्त हिंसा करनेवाला, बलवान्, स्थिर (विचारके) अथवा स्थिर कर्मका करनेवाला, शत्रुनाशक, सुकृती होता है ॥ १९ ॥

दृष्टमात्रोपकारी च भाग्यवांश्च जनप्रियः ।
पूर्वाषाढाभवो नूनं सकलार्थविचक्षणः ॥ २० ॥

पूर्वाषाढा नक्षत्रमें जिसका जन्म होता है वह दृष्टमात्रही उपकार करनेवाला, भाग्यवान्, मनुष्योंको प्रिय, सकल वस्तुके जाननेमें प्रवीण होता है ॥ २० ॥

बहुमित्रो महाकायो जायते विनयी सुखी ।
उत्तराषाढसंभूतः शूरश्च विजयी भवेत् ॥ २१ ॥

उत्तराषाढामें जन्मा हुआ मनुष्य बहुत मित्रोंवाला, सुंदर वेषवाला, अच्छे शब्द बालेनवाला, सुखी, शूरवीर और विजय पानेवाला होता है ॥ २१ ॥

अतिसुललितकान्तिः सम्मतः सज्जनानां
ननु भवति विनीतश्चारुकीर्तिः सुरूपः।
द्विजवरसुरभक्तिर्व्यक्तवाङ् मानवः स्या-
दभिजिति यदि सूतिर्भूपतिः स स्ववंशे ॥ २२ ॥

जिसके जन्मसमयमें अभिजित् नक्षत्र होय उसकी कान्ति उत्तम, सज्जनोंका संगी, उत्तमकीर्तिवाला, मनोहररूप, देवता व ब्राह्मणोंका पूजनेवाला, यथार्थ बोलनेवाला और अपने कुलमें प्रधान होता है ॥ २२ ॥

कृतज्ञः सुभगो दाता गुणैः सर्वैश्च संयुतः।
श्रीमान्बहुलसन्तानः श्रवणे जायते नरः ॥ २३ ॥

श्रवणनक्षत्रमें जन्म लेनेवाला मनुष्य कृतज्ञ, मनोहर शरीरवाला, दानी, संपूर्ण गुणोंकरके युक्त, धनवान् और बहुत संतानवाला होता है ॥ २३ ॥

गीतप्रियो बन्धुमान्यो हेमरत्नैरलंकृतः।
जातो नरो धनिष्ठायां शतैकस्य पतिर्भवेत् ॥ २४ ॥

धनिष्ठानक्षत्रमें जिसका जन्म होता है वह गानविद्यासे प्रीति करनेवाला, बंधुओंसे मान पानेवाला, हेम-रत्नकरके विभूषित, एकशत मनुष्योंका मालिक होता है ॥२४॥

कृपणो धनपूर्णः स्यात्परदारोपसेवकः।
जातः शतभिषायां च विदेशे कामुको भवेत् ॥ २५ ॥

जिसका शतभिषानक्षत्रमें जन्म होता है वह कृपण, धनी, परस्त्रीके पास रहनेवाला तथा विदेशमें कामी होता है ॥ २५ ॥

वक्ता सुखी प्रजायुक्तो बहुनिद्रो निरर्थकः।
पूर्वाभाद्रपदायां च जातो भवति मानवः ॥ २६ ॥

जिसका जन्म पूर्वाभाद्रपदनक्षत्रमें होता है वह बहुत बोलनेवाला, सुखी, प्रजाकरके युक्त, बहुत निद्रा लेनेवाला, निरर्थक होता है ॥ २६ ॥

गौरः ससत्त्वो धर्मज्ञः शत्रुघाती परामरः।
उत्तराभाद्रपदजो नरः साहसिको भवेत् ॥ २७ ॥

जिसका जन्म उत्तराभाद्रपदा नक्षत्रमें होता है वह गौरवर्णवाला, सतोगुणस्वभाववाला, धर्मका जाननेवाला, शत्रुओंको नाश करनेवाला, देवताओंके समान पराक्रमवाला साहसी होता है ॥ २७ ॥

संपूर्णाङ्गः शुचिर्दक्षः साधुः शूरो विचक्षणः ।
रेवतीसंभवो लोके धनधान्यैरलंकृतः ॥ २८ ॥

रेवतीनक्षत्रमें जिसका जन्म होता है वह संपूर्ण अंगोंवाला, सुंदर, दक्ष, साधु, शूर, चतुर, धनधान्यकरके युक्त होता है ॥ २८ ॥ इति नक्षत्रफलम् ॥

अथ योगजातफलम् ।

विष्कम्भजातो मनुजो रूपवान्भाग्यवान्भवेत् ।
नानालङ्कारसंपूर्णो महाबुद्धिर्विशारदः ॥ १ ॥

विष्कंभयोगमें उत्पन्न हुआ मनुष्य रूपवान्, भाग्यवान्, नानाप्रकारके अलंकारोंसे पूर्ण, महाबुद्धि और चतुर होता है ॥ १ ॥

प्रीतियोगे समुत्पन्नो योषितां वल्लभो भवेत् ।
तत्त्वज्ञश्च महोत्साही स्वार्थे नित्यं कृतोद्यमः ॥ २ ॥

प्रीतियोगमें उत्पन्न हुआ पुरुष स्त्रियोंको प्यारा, तत्त्वका जाननेवाला, बडे उत्साहवाला, स्वार्थी और सदाही उद्यम करनेवाला होता है ॥ २ ॥

आयुष्मन्नामयोगे च जातो मानी धनी कविः ।
दीर्घायुः सत्त्वसंपन्नो युद्धे चाप्यपराजितः ॥ ३ ॥

आयुष्मान् योगमें उत्पन्न हुआ मनुष्य अभिमानी, धनी, कवि, बडी आयुवाला सत्त्वकरके युक्त और युद्धमें जय पानेवाला होता है ॥ ३ ॥

सौभाग्ये च समुत्पन्नो राजमंत्री स जायते ।
निपुणः सर्वकार्येषु वनितानां च वल्लभः ॥ ४ ॥

सौभाग्ययोगमें उत्पन्न हुआ मनुष्य राजाका मंत्री, सब कामोंमें निपुण और स्त्रियोंका प्यारा होता है ॥ ४ ॥

शोभने शोभनो बालो बहुपुत्रकलत्रवान् ।
आतुरः सर्वकार्येषु युद्धभूमौ सदोत्सुकः ॥ ५ ॥

शोभनयोगमें उत्पन्न हुआ मनुष्य स्वरूपवान् बालक, बहुत पुत्रस्त्रियोंसे युक्त, सब कार्योंमें आतुर और संग्राममें सदा तत्पर रहनेवाला होता है ॥ ५ ॥

अतिगण्डे च यो जातो मातृहन्ता भवेच्च सः ।
गण्डान्तेषु च जातस्तु कुलहन्ता प्रकीर्तितः ॥ ६ ॥

अतिगण्डयोगमें जिसका जन्म हो वह अपनी माताका मारनेवाला हो और यदि अतिगण्डके अन्तमें जन्म हो तो कुलका नाश करनेवाला होता है ॥ ६ ॥

सुकर्मनामयोगे तु सुकर्मा जायते नरः ।
सर्वैः प्रीतः सुशीलश्च रागी भोगी गुणाधिकः ॥ ७ ॥

सुकर्मायोगमें जन्म लेनेवाला मनुष्य अच्छे कर्म करनेवाला, सबसे प्रीति करनेवाला, रागी, भोगी और अधिक गुणवाला होता है ॥ ७ ॥

धृतिमान् धृतियोगी च कीर्तिपुष्टिधनान्वितः ।
भाग्यवान्सुखसंपन्नो विद्यावान्गुणवान् भवेत् ॥ ८ ॥

धृतियोगमें उत्पन्न हुआ मनुष्य धैर्यवाला, यश, पुष्टि और धनकरके युक्त, भाग्यवान्, रूप विद्या और गुणोंसे युक्त होता है ॥ ८ ॥

शूले शूलव्यथायुक्तो धार्मिकः शास्त्रपारगः ।
विद्यार्थकुशलो यज्वा जायते मनुजः सदा ॥ ९ ॥

शूलयोगमें उत्पन्न हुआ मनुष्य शूलकी व्यथाकरके युक्त, धर्मवान्, शास्त्रके पारका जाननेवाला, विद्या और द्रव्यमें कुशल और यज्ञ करनेवाला होता है ॥ ९ ॥

गण्डे गण्डव्यथायुक्तो बहुक्लेशो महाशिराः ।
ह्रस्वकायो महाशूरो बहुभोगी दृढव्रतः ॥ १० ॥

गण्डयोगमें जिसका जन्म हो वह गण्डव्यथाकरके युक्त, बहुत क्लेशवाला, बडे मुण्डवाला, छोटी देहवाला, बडा शूर, बहुत भोगी और दृढव्रत करनेवाला होता है॥ १०

वृद्धियोगे सुरूपश्च बहुपुत्रकलत्रवान् ।
धनवानपि भोक्ता च सत्त्ववानपि जायते ॥ ११ ॥

वृद्धियोगमें उत्पन्न हुआ मनुष्य सुन्दररूपवाला, बहुत पुत्र-स्त्रीसे युक्त, धनवान्, भोगी और बलवान् होता है ॥ ११ ॥

ध्रुवयोगे च दीर्घायुः सर्वेषां प्रियदर्शनः ।
स्थिरकर्माऽतिशक्तश्च ध्रुवबुद्धिश्च जायते ॥ १२ ॥

ध्रुवयोगमें उत्पन्न हुआ मनुष्य बडी आयुवाला, सबको प्रियदर्शनवाला, स्थिरकर्म करनेवाला, अतिशक्त और स्थिरबुद्धिवाला होता है ॥ १२ ॥

व्याघातयोगजातश्च सर्वज्ञः सर्वपूजितः ।
सर्वकर्मकरो लोके व्याख्यातः सर्वकर्मसु ॥ १३ ॥

व्याघातयोगमें जन्म लेनेवाला मनुष्य सबका जाननेवाला, सबसे पूजित, सर्व कर्म करनेवाला और संसारमें सब कामोंमें प्रसिद्ध होता है ॥ १३ ॥

हर्षणे जायते लोके महाभाग्यो नृपप्रियः ।
धृष्टः सदा धनैर्युक्तो विद्याशास्त्रविशारदः ॥ १४ ॥

हर्षणयोगमें उत्पन्न हुआ संसारमें अधिक भाग्यवाला, राजाको प्यारा, सदा ही प्रसन्न रहनेवाला, धनी और वेदशास्त्रमें निपुण होता है ॥ १४ ॥

वज्रयोगे वज्रमुष्टिः सर्वविद्यास्त्रपारगः ।
धनधान्यसमायुक्तस्तत्त्वज्ञो बहुविक्रमः ॥ १५ ॥

वज्रयोगमें उत्पन्न हुआ मनुष्य वज्रमुष्टि, सब विद्याओंके पारका जाननेवाला, धनधान्य करके युक्त, तत्त्वका जाननेवाला, बडा बली होता है ॥ १५ ॥

सिद्धियोगे समुत्पन्नः सर्वसिद्धियुतो भवेत् ।
दाता भोक्ता सुखी कान्तः शोकी रोगी च मानवः ॥ १६ ॥

सिद्धियोगमें उत्पन्न हुआ मनुष्य सर्व सिद्धियोंसे युक्त, दानी, भोगी, सुन्दर, शोच और रोगयुक्त होता है ॥ १६ ॥

व्यतीपाते नरो जातो महाकष्टेन जीवति ।
जीवेत्स्याद्भाग्ययोगेन स भवेदुत्तमो नरः ॥ १७ ॥

व्यतीपातयोगमें उत्पन्न हुआ मनुष्य बडे कष्टसे जीता है. यदि भाग्यसे जीता है तो मनुष्योंमें उत्तम होता है ॥ १७ ॥

वरीयोनामयोगे च बलिष्ठो जायते नरः ।
शिल्पशास्त्रकलाभिज्ञो गीतनृत्यादिकोविदः ॥ १८ ॥

वरीयान् योगमें पैदा हुआ मनुष्य बलवान्, शिल्पशास्त्रके कलामें निपुण, गीत-नृत्यादिका जाननेवाला होता है ॥ १८ ॥

परिघे च नरो जातः स्वकुलोन्नतिकारकः ।
शास्त्रज्ञः सुकविर्वाग्मी दाता भोक्ता प्रियंवदः ॥ १९ ॥

परिघयोगमें जन्म लेनेवाला, पुरुष अपने कुलकी वृद्धि करनेवाला, शास्त्रका जाननेवाला, कवि, वाचाल, दानी, भोगी और प्रिय बोलनेवाला होता है ॥ १९ ॥

शिवयोगे नरो जातः सर्वकल्याणभाजनम् ।
महादेवसमो लोके सदा बुद्धियुतो भवेत् ॥ २० ॥

जिसका जन्म शिवयोगमें होता है वह सर्वकल्याणोंका भाजन, महाबुद्धि, वरका देनेवाला संसारमें महादेवके समान होता है ॥ २० ॥

सिद्धियोगे सिद्धिदाता मंत्रसिद्धिप्रवर्तकः ।
दिव्यनारीसमेतश्च सर्वसम्पद्युतो भवेत् ॥ २१ ॥

सिद्धियोगमें उत्पन्न हुआ मनुष्य सिद्धिका देनेवाला, मंत्रसिद्धि करनेवाला, सुन्दर नारी और संपदाओंसे युक्त होता है ॥ २१ ॥

साध्ये मानासिका सिद्धिर्यशोऽशेषसुखागमः ।
दीर्घसूत्रः प्रसिद्धश्च जायते सर्वसंमतः ॥ २२ ॥

साध्ययोगमें उत्पन्न हुआ मनुष्य मानसासिद्धिसे युक्त, यशस्वी, सुखी, धीरे काम करनेवाला, प्रसिद्ध और सबका मित्र होता है ॥ २२ ॥

शुभे शुभशतैर्युक्तो धनवानपि जायते ।
विज्ञानज्ञानसंपन्नो दाता ब्राह्मणपूजकः ॥ २३ ॥

शुभयोगमें जन्म लेनेवाला मनुष्य सैकडों शुभकामोंसे युक्त, धनी, विज्ञान और ज्ञानसे संपन्न, दानी और ब्राह्मणकी पूजा करनेवाला होता है ॥ २३ ॥

शुक्ले सर्वकलायुक्तः सर्वार्थज्ञानवान्भवेत् ।
कविः प्रतापी शूरश्च धनी सर्वजनप्रियः ॥ २४ ॥

शुक्लयोगमें उत्पन्न हुआ मनुष्य सब कलाओंसे युक्त, सब अर्थ और ज्ञानसे युक्त कवि, प्रतापी, शूर, धनी और सब मनुष्योंका प्यारा होता है ॥ २४ ॥

ब्रह्मयोगे महाविद्वान् वेदशास्त्रपरायणः ।
ब्रह्मज्ञानरतो नित्यं सर्वकार्येषु कोविदः ॥ २५ ॥

ब्रह्मयोगमें उत्पन्न हुआ मनुष्य विद्वान् वेदशास्त्रमें परायण, सदैव ब्रह्मज्ञानमें रत और सब कामोंमें निपुण होता है ॥ २५ ॥

ऐन्द्रे भूपकुले जातो राजा भवति निश्चयात् ।
अल्पायुस्तु सुखी भोगी गुणवानपि जायते ॥ २६ ॥

ऐन्द्रयोगमें उत्पन्न हुआ मनुष्य यदि राजकुलमें पैदा हुआ हो तो निश्चयसे राजा होता है परंतु थोडी आयुवाला, सुखी, भोगी और गुणवान् होता है ॥ २६ ॥

वैधृतौ जायते यस्तु निरुत्साही बुभुक्षितः ।
कुर्वाणोऽपि जनैः प्रीतिं प्रयात्यप्रियतां नरः ॥ २७ ॥

वैधृतियोगमें जिसका जन्म होता है वह उत्साहहीन, बुभुक्षित मनुष्योंसे प्रीति करता हुआ भी अप्रिय होता है ॥ २७ ॥ इति योगफलम् ॥

अथ करणानयनम् ।

कृष्णपक्षे तिथिर्द्विघ्ना मुनिभिर्भागमाहरेत् ।
शेषाङ्केन बवाद्यं च तिथ्यादौ करणं विदुः ॥ १ ॥

कृष्णपक्षमें तिथिको दूना करके सातका भाग देवे, शेषसे बवादि करण तिथिके आदिभागमें जानै ॥ १ ॥

तिथिर्द्विघ्ना द्विकोना च शुक्लपक्षे सदा बुधैः ।
शेषाङ्के सप्तभिर्भागस्तिथ्यादौ करणं मतम् ॥ २ ॥

एवं शुक्लपक्षमें तिथिको दूना करके दो हीन करके फिर सातका भाग देवे तो शेष बवादि करण तिथिके आदिमें होता है ॥ २ ॥ जैसा चक्रमें स्पष्ट देखना ॥
इति करणानयनम् ।

कृष्णपक्षे करणानि । शुक्लपक्षे करणानि ।

ति.	पूर्वदल	उत्तर.	ति.	पूर्वदल	उत्तरद.	ति.	पूर्वदल	उत्तरद.	ति.	पूर्वदल	उत्तरद.
१	बालव	कौलव	९	तैतिल	गर	१	किंस्तुघ्न	बव	९	बालव	कौलव
२	तैतिल	गर	१०	वणिज	भद्रा	२	बालव	कौलव	१०	तैतिल	गर
३	वणिज	भद्रा	११	बव	बालव	३	तैतिल	गर	११	वणिज	भद्रा
४	बव	बालव	१२	कौलव	तैतिल	४	वणिज	भद्रा	१२	बव	बालव
५	कौलव	तैतिल	१३	गर	वणिज	५	बव	बालव	१३	कौलव	तैतिल
६	गर	वणिज	१४	भद्रा	शकुनी	६	कौलव	तैतल	१४	गर	वणिज
७	भद्रा	कौलव	०	चतुष्पद	नाग	७	गर	वणिज	१५	भद्रा	बव
८	बालव	कौलव				८	भद्रा	बव			

करणफलम् ।

बवाख्ये करणे जातो मानी धर्मरतः सदा ।
शुभमङ्गलकर्मा च स्थिरकर्मा च जायते ॥ १ ॥

बवकरणमें उत्पन्न हुआ मनुष्य अभिमानी, सदाही धर्ममें रत, शुभ मंगल कर्म और स्थिरकर्म करनेवाला होता है ॥ १ ॥

बालवाख्ये नरो जातस्तीर्थदेवादिसेवकः ।
विद्यार्थसौख्यसंपन्नो राजमान्यश्च जायते ॥ २ ॥

बालवकरणमें पैदा हुआ जन तीर्थ करनेवाला, देवतादिकी सेवा करनेवाला, विद्या-धन-सौख्यसे युक्त एवं राजाओंमें पूज्य होता है ॥ २ ॥

कौलवाख्ये तु जातस्य प्रीतिः सर्वजनैः सह।
सङ्गतिर्मित्रवर्गैश्च मानवांश्च प्रजायते ॥ ३ ॥

कौलवमें उत्पन्न मनुष्य सब मनुष्योंसे प्रीति करनेवाला, मित्रजनोंसे संगति करनेवाला और अभिमानी होता है ॥ ३ ॥

तैतिले करणे जातः सौभाग्यधनसंयुतः।
स्नेही सर्वजनैः सार्द्धं विचित्राणि गृहाणि च ॥ ४ ॥

तैतिलकरणमें उत्पन्न मनुष्य सौभाग्य और गुणयुक्त, सब मनुष्योंसे स्नेह करनेवाला और सुंदर सुंदर घरवाला होता है ॥ ४ ॥

गराख्ये कृषिकर्मा च गृहकार्यपरायणः।
यद्वस्तु वाञ्छितं तच्च लभ्यते च महोद्यमैः ॥ ५ ॥

गरकरणमें उत्पन्न हुआ मनुष्य खेती करनेवाला, घरके काममें निपुण और जिस वस्तुकी कांक्षा करै वह बडे उपायोंसे मिलजावे ॥ ५ ॥

वाणिज्ये करणे जातो वाणिज्येनैव जीवति।
वाञ्छितं लभते लोके देशान्तरगमागमैः ॥ ६ ॥

वाणिज्यकरणमें उत्पन्न हुआ मनुष्य वाणिज्यसे जीविकावाला और परदेशके आनेजानेसे वाञ्छित प्राप्त करनेवाला होता है ॥ ६ ॥

अशुभारम्भशीलश्च परदाररतः सदा।
कुशलो विषकार्येषु विष्टयाख्यकरणेन च ॥ ७ ॥

विष्टिकरणमें पैदा हुआ मनुष्य अशुभ आरंभ करनेवाला, सदाही परस्त्रीमें रत और विषकार्यमें प्रवीण होता है ॥ ७ ॥

शकुनौ करणे जातः पौष्टिकादिक्रियाकृतिः।
औषधादिषु दक्षश्च भिषग्वृत्तिश्च जायते ॥ ८ ॥

शकुनिकरणमें उत्पन्न हुआ मनुष्य पौष्टिकादिक क्रियाओंका करनेवाला, औषधादिकोंमें निपुण, वैद्यकीसे जीविकावाला होता है ॥ ८ ॥

करणे च चतुष्पादे देवद्विजरतः सदा।
गोकर्मा गोप्रभुर्लोके चतुष्पदचिकित्सकः ॥ ९ ॥

चतुष्पादकरणमें उत्पन्न हुआ मनुष्य देवता-ब्राह्मणोंमें सदा रत, गाइयोंका कार्य करनेवाला, गाइयोंका मालिक (रक्षक), चौपायोंकी औषध करनेवाला होता है ॥९॥

नागे च करणे जातो धीवरप्रीतिकारकः ।
कुरुते दारुणं कर्म दुर्भगो लोललोचनः ॥ १० ॥

नागकरणमें उत्पन्न हुआ मनुष्य नीचजनोंसे प्रीति करनेवाला, दारुण कर्म करनेवाला, अभागी और चंचलनेत्रवाला होता है ॥ १० ॥

किंस्तुघ्नकरणे जातः शुभकर्मरतो नरः ।
तुष्टिं पुष्टिं च माङ्गल्यं सिद्धिं च लभते सदा ॥ ११ ॥

किंस्तुघ्नकरणमें जिसका जन्म होता है वह शुभकर्ममें रत रहनेवाला, तुष्टि, पुष्टि, मांगल्य और सिद्धिको प्राप्त करनेवाला होता है ॥ ११ ॥ इति बवादिकरणफलम् ॥

गणज्ञानम् ।

अश्विनीमृगरेवत्यो हस्तः पुष्यः पुनर्वसुः ।
अनुराधा श्रुतिः स्वाती कथ्यते देवतागणः ॥ १ ॥

अश्विनी, मृग, रेवती, हस्त, पुष्य, पुनर्वसु, अनुराधा, श्रवण, स्वाती ये नक्षत्र देवतागण कहलाते हैं, इन नक्षत्रोंमें जन्म हो तो देवतागण जानै अन्यमें भी ऐसे ही जाने ॥ १ ॥

तिस्रः पूर्वाश्चोत्तराश्च तिस्रोऽप्यार्द्रा च रोहिणी ।
भरणी च मनुष्याख्यो गणश्च कथितो बुधैः ॥ २ ॥

पूर्वा ३, उत्तरा ३, अर्द्रा, रोहिणी, भरणी ये मनुष्यगण जानिये ॥ २ ॥

कृत्तिका च मघाऽऽश्लेषा विशाखा शततारका ।
चित्रा ज्येष्ठा धनिष्ठा च मूलं रक्षोगणः स्मृतः ॥ ३ ॥

कृत्तिका, मघा, आश्लेषा, विशाखा, शतभिषा, चित्रा, ज्येष्ठा, धनिष्ठा, मूल ये नक्षत्र राक्षसगण कहलाते हैं ॥ ३ ॥

गणफलम् ।

सुन्दरो दानशीलश्च मतिमान् सरलः सदा ।
अल्पभोजी महाप्राज्ञो नरो देवगणे भवेत् ॥ १ ॥

जिसका जन्म देवतागणमें होता है वह सुन्दर, दानी, शीलवान्, मतिमान्, सरल स्वभाव, थोडा भोजन करनेवाला, महाप्राज्ञ होता है ॥ १ ॥

मानी धनी विशालाक्षो लक्षवेधी धनुर्धरः ।
गौरः पौरजनग्राही जायते मानवे गणे ॥ २ ॥

जिसका जन्म मनुष्यगणमें होता है वह मानी, धनी, विशालनेत्रोंवाला, लक्ष उद्दिष्ट पदार्थ अथवा (शतसहस्र) वेधी, धन्वाका धारण करनेवाला, गौरवर्ण, पुरनिवासियोंका ग्राही होता है ॥ २ ॥

उन्मादी भीषणाकारः सर्वदा कलिवल्लभः ।
पुरुषो दुःसहं ब्रूते प्रमेही राक्षसे गणे ॥ ३ ॥

राक्षसगणमें उत्पन्न होनेवाला मनुष्य मतवाला, भयंकर, सदा युद्धसे प्रीति करनेवाला दुश्शील, प्रमेहरोगवाला होता है ॥ ३ ॥ इति गणफलम् ॥

अथ योनिज्ञानम् ।

अश्विनी वारणश्चाश्वो रेवती भरणी गजः ।
पुष्यश्च कृत्तिका छागो नागश्च रोहिणी मृगः ॥ १ ॥
आर्द्रा मूलमपि श्वा च मूषकः फाल्गुनी मघा ।
मार्जारोऽदितिराश्लेषा गोजातिरुत्तराद्वयम् ॥ २ ॥
महिषौ स्वातिहस्तौ च मृगो ज्येष्ठाऽनुराधिका ।
व्याघ्रश्चित्रा विशाखा च श्रुत्याषाढे च मर्कटौ ॥ ३ ॥
वसुभाद्रपदाः सिंहो नकुलश्चाभिजित्स्मृतः ।
योनयः कथिता भानां वैरमैत्रीं विचारयेत् ॥ ४ ॥

अश्विनी शततारकाकी अश्वयोनि, रेवती भरणीकी हाथी, पुष्य कृत्तिकाकी छाग इत्यादि शेष अर्थ चक्रसे देखना. जन्मनक्षत्रसे योनि जानना ॥ १–४ ॥

योनिविचारचक्रम् ।

अश्वि.	रेव.	पुष्य.	रो.	आ.	पू. फा.	पुन.	उ फा.	स्वा.	ज्ये.	चि.	पू षा.	ध.	अभि.
शत.	भर	कृ.	मृ.	मू.	म.	ऽश्ले.	उ. भा.	ह.	अनु.	वि.	श्र.	पू.भा,	उ.षा.
घोडा	हा.	छाग	नाग.	श्वा.	मूष.	बिला	गो.	भैंस.	मृग	व्याघ्र.	वानर	सिंह.	नेवल.

स्वच्छन्दः सद्गुणः शूरस्तेजस्वी घर्घरेश्वरः ।
स्वामिभक्तस्तुरङ्गस्य योन्यां जातो भवेन्नरः ॥ १ ॥

घोडाकी योनिमें पैदा हुआ मनुष्य स्वच्छंद, अच्छे गुणवाला, शूरवीर, तेजस्वी, वाद्यमें प्रवीण, स्वामीका भक्त होता है ॥ १ ॥

राजमान्यो बली भोगी भूपस्थानविभूषणः ।
आत्मोत्साही नरो जातो गजयोनौ न संशयः ॥ २ ॥

गज (हाथी) की योनिमें उत्पन्न हुआ मनुष्य राजमान्य, बलवान्, भोगी, राजाके स्थानसे सत्कार पानेवाला, उत्साही होता है ॥ २ ॥

स्त्रीणां प्रियः सदोत्साही बहुवाक्यविशारदः ।
स्वल्पायुश्च नरो जातः पशुयोनौ न संशयः ॥ ३ ॥

पशुयोनिमें उत्पन्न हुआ मनुष्य स्त्रियोंका प्यारा, सदा उत्साहयुक्त, वाक्यरचनामें निपुण, थोडी आयुवाला होता है ॥ ३ ॥

दीर्घरोषः सदा क्रूर उपकारं न गृह्यते ।
परवेश्मापहारी च सर्पयोनौ न संशयः ॥ ४ ॥

सर्पयोनिमें उत्पन्न हुआ मनुष्य बडा क्रोधी, क्रूर, उपकारको ग्रहण न करनेवाला, पराये मकानको हरनेवाला होता है ॥ ४ ॥

सोद्यमः सुमहोत्साही शूरः स्वज्ञातिविग्रही ।
मातापित्रोः सदा भक्तः श्वानयोनिसमुद्भवः ॥ ५ ॥

श्वान (कुत्ता) की योनिमें उत्पन्न हुआ मनुष्य उद्यमवान्, बडा उत्साही, शूर, स्वजातिका विग्रही, मातापिताका भक्त होता है ॥ ५ ॥

स्वस्वकार्ये शूरदक्षो मिष्टान्नाहारभोजनः ।
निर्दयो दुष्टसद्भावी नरो मार्जारयोनिजः ॥ ६ ॥

मार्जार (बिलाव) की योनिमें उत्पन्न हुआ मनुष्य अपने कार्यमें शूर तथा दक्ष, मिष्टान्नका भोजन करनेवाला निर्दयी, दुष्ट, अच्छे भाग्यवाला होता है ॥ ६ ॥

महाविक्रमयोद्धापि ईश्वरो विभवेश्वरः ।
परोपकारी नित्यं च मेषयोनौ भवेन्नरः ॥ ७ ॥

मेष योनिमें उत्पन्न हुआ मनुष्य महापराक्रमी, योद्धा, समर्थ, धनका स्वामी (धनी) और परोपकारी होता है ॥ ७ ॥

बुद्धिमान्वित्तसंपूर्णः स्वकार्यकरणोद्यतः ।
अप्रमत्तोऽप्यविश्वासी नरो मूषकयोनिजः ॥ ८ ॥

मूषकयोनिमें उत्पन्न हुआ मनुष्य बुद्धिमान्, धनवान्, अपने कार्यके करनेमें उद्यत, मदसे रहित, विश्वास न करनेवाला होता है ॥ ८ ॥

स्वधर्मे तु सदाचारः सत्क्रियासद्गुणान्वितः ।
कुटुम्बस्य समुद्धर्ता सिंहयोनिभवो नरः ॥ ९ ॥

सिंहयोनिमें उत्पन्न हुआ मनुष्य अपने धर्ममें तत्पर, शुभ आचारवाला, अच्छी क्रियाओंका करनेवाला, सुंदर गुणकरके युक्त, कुटुंबके उद्धार करनेवाला होता है ९॥

संग्रामे विजयी योद्धा सकामस्तु बहुप्रजः ।
वाताधिको मन्दमतिर्नरो महिषयोनिजः ॥ १० ॥

महिषयोनिमें जिसका जन्म हो वह संग्राममें विजयको पानेवाला, योद्धा, कामी, प्रजावाला, अधिकवातवाला, मन्दबुद्धिवाला होता है ॥ १० ॥

स्वच्छन्दोऽर्थरतो ग्राही दीक्षावान् स विभुः सदा ।
आत्मस्तुतिपरो नित्यं व्याघ्रयोनिभवो नरः ॥ ११ ॥

व्याघ्रयोनिमें उत्पन्न हुआ मनुष्य स्वच्छन्द, धनमें रत, ग्राही, दीक्षावान्, धनवान्, अपने आप अपनी प्रशंसा करनेवाला होता है ॥ ११ ॥

स्वच्छन्दः शान्तसद्वृत्तिः सत्यवान् स्वजनप्रियः ।
धर्मिष्ठो रणशूरश्च यो नरो मृगयोनिजः ॥ १२ ॥

मृगयोनिमें पैदाहुआ मनुष्य स्वच्छंद, शांतस्वभाव, भली जीविकावाला, सत्य बोलनेवाला, अपने जनोंसे प्रीति करनेवाला अथवा स्वजनोंका प्रिय, धर्मवान्, युद्धमें शूर होता है ॥ १२ ॥

चपलो मिष्टभोगी चार्थलुब्धश्च कलिप्रियः ।
सकामः सत्प्रजः शूरो नरो वानरयोनिजः ॥ १३ ॥

वानरयोनिमें उत्पन्न हुआ मनुष्य चपल, मिष्टभोगी, धनका लोभी, लडाईसे प्रीति करनेवाला, कामी, प्रजावाला, शूर होता है ॥ १३ ॥

परोपकरणे दक्षो वित्तेश्वरविचक्षणः ।
पितृमातृप्रियो नित्यं नरो नकुलयोनिजः ॥ १४ ॥

नकुलयोनिमें जिसका जन्म हो वह परोपकार करनेमें दक्ष, धनका स्वामी, चतुर, पितामातासे प्रीति करनेवाला होता है ॥ १४ ॥ इति योनिफलम् ॥

वारायुः।

विपदः प्रथमे मासे द्वात्रिंशे च त्रयोदशे।
षष्ठेऽपि च ततः सूर्ये जातो जीवति षष्टिकम् ॥ १ ॥

रविवारके दिन जिसका जन्म होता है उसको पहिले मासमें पीडा हो और बत्तीसवें और तेरहवें छठे वर्षमें भी पीडा होकर साठ वर्ष जीवे ॥ १ ॥

एकादशेऽष्टमे मासे चन्द्रे पीडा च षोडशे।
सप्तविंशतिवर्षे च चतुर्युक्ताशितौ मृतिः ॥ २ ॥

जिसका सोमवारके दिन जन्म हो उसको ग्यारहवें, आठवें और सोलहवें महीने तथा सत्ताईसवें वर्षमें पीडा होकर चौरासी वर्ष जीवे ॥ २ ॥

द्वात्रिंशे च द्वितीये च वर्षे पीडा च मङ्गले।
चतुःसप्ततिवर्षाणि सदा रोगी स जीवति ॥ ३ ॥

जिसका मंगलके दिन जन्म हो उसको बत्तीसवें और दूसरे वर्षमें पीडा हो और सदाही रोगी रहताहुआ चौहत्तर वर्ष जीवे ॥ ३ ॥

बुधवारेऽष्टमे मासे पीडा वर्षे तथाऽष्टमे।
पूर्णे चतुःषष्टिवर्षे ततो मृत्युर्भविष्यति ॥ ४ ॥

जिसका बुधवारके दिन जन्म हो उसको आठवें महीना आठवें ही वर्षमें पीडा होकर चौसठ वर्ष जीवे ॥ ४ ॥

गुरौ च सप्तमे मासे षोडशे च त्रयोदशे।
पीडा ततश्चतुर्युक्ताशीतिवर्षाणि जीवति ॥ ५ ॥

जिसका बृहस्पतिके दिन जन्म हो उसको सातवें, सोलहवें या तेरहवें महीनेमें पीडा होकर चौरासी वर्ष जीवे ॥ ५ ॥

शुक्रवारे च जातस्य देहो रोगविवर्जितः।
षष्टिवर्षेऽथ संपूर्णे म्रियते मानवो ध्रुवम् ॥ ६ ॥

जिसका शुक्रवारके दिनमें जन्म हो उसको रोग नहीं होता और निश्चय करके पूरे साठ वर्षमें मरे ॥ ६ ॥

शनौ च प्रथमे मासे पीड्यते च त्रयोदशे।
दृढदेहस्तथा जातः शतवर्षाणि जीवति ॥ ७ ॥

जिसका शनिवारका जन्म हो उसको पहिले महीना और तेरहवें वर्षमें पीडा हो फिर पुष्टदेह होकर सौवर्ष जीवे ॥ ७ ॥ इति वारायुः ॥

अथ जन्मलग्नफलम् ।

मेषलग्ने समुत्पन्नश्चण्डो मानी धनी शुभः ।
क्रोधी स्वजनहन्ता च विक्रमी परवत्सलः ॥ १ ॥

मेषलग्नमें जिसका जन्म होता है वह घोर, मानी, धनी, सुंदर, क्रोधी, भाइयोंका नाश करनेवाला, पराक्रमी और परायेको प्यारा होता है ॥ १ ॥

वृषलग्नभवो लोके गुरुभक्तः प्रियंवदः ।
गुणी कृती धनी लोभी शूरः सर्वजनप्रियः ॥ २ ॥

जिसका वृषलग्नमें जन्म होता है वह गुरुका भक्त, प्रिय बोलनेवाला, गुणी, कृती, धनी, लोभी, वीर और सबका प्यारा होता है ॥ २ ॥

मिथुनोदयसंजातो मानी स्वजनवल्लभः ।
त्यागी भोगी धनी कामी दीर्घसूत्रोऽरिमर्दकः ॥ ३ ॥

मिथुनलग्नमें जिसका जन्म होता है वह अभिमानी, भाइयोंका प्यारा, दानी, भोगी, धनी, कामी, धीरे काम करनेवाला और शत्रुओंका मारनेवाला होता है ॥ ३ ॥

कर्कलग्ने समुत्पन्नो भोगी धर्मजनप्रियः ।
मिष्टान्नपानसंयुक्तः सौभाग्यः सुजनप्रियः ॥ ४ ॥

कर्कलग्नमें उत्पन्न होनेवाला मनुष्य भोगी, धर्मवान् जनोंका प्यारा, मिष्टान्न आदिका भोजन करनेवाला सौभाग्यवाला, भाइयोंका प्यारा होता है ॥ ४ ॥

सिंहलग्नोदये जातो भोगी शत्रुविमर्दकः ।
स्वल्पोदरोऽल्पपुत्रश्च सोत्साही रणविक्रमः ॥ ५ ॥

सिंहलग्नमें जिसका जन्म होता है वह भोगी, शत्रुओंका मारनेवाला, छोटे पेटवाला, थोडी संतानवाला, उत्साह करनेवाला और रणमें पराक्रम करनेवाला होता है॥५

कन्यालग्ने भवेद्बालो नानाशास्त्रविशारदः ।
सौभाग्यगुणसंपन्नः सुन्दरः सुरतप्रियः ॥ ६ ॥

जिसका कन्यालग्नमें जन्म होता है वह बालक अनेक शास्त्रोंमें निपुण, सौभाग्य और गुणोंकरके युक्त, सुंदर, सुरतप्रिय होता है ॥ ६ ॥

तुलालग्नोदये जातः सुधीः सत्कर्मजीविकः ।
विद्वान् सर्वकलाभिज्ञो धनाढ्यो जनपूजितः ॥ ७ ॥

जिसका तुलालग्नमें जन्म होता है वह सुन्दर बुद्धिवाला, अच्छे कर्मोंसे जीविका करनेवाला, विद्वान्, सब कलाओंका जाननेवाला, धनवान् और जनों-करके पूजित होता है ॥ ७ ॥

वृश्चिकोदयसंजातः शौर्यवान्धनवान्सुधीः ।
कुलमध्ये प्रधानश्च प्राज्ञः सर्वस्य पोषकः ॥ ८ ॥

जिसका वृश्चिकलग्नमें जन्म होता है वह शौर्यवान् (महावीर), धनवान्, पंडित, कुलमें प्रधान, बुद्धिमान्, सबका पालन करनेवाला होता है ॥ ८ ॥

धनुर्लग्नोदये जातो नीतिमान् धर्मवान्सुधीः ।
कुलमध्ये प्रधानश्च प्राज्ञः सर्वस्य पोषकः ॥ ९ ॥

धनु लग्नके उदयमें जिसका जन्म हो वह नीतिमान्, धर्मवान्, सुंदर बुद्धिवाला, श्रेष्ठ कुलवाला, बुद्धिमान् और सबका पालन करनेवाला होता है ॥ ९ ॥

मकरोदयसंजातो नीचकर्मा बहुप्रजः ।
लुब्धो विनष्टोऽलसश्च स्वकार्येषु कृतोद्यमः ॥ १० ॥

मकरलग्नमें जिसका जन्म होता है वह नीचकर्म करनेवाला, बहुत संतानवाला, लोभी, नष्ट, आलसी और अपने काममें उद्यम करनेवाला होता है ॥ १० ॥

कुंभलग्ने नरो जातोऽचलचित्तोऽतिसौहृदः ।
परदाररतो नित्यं मृदुकायो महासुखी ॥ ११ ॥

कुंभ लग्नके उदयमें जन्म लेनेवाला मनुष्य स्थिरचित्तवाला, बहुत मित्रोंवाला, सदा पराई स्त्रीमें रत, कोमल अंगवाला और महासुखी होता है ॥ ११ ॥

मीनलग्ने भवेद्बालो रत्नकाञ्चनपूरितः ।
अल्पकामोऽतिकृशश्च दीर्घकालविचिन्तकः ॥ १२ ॥

मीन लग्नके उदयमें उत्पन्न हुआ मनुष्य रत्न और सोनेसे पूरित, थोडी कामना-वाला, बहुत दुर्बल और बहुत देरतक चिन्तन करनेवाला होता है ॥ १२ ॥
इति जन्मलग्नफलम् ॥

अथ नवांशफलम् ।

पिशुनश्चपलो दुष्टः पापकर्मा निराकृतिः ।
परेषां व्यसने सक्तः प्रथमांशे प्रजायते ॥ १ ॥

जन्मराशिके पहिले नवांशमें जिसका जन्म हो वह चुगुलखोर, चंचल, दुष्ट, पापी, कुरूप, शत्रुओंके व्यसनमें आसक्त होता है ॥ १ ॥

उत्पन्नविभवो भोक्ता संग्रामे विगतस्पृहः ।
गान्धर्वप्रमदासक्तो द्वितीयांशे प्रजायते ॥ २ ॥

दूसरेमें उत्पन्न हुआ भोगी, लडाईकी इच्छा नहीं करनेवाला, गानेवाले पुरुषकी स्त्रीमें आसक्त हो ॥ २ ॥

धर्मिष्ठः सन्ततव्याधिः सर्वसारज्ञ एव च ।
सर्वज्ञो देवताभक्तस्तृतीयांशे प्रजायते ॥ ३ ॥

तीसरे नवांशमें जन्माहुआ धर्मवान्, सदा व्याधियुक्त, सब सारका जाननेवाला, सर्वज्ञ और देवोंका भक्त होता है ॥ ३ ॥

चतुर्थांशेऽभिजातस्तु दीक्षितो गुरुभक्तिमान् ।
यत्किंचिद्धरणौ वस्तु तत्सर्वं लभते हि सः ॥ ४ ॥

चौथे अंशमें उत्पन्न हुआ मनुष्य दीक्षा लिये गुरुकी भक्ति करनेवाला, जितनी वस्तु पृथ्वीमें हैं तिन सबको लाभ करनेवाला होता है ॥ ४ ॥

सर्वलक्षणसंपन्नो राजा भवति विश्रुतः ।
दीर्घायुर्बहुपुत्रश्च जायते पञ्चमांशके ॥ ५ ॥

पांचवें अंशमें उत्पन्न हुआ मनुष्य बडी आयुवाला, बहुत पुत्रोंसे युक्त, सब लक्षणोंसे संपन्न राजा होता है ॥ ५ ॥

स्त्रीनिर्जितः शुभैर्हीनो बहुमानी नपुंसकः ।
अर्थध्वंसी प्रमाथी च षष्ठांशे जायते नरः ॥ ६ ॥

छठे अंशमें उत्पन्न हुआ मनुष्य स्त्रीसे हाराहुआ, शुभहीन, बडा मानी, नपुंसक, द्रव्यहीन और प्रमाथी होता है ॥ ६ ॥

विक्रान्तो मतिमाञ्छूरः संग्रामेष्वपराजितः ।
महोत्साही च संतोषी जायते सप्तमांशके ॥ ७ ॥

सातवें अंशमें उत्पन्न मनुष्य पराक्रमी, बुद्धिमान्, वीर, लडाईमें जीतनेवाला बडे उत्साहयुक्त और संतोषी होता है ॥ ७ ॥

कृतघ्नो मत्सरी क्रूरः क्लेशभोगी बहुप्रजः ।
फलकाले परित्यागी जायते चाष्टमांशके ॥ ८ ॥

आठवें अंशवाला कृतघ्न, ईर्षा करनेवाला, क्रूर, क्लेश भोगनेवाला, बहुत सन्तान-वाला, कालमें फलत्याग करनेवाला होता है ॥ ८ ॥

क्रियासु कुशलो दक्षः सुप्रतापी जितेन्द्रियः ।
भृत्यैश्च वेष्टितो नित्यं जायते नवमेंऽशके ॥ ९ ॥

नववें नवांशकमें उत्पन्न हुआ मनुष्य क्रियाओंमें प्रवीण, निपुण, अच्छे प्रताप-वाला, जितेन्द्रिय और सदाही नौकरोंकरके युक्त होता है ॥ ९ ॥ इति राशिनवां-शकफलम् ॥

नवांशचक्रम् ।

अंशाः		मे	वृष	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
३	२०	मे	म	तु	क	मे	म	तु	क	मे	म	तु	क
६	४०	वृ	कुं	वृ	सिं	वृ	कुं	वृ	सिं	वृ	कुं	वृ	सिं
१०	०	मि	मी	ध	क	मि	मी	ध	क	मि	मी	ध	क
१३	२०	क	मे	म	तु	क	मेष	म	तु	क	मे	म	तु
१६	४०	सिं	वृ	कुं	वृ	सिं	वृ	कुं	वृ	सिं	वृ	कुं	वृ
२०	०	क	मि	मी	ध	कं	मि	मी	ध	क	मि	मी	ध
२३	२०	तु	क	मे	म	तु	क	मे	म	तु	क	मे	म
२६	४०	वृ	सिं	वृ	कुं	वृ	सिं	वृ	कुं	वृ	सिं	वृ	कुं
३०	०	ध	क	मि	मी	ध	क	मि	मी	ध	क	मि	मी

चन्द्रकुण्डलिका ।

लग्नं देहो वर्गषट्कोडुकानि प्राणश्चन्द्रो धातवोऽन्ये ग्रहेन्द्राः ।
प्राणे नष्टे देहधात्वङ्गनाशो यस्मात्तस्माच्चन्द्रवीर्यप्रधानः ॥ १ ॥
लग्नमात्मा मनश्चन्द्रस्तदात्मा जीवयोगवान् ।
लग्नांशाद्द्वादशांशाद्वा ग्रहाणां फलमादिशेत् ॥ २ ॥
इन्दुः सर्वत्र बीजाम्भो लग्नं च कुसुमप्रभम् ।
फलेन सदृशोंऽशश्च भावः स्वादुरसः स्मृतः ॥ ३ ॥

जन्मलग्न अपना शरीर है और षड्वर्ग अंग है और चन्द्रमा प्राण है और अन्य-ग्रहोंको धातु जानना. इस प्रकार प्राणके नाश होजानेसे देह धातु अंगादिकाभी नाश होजाता है, इस कारण चन्द्रवीर्यही प्रधान माना गया है ॥ लग्न आत्मा है

और चन्द्रमा मन है तो आत्मा और जीवका लग्नांश अथवा द्वादशांशसे ग्रहोंद्वारा फल कहना चाहिये ॥ सर्वत्र चन्द्रमा बीज और जल कहा है, लग्नको पुष्प, नवांशको फल और भावोंको स्वादुरस माना है ॥ १-३ ॥ इति चन्द्रकुंडलिका ॥

चन्द्रराशिफलम्।

लोलनेत्रः सदा रोगी धर्मार्थकृतनिश्चयः।
पृथुजङ्घः कृतज्ञश्च निष्पापो राजपूजितः ॥ १ ॥
कामिनीहृदयानन्दो दाता भीतो जलादपि।
चण्डकर्मा मृदुश्चान्ते मेषराशौ भवेन्नरः ॥ २ ॥

मेषराशिमें जिसका जन्म होता है वह चंचलनेत्रोंवाला, सदा ही रोगी, धर्म और धनमें निश्चय करनेवाला, मोटी जंघावाला, जाननेहारा, पापरहित, राजाओंसे पूजित होता है, स्त्रीके हृदयको आनन्द देनेवाला, दानी, जलसे डरनेवाला, घोरकर्म करनेवाला अंतमें कोमल होता है ॥ १ ॥ २ ॥

भोगी दाता शुचिर्दक्षो महासत्त्वो महाबलः।
धनी विलासी तेजस्वी सुमित्रश्च वृषे भवेत् ॥ ३ ॥

जिसका वृषराशिमें जन्म हो वह भोगी, दानी, पवित्र, चतुर, महासत्त्ववान्, महाबली, धनी, विलासी, तेजवान् और सुंदरमित्रवाला होता है ॥ ३ ॥

मित(ष्ट)वाक्यो लोलदृष्टिर्दयालुर्मैथुनप्रियः।
गान्धर्ववित्कण्ठरोगी कीर्तिभागी धनी गुणी ॥ ४ ॥
गौरो दीर्घः पटुर्वक्ता मेधावी च दृढव्रतः।
समर्थो न्यायवादी च जायते मिथुने नरः ॥ ५ ॥

जिसका मिथुनराशिमें जन्म होता है वह विचारके बात करनेवाला, चंचलदृष्टिवाला, दयावान्, मैथुन जिसको प्यारा लगे, गानेवाला, कंठरोगी, यशका भागी, धनी, गुणी, गोरे रंगवाला, लम्बा, प्रवीण, वक्ता, बुद्धिमान्, दृढव्रत करनेवाला, समर्थ और न्यायवादी होता है ॥ ४ ॥ ५ ॥

कार्यकारी धनी शूरो धर्मिष्ठो गुरुवत्सलः।
शिरोरोगी महाबुद्धिः कृशाङ्गः कृत्यवित्तमः ॥ ६ ॥

प्रवासशीलः कोपान्धोऽबलो दुःखी सुमित्रकः ।
अनासक्तो गृहे वक्रः कर्कराशौ भवेन्नरः ॥ ७ ॥

कर्कराशिमें जिसका जन्म होता है वह कार्य करनेवाला, धनी, शूर, धर्मवान्, गुरुका प्यारा, शिरोरोगवाला, महाबुद्धिमान्, दुर्बलदेहवाला, अच्छा जाननेवाला, प्रवास करनेवाला, कोपी, दुःखी और सुन्दरमित्रवाला, घरमें अनासक्त, ढीठ होता है॥६॥७॥

क्षमायुक्तः क्रियासक्तो मद्यमांसरतः सदा ।
देशभ्रमणशीलश्च शीतभीतः सुमित्रकः ॥ ८ ॥
विनयी शीघ्रकोपी च जननीपितृवल्लभः ।
व्यसनी प्रकटो लोके सिंहराशौ भवेन्नरः ॥ ९ ॥

जिसका सिंहराशिमें जन्म होता है वह क्षमायुक्त, क्रियामें आसक्त, मदिरा-मांसमें सदा रत रहनेवाला, देशमें घूमनेवाला, जाडेसे डरनेवाला, सुन्दर मित्र-वाला, विनयी, जल्दी क्रोधवाला, मातापिताको प्यारा, व्यसनी और संसारमें प्रसिद्ध होता है ॥ ८ ॥ ९ ॥

विलासी सुजनाह्लादी सुभगो धर्मपूरितः ।
दाता दक्षः कविर्वृद्धो वेदमार्गपरायणः ॥ १० ॥
सर्वलोकप्रियो नाटयगान्धर्वव्यसने रतः ।
प्रवासशीलः स्त्रीदुःखी कन्याजातो भवेन्नरः ॥ ११ ॥

जिसका कन्याराशिमें जन्म होता है वह विलासी, सज्जन जनोंका आनन्द देने-वाला, सुंदर, धर्मसे युक्त, दानी, निपुण, कवि, वृद्ध, वेदमार्गमें परायण, सब संसारको प्यारा, गाने बजानेमें रत, परदेश जिसको अच्छा लगे, स्त्रीकरके दुःखी होता है ॥ १० ॥ ११ ॥

अस्थानरोषणो दुःखी मृदुभाषी कृपाऽन्वितः ।
चलाक्षश्चललक्ष्मीको गृहमध्येऽतिविक्रमः ॥ १२ ॥
वाणिज्यदक्षो देवानां पूजको मित्रवत्सलः ।
प्रवासी सुहृदामिष्टस्तुलाजातो भवेन्नरः ॥ १३ ॥

जिसका तुलाराशिमें जन्म होता है वह अस्थानमें क्रोधी, दुःखी, मीठा बोलने-वाला, दयायुक्त, चंचलनेत्रवाला, चललक्ष्मीवाला, घरमें बडा बली, वाणिज्यमें निपुण, देवताओंका पूजनेवाला, मित्रोंका प्यारा, परदेशी, सज्जनोंको प्रिय ऐसा मनुष्य होता है ॥ १२ ॥ १३ ॥

बालप्रवासी क्रूरात्मा शूरः पिङ्गललोचनः।
परदाररतो मानी निष्ठुरः स्वजने भवेत् ॥ १४ ॥
साहसप्राप्तलक्ष्मीको जनन्यामपि दुष्टधीः।
धूर्तश्चौरकलारम्भी वृश्चिके जायते नरः ॥ १५ ॥

जिसका वृश्चिकराशिका जन्म हो वह बाल्यावस्थासे ही परदेशी, क्रूर आत्मावाला, वीर, पिंगल नेत्रवाला, पराई स्त्रीमें रत, अभिमानी, बंधुओंमें निष्ठुर, साहससे लक्ष्मीका पानेवाला, मातामें भी दुष्ट बुद्धिवाला, धूर्त, चोरकलाओंका आरंभ करनेवाला होता है ॥ १४ ॥ १५ ॥

शूरः सत्यधिया युक्तः सात्त्विको जननन्दनः।
शिल्पविज्ञानसंपन्नो धनाढ्यो दिव्यभार्यकः ॥ १६ ॥
मानी चरित्रसंपन्नो ललिताक्षरभाषकः।
तेजस्वी स्थूलदेहश्च धनुर्जातः कुलान्तकः ॥ १७ ॥

जिसका धनुराशिमें जन्म होता है वह वीर, बराबर बुद्धिवाला, सात्त्विकजनोंको आनंद देनेवाला, शिल्पविज्ञानमें युक्त, धनकरके युक्त, सुंदरभार्यावाला, अभिमानी, चरित्र युक्त, मनोहर अक्षरोंका बोलनेवाला, तेजस्वी, स्थूल देहवाला, कुलनाश करनेवाला होता है ॥ १६ ॥ १७ ॥

कुले नेष्टो वशः स्त्रीणां पण्डितः परिवादकः।
गीतज्ञो ललितग्राह्यः पुत्राढ्यो मातृवत्सलः ॥ १८ ॥
धनी त्यागी सुभृत्यश्च दयालुर्बहुबान्धवः।
परिचिन्तितसौख्यश्च मकरे जायते नरः ॥ १९ ॥

जिसका मकरराशिमें जन्म हो वह कुलमें नेष्ट, स्त्रियोंके वशमें रहनेवाला, पण्डित, परिवादवाला, गीतका जाननेवाला, स्त्रियोंके प्रसंगकी इच्छा करनेवाला, पुत्रवान्, माताका प्यारा होता है, धनी, दानी, अच्छे नौकरोंवाला, दयावान्, बहुत भाइयोंवाला और सुखकी चिन्ता करनेवाला होता है ॥ १८ ॥ १९ ॥

दाताऽलसः कृतज्ञश्च गजवाजिधनेश्वरः।
शुभदृष्टिः सदा सौम्यो धनविद्याकृतोद्यमः ॥ २० ॥

पुण्याढचः स्नेहकीर्तिश्च धनभोगी स्वशक्तितः ।
शालूरकुक्षिर्निर्भीतः कुम्भे जातो भवेन्नरः ॥ २१ ॥

जिसका कुंभराशिमें जन्म हो वह दानी, आलसी, कृतज्ञ, हाथी घोडे और धनका स्वामी, अच्छी दृष्टिवाला, सदा सौम्य, धनविद्याके लिये उद्यम करनेवाला, पुण्ययुक्त, स्नेहकीर्तिवाला, धनी, भोगी, बली, शालूर पक्षीके तुल्य कोखिवाला और निर्भय होता है ॥ २० ॥ २१ ॥

गम्भीरचेष्टितः शूरः पटुवाक्यो नरोत्तमः ।
कोपनः कृपणो ज्ञानी गुणश्रेष्ठः कुलप्रियः ॥ २२ ॥
नित्यसेवी शीघ्रगामी गान्धर्वकुशलः शुभः ।
मीनराशौ समुत्पन्नो जायते बन्धुवत्सलः ॥ २३ ॥

जिसका मीनराशिमें जन्म होता है वह गंभीर चेष्टावाला, वीर, प्रवीण, मीठी वाणीवाला, मनुष्योंमें श्रेष्ठ, क्रोधी, कृपण, ज्ञानी, गुणमें श्रेष्ठ, कुलका प्यारा, सदा सेवा करनेवाला, जल्दी चलनेवाला, गानेमें निपुण, शुभ और भाइयोंका प्यारा होता है ॥ २२ ॥ २३ ॥ इति चन्द्रराशिफलम् ॥

अथ सूर्यभावाध्यायः ।

चन्द्रात्प्रथमगो भानुर्जन्मकाले यदा भवेत् ।
विदेशगामी भोगी च कलहे कृतवासनः ॥ १ ॥

जिसके जन्मसमयमें सूर्य चन्द्रमाके साथ स्थित हो तो वह विदेशगामी, भोगी, कलहमें वासनावाला होता है ॥ १ ॥

जन्मकाले यदा भानुर्द्वितीयो यदि चन्द्रतः ।
बहुभृत्ययशाश्चैव राजमान्यो भवेन्नरः ॥ २ ॥

जिसके सूर्य चन्द्रमासे दूसरे स्थित हो तो वह बहुत नौकरों और यशवाला राजासे मान्य होता है ॥ २ ॥

चन्द्राद्भानुस्तृतीयश्च जन्मकाले यदा भवेत् ।
स्वर्णार्थेशः शुचिश्चैव राजतुल्यो भवेन्नरः ॥ ३ ॥

चन्द्रमासे तीसरे सूर्य हो तो वह सुवर्ण, धनका स्वामी, पवित्र, राजाके समान होता है ॥ ३ ॥

चन्द्राच्चतुर्थगो भानुर्जन्मकाले यदा भवेत्।
गणकाः कथयन्त्येव मातृहन्ता न भक्तिमान्[1] ॥ ४ ॥

चन्द्रमासे चतुर्थ सूर्य हो तो वह माताका मारनेवाला, अभक्तिमान् होता है ऐसा पण्डित कहते हैं ॥ ४ ॥

चन्द्रात्पञ्चमगो भानुर्जन्मकाले यदा भवेत्।
सुताभिश्चासुखी चैव बहुपुत्री भविष्यति ॥ ५ ॥

चन्द्रमासे पंचम सूर्य स्थित हो तो वह कन्याओं करके असुखी और बहुत पुत्रोंवाला होता है ॥ ५ ॥

चन्द्रात्षष्ठगतो भानुर्जन्मकाले यदा भवेत्।
शत्रूणां विजयी शूरः क्षात्रकर्मरतः सदा ॥ ६ ॥

चन्द्रमासे छठे सूर्य हो तो वह शत्रुओंको जीतनेवाला, शूर (वीर), क्षत्रिय धर्मके कर्ममें सदा रत रहनेवाला होता है ॥ ६ ॥

जन्मकाले यदा भानुश्चन्द्रात्सप्तमगो भवेत्।
सुस्त्री सुशीलचारी च राजमान्यो महातपाः ॥ ७ ॥

चन्द्रमासे सातवें सूर्य स्थित हो तो वह सुन्दर स्त्रीवाला, शीलवान्, राजमान्य और बडा तपस्वी होता है ॥ ७ ॥

चन्द्रादष्टमगो भानुर्जन्मकाले यदा भवेत्।
सर्वदा क्लेशकारी च ह्यतिरोगात्प्रपीडितः ॥ ८ ॥

जिसके चन्द्रमासे आठवें सूर्य स्थित हो वह सदा क्लेश सहनेवाला, अनेक रोगोंसे पीडित होता है ॥ ८ ॥

चन्द्रान्नवमगो भानुर्जन्मकाले यदा भवेत्।
धर्मात्मा सत्यवादी च बन्धक्लेशी सदा भवेत् ॥ ९ ॥

चन्द्रमासे नवम सूर्य स्थित हो तो वह मनुष्य धर्मात्मा, सत्य बोलनेवाला, बन्धनका क्लेश पानेवाला होता है ॥ ९ ॥

चन्द्राद्दशमगो भानुर्जन्मकाले यदा भवेत्।
तस्य द्वारेषु तिष्ठन्ति धनवन्तो न संशयः ॥ १० ॥

जिसके चन्द्रमासे दशम सूर्य स्थित हो तो उसके दरवाजेपर धनवान् ठहरें अर्थात् अधिक धनवाला और प्रतापी होता है ॥ १० ॥

---

१ मातृहस्तेन भुक्तिमान्। इति पाठान्तरम्।

चन्द्रादेकादशे भानुर्जन्मकाले यदा भवेत् ।
राजगर्व्यतिवेत्ता च प्रसिद्धः कुलनायकः ॥ ११ ॥

जिसके चन्द्रमासे ग्यारहवें सूर्य स्थित हो तो वह राजगर्वी, अधिक वेत्ता, प्रसिद्ध, कुलका नायक होता है ॥ ११ ॥

चन्द्राद्द्वादशगो भानुर्जन्मकाले यदा भवेत् ।
तेजोहीनो नयनयो रोषावेशात्प्रमुच्यते ॥ १२ ॥

जिसके चन्द्रमासे सूर्य बारहवें हो तो वह नेत्रोंमें अल्प प्रकाशवाला और क्रोधी होता है ॥ १२ ॥ इति सूर्यभावाध्यायः ॥

अथ भौमभावाध्यायः ।

चन्द्रात्प्रथमगो भौमो जन्मकाले यदा भवेत् ।
रक्ताक्षी रुधिरस्रावी रक्तवर्णो भवेन्नरः ॥ १ ॥

जिसके जन्मकालमें भौम चन्द्रमासे पहिले हो तो वह रक्तनेत्रोंवाला, रुधिर प्रवाही और रक्तवर्ण होता है ॥ १ ॥

चन्द्राद्द्वितीयगो भौमो जन्मकाले यदा भवेत् ।
धराधीशो भवेत्पुत्रः कृषिकर्ता न संशयः ॥ २ ॥

जिसके चन्द्रमासे दूसरेमें भौम हो तो वह भूमिके मालिक, पुत्रवाला और खेतीका करनेवाला होता है ॥ २ ॥

चन्द्रात्तृतीयगो भौमो जन्मकाले यदा भवेत् ।
चतुर्भ्रातृसमायुक्तः सुशीलः सर्वदा सुखी ॥ ३ ॥

जिसके चन्द्रमासे भौम तीसरे स्थित हो वह चार भाइयोंसे युक्त, सुन्दर शीलवाला और हमेशा सुखी होता है ॥ ३ ॥

चन्द्राच्चतुर्थगो भौमो जन्मकाले यदा भवेत् ।
सुखभङ्गी दरिद्री स्यात्पुंसः स्त्री म्रियते ध्रुवम् ॥ ४ ॥

जिसके भौम चन्द्रमासे चतुर्थ हो वह सुखसे हीन, दरिद्री और स्त्री शीघ्र मरै ऐसा होता है ॥ ४ ॥

चन्द्रात्पञ्चमगो भौमो जन्मकाले यदा भवेत् ।
पुत्रहीनो नरः स्त्रीणां लग्ने पतति निश्चितम् ॥ ५ ॥

जिसके भौम चन्द्रमासे पाँचवे हो वह पुत्रहीन मनुष्य होता है तथा स्त्रियोंके लग्नमें पडे तो भी पुत्रहीन जानना ॥ ५ ॥

चन्द्राच्च षष्ठगो भौमो जन्मकाले यदा भवेत्।
अधर्मे शत्रुता चैव सदा रोगेण पीडितः ॥ ६ ॥

जिसके भौम चन्द्रमासे छठे हो उसे अधर्म करनेमें शत्रुता रहती है और वह सदा रोग करके पीडित होता है ॥ ६ ॥

चन्द्रात्सप्तमगो भौमो जन्मकाले यदा भवेत्।
स्त्री कुशीला भवेत्तस्य सदा चाप्रियवादिनी ॥ ७ ॥

जिसके चन्द्रमासे सातवें भौम हो तो वह अप्रियवादिनी दुष्टा स्त्रीवाला होताहै॥७॥

चन्द्रादष्टमगो भौमो जन्मकाले यदा भवेत्।
जीवहन्ता महापापी शीलसत्याविवर्जितः ॥ ८ ॥

जिसके भौम चन्द्रमासे आठवें स्थित हो तो वह जीव मारनेवाला, बडा पापी और शील सत्यतासे रहित होता है ॥ ८ ॥

चन्द्रान्नवमगो भौमो जन्मकाले यदा भवेत्।
लक्ष्मीवांश्च भवेत्पुत्रो जराकाले न संशयः ॥ ९ ॥

जिसके चन्द्रमासे नवम भौम स्थित हो तो उसके बृद्धअवस्थामें पुत्र होता है तथा धनवान् होता है ॥ ९ ॥

चन्द्राद्दशमगो भौमो जन्मकाले यदा भवेत्।
तस्य द्वारेषु तिष्ठन्ति गजा अश्वा न संशयः ॥ १० ॥

जिसके भौम चन्द्रमासे दशम हो तो उसके दरवाजेपर गज (हाथी) घोडा बँधे रहते हैं ॥ १० ॥

चन्द्रादेकादशे भौमो जन्मकाले यदा भवेत्।
राजद्वारे प्रसिद्धः स्याद्यशोरूपसमन्वितः ॥ ११ ॥

जिसके भौम चन्द्रमासे ग्यारहवें हो तो वह राजद्वारमें प्रसिद्ध, यश और रूप करके युक्त होता है ॥ ११ ॥

चन्द्राद्द्वादशगो भौमो जन्मकाले यदा भवेत्।
मातुश्चासुखकारी च सदा कष्टप्रदायकः ॥ १२ ॥

जिसके जन्मकालमें भौम चन्द्रमासे बारहवें स्थानमें स्थित हो तो माताको असुखकारी तथा सदा कष्ट देनेवाला होता है ॥ १२ ॥ इति भौमभावाध्यायः ॥

अथ बुधभावाध्यायः ।

चन्द्रात्प्रथमगः सौम्यः सुखरूपं विना नरः ।
दुष्टभाषी मतिभ्रंशी स्थानभ्रष्टो दिनेदिने ॥ १ ॥

जिसके जन्मसमयमें बुध चन्द्रमासे प्रथम स्थित हो तो वह सुख तथा रूप करके हीन, दुष्टवचन बोलनेवाला, बुद्धिहीन तथा नष्ट स्थानवाला होता है ॥ १ ॥

चन्द्राद्द्वितीयगः सौम्यो धनधान्यसमाकुलः ।
गृहबन्धुधनप्राप्तिः शीतरोगैर्विनश्यति ॥ २ ॥

जिसके बुध चन्द्रमासे दूसरे स्थित हो वह धनधान्य गृह बंधुसे युक्त, धनकी प्राप्ति करनेवाला तथा जूडी रोगसे विनष्ट होनेवाला होता है ॥ २ ॥

चन्द्रात्सहजगः सौम्यः कुरुते चार्थसम्पदः ।
राज्यलाभो भवेत्तस्य महतां सङ्गमो ध्रुवम् ॥ ३ ॥

जिसके जन्मसमयमें बुध चन्द्रमासे तीसरे हो वह धन संपदासे युक्त, राज्यकी प्राप्ति करनेवाला तथा महात्माओंके संगमवाला होता है ॥ ३ ॥

चन्द्राच्चतुर्थगः सौम्यः सर्वदा सुखकारकः ।
मातृपक्षे महालाभः सुखं जीवति मानवः ॥ ४ ॥

जिसके बुध चन्द्रमासे चतुर्थ हो वह सदा सुखी माताके पक्षसे लाभवाला होता है ४॥

चन्द्रात्पञ्चमगः सौम्यो बुद्धिमांश्च विचक्षणः ।
रूपवांश्च महाकामी कुवाक्यं धारयेन्नरः ॥ ५ ॥

चन्द्रमासे पंचम बुध जिसके हो वह बुद्धिमान्, प्रवीण, रूपवान्, अधिक कामी, कुवचन बोलनेवाला होता है ॥ ५ ॥

चन्द्रात्षष्ठगतः सौम्यः कृपणः कातरो भवेत् ।
विवादे च महाभीरू रोमशो दीर्घलोचनः ॥ ६ ॥

जिसके बुध चन्द्रमासे छठे हो वह कृपण, भयानक, विवादमें बडा डरपोक, बहुरोमयुक्त और दीर्घनेत्रवाला होता है ॥ ६ ॥

चन्द्रात्सप्तमगः सौम्यः स्त्रीणां च वशगो नरः ।
कृपणश्च धनाढ्यश्च बह्वायुश्च भविष्यति ॥ ७ ॥

जिसके बुध चन्द्रमासे सातवें हो वह स्त्रियोंके वश रहनेवाला, कृपण, धनवान् और ज्यादा उमरवाला होता है ॥ ७ ॥

चन्द्रादष्टमगे सौम्ये देहे शीतो भविष्यति ।
राजमध्ये प्रसिद्धश्च शत्रूणां च भयंकरः ॥ ८ ॥

जिसके बुध चन्द्रमासे अष्टम हो वह देहमें शीतवाला, राजमध्यमें प्रसिद्ध, शत्रुओंको भयंकर होता है ॥ ८ ॥

चन्द्रान्नवमगः सौम्यः स्वधर्मस्य विरोधकः ।
अन्यधर्मरतः पुंसो विरोधी दारुणो भवेत् ॥ ९ ॥

जिसके बुध चन्द्रमासे नवम स्थित हो वह अपने धर्मका विरोधी, अन्य धर्ममें लीन, पुरुषोंका विरोधी और दारुण (दुष्ट) होता है ॥ ९ ॥

चन्द्राद्दशमगः सौम्यो राजयोगी नरः सदा ।
कर्मराशौ यदा चन्द्रः कुटुम्बे नायको भवेत् ॥ १० ॥

जिसके बुध चन्द्रमासे दशम स्थित हो तो उसे राजयोगी जानना और चन्द्रमा यदि दशमराशि (भाव) में स्थित हो तो कुटुम्बमें नायक होता है ॥ १० ॥

चन्द्रादेकादशे सौम्यो लाभकारी पदेपदे ।
वर्षे एकादशे पुंसः पाणिग्राहो भविष्यति ॥ ११ ॥

जिसके बुध चन्द्रमासे लाभ भावमें हो वह पदपदमें लाभ करनेवाला होता है तथा उसका ग्यारहवें वर्षमें विवाह हो जाता है ॥ ११ ॥

चन्द्राद्द्वादशगः सौम्यः सर्वदा कृपणो भवेत् ।
तत्सुतस्य जयो नास्ति पराजयं लभेत सः ॥ १२ ॥

जिसके बुध चन्द्रमासे बारहवें हो वह सदा कृपण रहता है और उसके पुत्रकी जय नहीं, परंतु पराजय होती है ॥ १२ ॥ इति बुधभावाध्यायः ॥

अथ गुरुभावाध्यायः ।

चन्द्रात्प्रथमगो जीवो जीवयोग्यो भवेन्नरः ।
व्याधिना रहितः शूरो निर्धनो न कदाचन ॥ १ ॥

जिसके जन्मसमयमें बृहस्पति चन्द्रमासे प्रथम स्थित हो वह जीवयोग्य, व्याधिरहित, शूर (वीर), धनवान् होता है ॥ १ ॥

चन्द्राद्द्वितीयगो जीवो राजमान्यः शतायुषी।
अत्युग्रश्च प्रतापी च धर्मिष्ठः पापवर्जितः॥ २॥

जिसके बृहस्पति चन्द्रमासे दूसरे हो वह राजासे मान पानेवाला, सौ वर्षकी उमरवाला, अधिक क्रूर प्रतापवाला, धर्मवान्, पापसे रहित होता है॥ २॥

चन्द्रात्तृतीयगे जीवे नारीणां वल्लभो भवेत्।
धनवृद्धिः पितुर्गेहे वर्षे सप्तदशे तथा॥ ३॥

जिसके बृहस्पति चन्द्रमासे तीसरे हो वह स्त्रियोंका प्यारा, पिताके घरसे सत्रह वर्षमें धनकी वृद्धिवाला होता है॥ ३॥

चन्द्राच्चतुर्थगो जीवः सुखैश्चैव विवर्जितः।
मातृपक्षे महाकष्टी परेषां गृहकर्मकृत्॥ ४॥

जिसके बृहस्पति चन्द्रमासे चतुर्थ स्थित हो वह सुख करके हीन, माताके पक्षमें बडा कष्टी, दूसरोंके घर काम करनेवाला होता है॥ ४॥

चन्द्रात्पंचमगो जीवो दिव्यदृष्टिर्भवेन्नरः।
तेजस्वी पुत्रदा नारी ह्यत्युग्रश्च महाधनी॥ ५॥

जिसके बृहस्पति चन्द्रमासे पंचम स्थित हो वह दिव्यदृष्टिवाला, तेजवान्, पुत्रवती स्त्रीवाला, अत्यंतक्रूर और महाधनी होता है॥ ५॥

चन्द्राच्च षष्ठगो जीवो ह्युदासी गृहवर्जितः।
आयुर्बाह्यं भवेत्पुंसां भिक्षाभोक्ता व्यवस्थितः॥ ६॥

जिसके बृहस्पति चन्द्रमासे छठे हो वह उदासी, गृहसे हीन, विदेशमें आयुको बितानेवाला, भिक्षासे भोजन करनेवाला होता है॥ ६॥

चन्द्रात्सप्तमगो जीवो बहुजीवी व्ययं विना।
स्थूलदेही क्लीबपाण्डुर्गृहमध्ये च नायकः॥ ७॥

जिसके बृहस्पति चन्द्रमासे सातवें स्थित हो वह अधिक उमरवाला, व्ययरहित, स्थूल (मोटी) देहवाला, नपुंसक, पाण्डुवाला और घरके मध्यमें नायक होता है॥ ७॥

चन्द्रादष्टमगो जीवो देहरोगी सदा नरः।
सुतातोऽपि महाक्लेशी सुखं स्वप्ने न दृश्यते॥ ८॥

जिसके बृहस्पति चन्द्रमासे आठवें स्थित हो वह सदा देहरोगी, अच्छे पितावाला होनेपरभी महाक्लेशवाला, स्वप्नमें भी सुख न पानेवाला होता है॥ ८॥

चन्द्रान्नवमगो जीवो धर्मिष्ठो धनपूरितः ।
सुमार्गे सुगतश्चैव देवगुर्वोश्च सेवकः ॥ ९ ॥

जिसके बृहस्पति चन्द्रमासे नवम स्थित हो वह धर्मवान्, धन करके युक्त, अच्छे मार्गमें चलनेवाला, देवता गुरुका सेवक होता है ॥ ९ ॥

चन्द्राद्दशमगो जीवो जन्मकाले यदा भवेत् ।
पुत्रदारपरित्यागी तपस्वी च भवेन्नरः ॥ १० ॥

जिसके बृहस्पति चन्द्रमासे दशम हो वह पुत्र स्त्रीको त्याग करके तपस्वी होता है ॥ १० ॥

चन्द्रादेकादशे जीवो जन्मकाले यदा भवेत् ।
अश्वारूढो भवेत्पुत्रो राजतुल्यो भवेन्नरः ॥ ११ ॥

जिसके बृहस्पति चन्द्रमासे ग्यारहवें हो उसका पुत्र घोडेपर सवार होकर चलता है और राजाके समान वह मनुष्य होता है ॥ ११ ॥

चन्द्राद्द्वादशगो जीवो जन्मकाले यदा भवेत् ।
स्यात्कुटुंबविरोधी च सुखं शत्रोर्दशाग्रहे ॥ १२ ॥

जिसके बृहस्पति चन्द्रमासे बारहवें स्थित हो वह कुटुबंसे विरोध करनेवाला होता है तथा लग्नसे छठे स्थानके स्वामीकी दशामें सुख होता है ॥ १२ ॥ इति गुरुभावाध्यायः ॥

अथ शुक्रभावाध्यायः ।

चन्द्रात्तु प्रथमः शुक्रो जन्मकाले यदा भवेत् ।
जले मृत्युर्भवेत्तस्य सन्निपातो हि हिंसया ॥ १ ॥

जिसके जन्मसमयमें शुक्र चन्द्रमासे प्रथम स्थित हो उसकी जलमें मृत्यु होती है सन्निपात हिंसा करके ॥ १ ॥

चन्द्राद्द्वितीयगः शुक्रो जन्मकाले यदा भवेत् ।
महाधनी महाज्ञानी राजतुल्यो न संशयः ॥ २ ॥

जिसके शुक्र चन्द्रमासे दूसरे हो वह महाधनवान्, महाज्ञानवान्, राजाके समान निश्चय होता है ॥ २ ॥

चन्द्रात्सहजगः शुक्रो जन्मकाले यदा भवेत् ।
धर्मिष्ठो बुद्धिमांश्चैव म्लेच्छतो लाभदायकः ॥ ३ ॥

जिसके शुक्र चन्द्रमासे तीसरे हो वह धर्मवान्, बुद्धिमान्, म्लेच्छसे लाभवाला होता है ॥ ३ ॥

चन्द्राच्चतुर्थगः शुक्रो जन्मकाले यदा भवेत् ।
कफाधिको महाक्षीणो वार्द्धक्ये धनवर्जितः ॥ ४ ॥

जिसके शुक्र चन्द्रमासे तीसरे हो वह अधिक कफवाला, दुर्बल, वृद्धावस्थामें धन करके हीन होता है ॥ ४ ॥

चन्द्रात्पञ्चमगः शुक्रो जन्मकाले यदा भवेत् ।
बहुकन्या भविष्यन्ति धनाढ्यः कीर्त्तिवर्जितः ॥ ५ ॥

जिसके शुक्र चन्द्रमासे पाँचवें स्थित हो वह बहुत कन्याओंवाला, धन करके युक्त और यशसे वर्जित होता है ॥ ५ ॥

चन्द्राच्च षष्ठगः शुक्रो जन्मकाले यदा भवेत् ।
दुर्व्ययाद्भयकारी च संग्रामे च पराजितः ॥ ६ ॥

जिसके शुक्र चन्द्रमासे छठे स्थित हो वह दुष्ट हानिसे भय पानेवाला और युद्धमें पराजय पानेवाला होता है ॥ ६ ॥

चन्द्रात्सप्तमगः शुक्रो जन्मकाले यदा भवेत् ।
पुरुषार्थहीनोऽकुशलः शङ्कितश्च पदे पदे ॥ ७ ॥

जिसके शुक्र चन्द्रमासे सप्तम स्थित हो वह पुरुषार्थसे हीन, अप्रवीण, जगह जगहमें शंकित होता है ॥ ७ ॥

चन्द्रादष्टमगः शुक्रो जन्मकाले यदा भवेत् ।
प्रसिद्धो हि महायोद्धा दाता भोक्ता महाधनी ॥ ८ ॥

जिसके शुक्र चन्द्रमासे अष्टम स्थित हो वह प्रसिद्ध, बडा योद्धा, दानी, भोगी, बडा धनी होता है ॥ ८ ॥

चन्द्रान्नवमगः शुक्रो जन्मकाले यदा भवेत् ।
बहुभ्राता तथा मित्रभगिनीबहुलो भवेत् ॥ ९ ॥

जिसके शुक्र चन्द्रमासे नवम स्थित हो वह बहुत भाइयों मित्रों तथा भगिनियोंवाला होता है ॥ ९ ॥

चन्द्राच्च दशमे शुक्रो जन्मकाले यदा भवेत् ।
मातापित्रोः सुखप्राप्तिर्जीवितं तु बृहद्भवेत् ॥ १० ॥

जिसके शुक्र चन्द्रमासे दशम हो वह माता पिताके सुख प्राप्तिवाला, बहुत जीवितवाला होता है ॥ १० ॥

चन्द्रादेकादशे शुक्रो जन्मकाले यदा भवेत् ।
बह्वायुश्च भवेत्पुंसो रिपुरोगविवर्जितः ॥ ११ ॥

जिसके शुक्र चन्द्रमासे ग्यारहवें हो वह बहुत उमरवाला, शत्रु और रोगकरके वर्जित होता है ॥ ११ ॥

चन्द्राद्द्वादशगः शुक्रो जन्मकाले यदा भवेत् ।
परदाररतो नित्यं लंपटो ज्ञानहीनकः ॥ १२ ॥

जिसके शुक्र चन्द्रमासे बारहवें स्थित हो वह पराई स्त्रीमें रत रहनेवाला, लंपट और ज्ञानसे हीन होता है ॥ १२ ॥ इति शुक्रभावाध्यायः ॥

अथ शनिभावाध्यायः ।

चन्द्राच्च प्रथमे सौरिर्जन्मकाले यदा भवेत् ।
प्राणनाशोऽर्थनाशश्च बन्धुनाशस्तथापरे ॥ १ ॥

जिसके जन्मसमयमें शनि चन्द्रमासे प्रथम स्थित हो वह प्राणका नाशवाला, धनका नाश करनेवाला तथा बंधुओंके नाश करनेवाला होता है ॥ १ ॥

चन्द्राद्द्वितीयगो मन्दो जन्मकाले यदा भवेत् ।
मातुश्च कष्टकारी च अजाक्षीरेण जीवति ॥ २ ॥

जिसके शनि चन्द्रमासे दूसरे हो वह माताके कष्टवाला तथा बकरीके दूधसे जीवन प्राप्ति होनेवाला होता है ॥ २ ॥

चन्द्रात्सहजगः सौरिर्जन्मकाले यदा भवेत् ।
बहुकन्यो भवेत्पुत्र उत्पद्य म्रियते ध्रुवम् ॥ ३ ॥

जिसके शनि चन्द्रमासे तीसरे हो उसके बहुत कन्या हों तथा पुत्र उत्पन्न होकर शीघ्र मरजावे ॥ ३ ॥

चन्द्राच्चतुर्थगो नूनं शनिर्जन्मानि संभवेत् ।
महापौरुषकारी च शत्रुहन्ता न संशयः ॥ ४ ॥

जिसके शनि चन्द्रमासे चतुर्थ हो वह बडा पौरुषी और शत्रुओंका मारनेवाला होता है ॥ ४ ॥

चन्द्रात्पञ्चमगः सौरिर्जन्मकाले यदा भवेत् ।
स्त्री स्याच्छ्यामलवर्णा च ह्यथवा प्रियवादिनी ॥ ५ ॥

जिसके शनि चन्द्रमासे पंचम हो वह श्यामवर्ण अथवा प्रियवादिनी स्त्रीवाला होता है ॥ ५ ॥

रविजः षष्ठगश्चन्द्राज्जन्मकाले यदा भवेत् ।
महाक्लेशी च कष्टी च आयुर्हीनो भवेन्नरः ॥ ६ ॥

जिसके शनि चन्द्रमासे षष्ठ स्थित हो वह अधिक क्लेशवाला, दुःखी, हीन-आयुवाला होता है ॥ ६ ॥

चन्द्राच्च सप्तमे स्थाने यदा च रविनन्दनः ।
महाधर्मी च दाता च स्त्रीणां बहुकरग्रहः ॥ ७ ॥

जिसके शनि चन्द्रमासे सप्तम स्थित हो वह बडा धर्मवान्, दानी और बहुत स्त्रियोंका विवाह करनेवाला अर्थात् कई विवाह हों ऐसा होता है ॥ ७ ॥

रविजो ह्यष्टमे स्थाने चन्द्रतो जन्मसंभवः ।
पितुश्च कष्टकारी च बहुदाने शुभं भवेत् ॥ ८ ॥

जिसके शनि चन्द्रमासे अष्टम स्थित हो वह पिताका कष्टकारी होता है और बहुत दान करनेसे उसे शुभ होता है ॥ ८ ॥

चन्द्रान्नवमगः सौरिर्जन्मकाले यदा भवेत् ।
यदा मुग्धदशाप्राप्तिर्धनहानिर्भविष्यति ॥ ९ ॥

जिसके शनि चन्द्रमासे नवम होवे तो मुग्धदशामें धनकी हानि होती है ॥ ९ ॥

चन्द्राद्दशमगः सौरिर्जन्मकाले यदा भवेत् ।
नृपतुल्यो भवेद्देही कृपणो धनपूरितः ॥ १० ॥

जिसके शनि चन्द्रमासे दशम स्थित हो वह राजाके समान, कृपण और धन करके युक्त होता है ॥ १० ॥

चन्द्रादेकादशे सौरिर्जन्मकाले यदा भवेत् ।
देहक्लेशी महाकष्टी ह्यधर्मी च न संशयः ॥ ११ ॥

जिसके शनि चन्द्रमासे ग्यारहवें हो वह देहका क्लेश पानेवाला, अधिक दुःखी और अधर्मी होता है ॥ ११ ॥

द्वादशे भवने सौरिश्चन्द्राच्च पतते यदि ।
निर्धनी भिक्षुकश्चैव धर्मेणैव विवर्जितः ॥ १२ ॥

जिसके शनि चन्द्रमासे बारहवें हो वह निर्धन, भिक्षुक और धर्मसे रहित होता है ॥ १२ ॥ इति शनिभावाध्यायः ॥

अथराहुभावाध्यायः।

जन्मकर्मे शुभे धर्मे चन्द्राद्यदि पतेत्तमः।
जन्मकाले भूपतिश्च वृद्धकाले महाधनी ॥ १ ॥

जिसके जन्मसमयमें राहु चन्द्रमासे प्रथम, दशम, तृतीय, नवम इन स्थानोंमें स्थित हो वह राजा होता है और वृद्धावस्थामें अधिक धनी होता है ॥ १ ॥

षष्ठे च द्वादशे राहुश्चन्द्राच्च पतितो यदि।
स राजा राजमन्त्री च धनधान्यसमाकुलः ॥ २ ॥

जिसके राहु चन्द्रमासे छठे बारहवें स्थित हो वह राजा अथवा राजाका मन्त्री धन-धान्य करके युक्त होता है ॥ २ ॥

चतुर्थे सप्तमे राहुश्चन्द्राच्च यदि जायते।
माता पिता महाकष्टी सदा ह्यसुखदायकः ॥ ३ ॥

जिसके राहु चन्द्रमासे चौथे, सातवें स्थित हो तो उसके माता पिता दुःखी और वह सदा सुखहीन मनुष्य होता है ॥ ३ ॥

धन एकादशे स्थाने चन्द्राद्राहुः प्रजायते।
धनमानावसंयुक्तः[1] सुखं स्वप्ने न दृश्यते ॥ ४ ॥

जिसका राहु चन्द्रमासे दूसरे ग्यारहवें स्थित हो वह धन और मान करके हीन तथा स्वप्नमें भी सुख न पानेवाला होता है ॥ ४ ॥

पञ्चमे च यदा राहुश्चन्द्राज्जलजसंभवम्।
निधनं चापि सिद्धं च आपदश्च पदेपदे ॥ ५ ॥

जिसके राहु चन्द्रमासे पंचम स्थित होवे तो उसको जलसे मृत्यु कहे और पद पदमें आपदा भोगनेवाला होता है ॥ ५ ॥ इति राहुभावफलम् ॥

अथ राश्यायुः।

अश्विनीभरणीकृत्तिकापादे मेषराशिः-भौमक्षेत्रे जन्मतो नवपादफलम्। प्रथमे राजवन्त १-धनवन्त २-विद्यावन्त ३-देवगुरुभक्त ४-पंचमे चोर ५-कालभाषाहीन ६-सप्तमे योगीन्द्र ७-निर्धन ८-शुभ-

---

१ धनमानवसंयुक्तः इति पाठान्तरम्।

लक्षण ९ । मास १ कष्ट अल्पमृत्युः वर्ष १ वर्ष १३ जलघात-वर्ष १८ घातवर्ष ६४ अंगरोगवर्ष ५० चोरलोहपीडा उपघात यदा शुभ-ग्रहनिरीक्षितो भवति तदा जीवति वर्ष ७५ मास २ घटी १५ पल १५ । मृत्युः कार्तिकमासे तिथि चौथ वार मंगल भरणीनक्षत्रे देहं त्यजति । इति मेषराशिफलम् ॥ १ ॥

कृत्तिकायास्त्रयः पादा रोहिणीमृगशिरोऽर्द्धं वृषराशिः—शुक्रक्षेत्रे जन्मतो नवपादफलम् । प्रथमे यशवन्त १ सुतवन्त २ रणवन्त ३ शुभलक्षण ४ विद्यावन्त ५ सौभाग्यवन्त ६ कुलमण्डन ७ धनधान्य समर्थ ८ परद्वारचोर ९ । वर्ष ३।६।८।३३।४६।५२।६३ अग्निलोह-साण्डसर्प्पकष्टदेवदोषघाता एते अल्पमृत्यवः । यदा व्यतिक्रामन्ति तदा वर्ष ८५ मास ६ दिन ७ माघमासे शुक्लपक्षे तिथौ ९ शुक्रदिने रोहिणीनक्षत्रे अर्धरात्रे देहं त्यजति । इति वृषराशि फलम् ॥ २ ॥

विलासिनीकामपरं सदैव विचित्रवाक्यं द्विजदेवभक्तम् ॥ ८ ॥
धनुर्धरे वित्तगते मनुष्यो धनं लभेत्स्थैर्यविधानजातम् ।
चतुष्पदाढ्यं विविधं यशस्वी रसोद्भवं धर्मविधानलब्धम् ॥ ९ ॥

जिसके तुलाराशि धनभावमें स्थित होय वह बहुत पुण्यसे उत्पन्न, अधिक धनको तथा पाषाण करके उत्पन्न धनको, मृत्तिका पात्रकरके उत्पन्न धनको, खेतीकरके उत्पन्न धनको तथा कर्मसे उत्पन्न धनको प्राप्त होता है। जिसके वृश्चिकराशि धन-भावमें स्थित होय वह सदा स्वधर्मशीलवान्, स्त्रीभोगी, विचित्र वाणी बोलनेवाला और ब्राह्मण तथा देवताओंका भक्त होता है। जिसके धनराशि धनभावमें स्थित होय वह मनुष्य धैर्यकरके धन प्राप्त करता है. चतुष्पदकरके युक्त, अनेक प्रकारके यशसहित, रसोंकरके उत्पन्न धर्मविधि करके धन लब्ध (लाभ) करता है ॥ ७-९ ॥

मृगे धनस्थे लभते मनुष्यो धनं प्रपञ्चैर्विविधैरुपायैः ।
सेवासमुत्थं च सदा नृपाणां कृषिक्रियाभिश्च विदेशसङ्गात् ॥ १० ॥
घटे धनस्थे लभते मनुष्यो धनं प्रभूतं फलपुष्पजातम् ।
जनोद्भवं साधुजनस्थभोज्यं महाजनोत्थं च परोपकारी ॥ ११ ॥
मत्स्ये धनस्थे लभते मनुष्यो धनं प्रभूतैर्नियमोपवासैः ।
विद्याप्रभावान्निधिसङ्गमाच्च मातापितृभ्यां समुपार्जितं च ॥ १२ ॥

जिसके मकरराशि धनभावमें स्थित होय वह मनुष्य अनेक प्रपंच तथा उपायोंके द्वारा धनको लाभ करता है. राजाओंकी सेवामें तत्पर, खेतीकी क्रिया और विदेशसं-गसे धनवान् होता है । जिसके धनभावमें कुंभलग्न स्थित होय वह मनुष्य फल पुष्प-करके उत्पन्न हुए धन करके युक्त होता है और मनुष्यों तथा महाजनोंसे उत्पन्न

साधुजनके भोज्यको प्राप्त होता है और परोपकारी होता है। जिसके मीनराशि धनभावमें स्थित होय वह नियम और व्रत करके धनको लाभ करता है. विद्याके प्रभाव करके धनके संगमवाला होता है और मातापिताके उपार्जित कियेहुये धन करके धनवान् होता है ॥ १०-१२ ॥ इति धनभावस्थराशिफलम् ॥

अथ तृतीयभावस्थराशिफलम् ।

तृतीयसंस्थे प्रथमे च राशौ मित्रं द्विजातिश्च भवेन्मनुष्यः ।
परोपकारैः श्रवणैः शुचिश्च प्रभूतविद्यो नृपपूजिताङ्गः ॥ १ ॥
वृषे तृतीये लभते मनुष्यो मित्रं नरेन्द्रं प्रचुरप्रतापम् ।
सुवित्तदं भूरियशोनिधानं सूरिं कविं ब्राह्मणरक्तचित्तम् ॥ २ ॥
तृतीयसंस्थे मिथुने च लग्ने करोति मर्त्यं वरयानयुक्तम् ।
स्त्रीवल्लभं सत्यमुदारचेष्टं कुलाधिकं पूज्यतमं नृपाणाम् ॥ ३ ॥

जिसके मेषराशि तीसरे भावमें स्थित होय वह ब्राह्मण मित्रवाला, परोपकार करके तथा श्रवणकरके पवित्र, अधिक विद्यावाला और राजपूजित होता है। जिसके तीसरे भावमें वृषराशि स्थित होय वह मित्र राजाको पानेवाला, अधिक प्रतापवाला, अधिक वित्त (धन) दायक, अधिक यशस्वी, पंडित, कवि और ब्राह्मणमें रत चित्तवाला होता है। जिसके तीसरे भावमें मिथुन राशि स्थित होय वह वर (श्रेष्ठ) सवारी करके युक्त, स्त्रियोंका प्यारा, सत्य बोलनेवाला, उदार चेष्टावाला, अधिक कुलवाला और राजाओंका पूज्यतम होता है ॥ १-३ ॥

कुलीरराशौ सहजं प्रयाते मित्रं लभेद्वैश्यगुरुप्रवेशे ।
कृषीवलं धर्मकथानुरक्तं सदा सुशीलं मुदसंमतं च ॥ ४ ॥
सिंहे तृतीये लभते मनुष्यः शूरं कुमित्रं वरवित्तलुब्धम् ।
वधात्मकं पापकथानुरक्तं प्रचण्डवाक्यं न हि गर्वितं च ॥ ५ ॥

जिसके कर्कराशि तृतीयभावमें स्थित होय वह वैश्य मित्रवाला, खेतीकरनेवाला धर्मकथामें रत रहनेवाला, सदा सुशीलवान् और हर्ष करके युक्त होता है। जिसके सिंहराशि तीसरे भावमें स्थित होय वह शूर, दुष्ट मित्रवाला, अधिक धनका लोभी, वधिक, पापवार्तामें रत, प्रचंड वाणीवाला और गर्वकरके रहित होता है ॥ ४ ॥ ५ ॥

तृतीयभावे स्थितलग्नकन्या शस्त्रानुरक्तं मनुजं सुशीलम् ।
नानासुहृत्संस्तुतकल्पकोपं प्रियद्विजं देवगुरुप्रभक्तम् ॥ ६ ॥

तृतीयसंस्थे तु तुलाभिधाने मैत्री भवेत्पापपरैर्मनुष्यैः।
लौल्यात्मको लौल्यकथानुरक्तः सार्द्धं मनुष्यस्य सुताद्धमुक्ते॥७॥
अलौ तृतीये च भवेन्मनुष्यो मन्त्री सदा पापजनैर्दरिद्रैः।
कृतघ्नघातैः कलहानुरक्तैर्व्यपेतलक्षैर्जनताविरुद्धैः॥८॥
चापे तृतीये लभते मनुष्यो मन्त्री सुशूरो नृपसेवकश्च।
चित्तैः स्वकैर्धर्मपदैः प्रसन्नैः कृपानुरक्तै रणकोविदैश्च॥९॥

जिसके कन्याराशि तीसरे भावमें स्थित होवे वह शस्त्रोंमें रत, सुंदर, शीलवान्, बहुत मित्रोंवाला, अधिक क्रोधवान्, ब्राह्मणका प्यार करनेवाला, देवता और गुरुका भक्त होता है। जिसके तुलाराशि तीसरे भावमें स्थित हो वह दुष्टजनोंसे मित्रतावाला विषयी और विषयके वार्तामें रत रहनेवाला, थोडी संतानवाला और मनुष्योंकरके संयुक्त होता है। जिसके वृश्चिकराशि तीसरे भावमें पडे वह दुष्ट और दरिद्री जनोंकी मित्रतावाला, हिंसा करनेवाला, कलहमें अनुरक्त, व्यपेतलक्ष और जनविरुद्धताकरके संयुक्त होता है। जिसके तीसरे भावमें धनु राशी होवे वह योद्धाजनोंकी मित्रतावाला, राजाका सेवक स्वधर्मकरके प्रसन्नचित्तवाला, दयावान् और रणमें चतुर होता है॥६-९॥

नक्रस्तृतीये च नरस्य यस्य करोति सौम्यं सततं सुताद्यम्।
नित्यं सुहृद्देवगुरुप्रसक्तं महाधनं पण्डितमप्रमेयम्॥१०॥
कुम्भस्तृतीये लभते मनुष्यो मैत्री व्रतज्ञैर्बहुकीर्तियुक्तैः।
क्षमाधिकैः सत्यपरैः सुशीलैर्गीतप्रियैर्गोपपरैः खलैश्च॥११॥
तृतीयभावे स्थितमीनराशौ नरं प्रसूतं बहुवित्तयुक्तम्।
पुत्रान्वितं पुण्यधनैरुपेतं प्रियातिथिं सर्वजनाभिरामम्॥१२॥

जिसके मकरराशि तीसरे भावमें स्थित हो वह सदा सुतआदिकरके युक्त, सुशील, सदा मित्र, देवता और गुरुकी भक्तिमें तत्पर बहुत धनवान् और पंडित होता है। जिसके तीसरे भावमें कुंभ राशि पडी हो वह नियमको जाननेवाला और बहुत कीर्त्तिमान् मनुष्योंकी मित्रतावाला, अधिक क्षमावान्, सत्यवादी, सुंदरशीलवाला, गान विद्यासे प्यार करनेवाला, ग्रामाधिकारी और खल होता है। जिसके मीनराशि तीसरे भावमें स्थित हो वह बहुत धनकरके संयुक्त, पुत्रसहित तथा पुण्य धनको संग्रह करनेवाला, प्रिय अतिथिवाला और सर्वजनोंका प्यारा होता है॥१०-१२॥

इति सहजभावस्थराशिफलम्॥

अथ सुहृद्भावस्थराशिफलम् ।

मेषे सुखस्थे लभते सुखं च चतुष्पदेभ्योऽथ विलासिनीभ्याम् ।
भोगैर्विचित्रैः प्रचुरान्नपानैः पराक्रमोपार्जितमर्दनैश्च ॥ १ ॥
वृषे सुखस्थे लभते सुखानि नरोऽतिमान्यैर्विविधैश्च मान्यैः ।
शौर्येण भूपालनिषेवणेन प्रियोपचारैर्नियमैर्व्रतैश्च ॥ २ ॥
तृतीयराशौ सुखगे सुखानि लभेन्मनुष्यः प्रमदाकृतानि ।
जलावगाहैर्वनसेवया च प्रभूतपुष्पाम्बरसेवनेन ॥ ३ ॥

जिसके जन्मसमयमें मेषराशि चतुर्थ भावमें पडी होय वह चौपायों और स्त्रियों करके सुखको पानेवाला और पराक्रम करके उपार्जित और संग्रह किये हुए प्रचुर अन्नपान और विचित्र भोगोंवाला होता है । जिसके वृषराशी चतुर्थभावमें स्थित होवे वह मान्य, पूज्यता करके और पराक्रम करके, राजाकी सेवा करके, उत्तम पूजा करके, नियम और व्रत करके सुखको प्राप्त होता है, जिसके मिथुनराशि चतुर्थभावमें स्थित हो वह स्त्रीकृत और जलमें गोता लगानेसे, वनव्यापार करके और बहुत पुष्प और वस्त्रके व्यापार करके सुखको पाता है ॥ १–३ ॥

कुलीरराशौ च यदा सुखस्थे नरं सुरूपं सुभगं सुशीलम् ।
स्त्रीसंमतं सर्वगुणैः समेतं विद्याविनीतं जनवल्लभं च ॥ ४ ॥
सिंहे सुखस्थे न सुखं मनुष्यः प्राप्नोति जातु प्रचुरप्रकोपात् ।
कन्याप्रसूतिं च दरिद्रसङ्गान्नरो भवेच्छीलविवर्जितश्च ॥ ५ ॥
कुमित्रसङ्गो धनसंश्रयाच्च कन्यागृहे बन्धुगृहे मनुष्यः ।
पैशुन्यसंघाल्लभतेऽसुखानि चौर्येण शुद्धेन विमोहनेन ॥ ६ ॥

जिसके कर्कराशि चतुर्थ भावमें स्थित हो वह सुरूपवान्, मनोहर, सुंदर, शीलवाला, स्त्रीके संमतवाला, सर्व गुणोंकरके संयुक्त. विद्याविनीत और मनुष्योंका प्यारा होता है । जिसके सिंहराशि चतुर्थ भावमें स्थित हो वह कभी भी क्रोधके कारण सुखको नहीं प्राप्त होता है और कन्याओंकी संतानवाला और दरिद्रताके कारण शीलरहित होता है । जिसके चतुर्थ भावमें कन्याराशि स्थित होवे वह धनके कारण दुष्टमित्रवाला पैशुन्यसंघ अर्थात् छली, परपंचियाके संघसे चोरीसे पवित्रता और विमोहनसे असुखको प्राप्त होता है ॥ ४–६ ॥

तुले सुखस्थे च नरस्य यस्य करोति सौम्यं शुभकर्मदक्षम् ।
विद्याविनीतं सततं सुखाढ्यं प्रसन्नचित्तं विभवैः समेतम् ॥ ७ ॥

अलौ चतुर्थे च यदा समेतं नरं सुतीक्ष्णं परभीतचित्तम् ।
प्रभूतसेवं गतवीर्यदर्पं वरैः सुदक्षं मतिभृद्विहीनम् ॥ ८ ॥
चापे सुखस्थे लभते मनुष्यः सुखं सदा सङ्गरसेवनेन ।
तत्कीर्तनेनैव हयैर्विचित्रैः सेवासुखं स्वेन निबन्धनेन ॥ ९ ॥

जिसके तुलाराशि चतुर्थ भावमें स्थित हो वह सरलस्वभाव, शुभकर्ममें दक्ष, विद्याविनीत, सदा सुख करके युक्त, प्रसन्नचित्त और विभवसंयुक्त होता है । जिसके चतुर्थ भावमें वृश्चिकराशि होवे वह बडा तीक्ष्ण और डरपोक, बहुत सेवावाला, पराक्रम मान करके हीन, बडा दक्ष और बुद्धिहीन होता है। जिसके धनुराशि चतुर्थभावमें स्थित होवे वह संगरसेवा और उसके कीर्तन करके उत्तम घोडोंके व्यापार करके और अपने निबंधन करके सदा सुखको प्राप्त होता है ॥ ७-९ ॥

मृगे सुखस्थे सुखभाङ्मनुष्यः सदा भवेत्तोयनिषेवणेन ।
उद्यानवापीतटसङ्गमेन मित्रोपचारैः सुरतप्रधानैः ॥ १० ॥
घटे सुखस्थे प्रमदाभिधानात्प्राप्नोति सौख्यं विविधं मनुष्यः ।
मिष्टान्नपानैः फलशाकपत्रैर्विदग्धवाक्यैश्चोत्साहकारैः ॥ ११ ॥
मीने सुखस्थे तु सुखं मनुष्यः प्राप्नोति सौख्यं जलसंश्रयेण ।
शनैश्चरो देवसमुद्भवैश्च स्थाने सुवस्त्रैः सुधनैर्विचित्रैः ॥ १२ ॥

जिसके मकरराशि चतुर्थ भावमें पडी होय वह सदा जलसेवन करके, उद्यान बावलीके तटके संगमकरके, मित्रसेवा करके और श्रेष्ठ मनुष्योंके सुखका भोगनेवाला होता है। जिसके कुंभराशि चतुर्थ भावमें स्थित हो वह स्त्रीके यश कीर्तन करके अनेक सुखोंको पाता है और मिष्टान्न पान करके, फल-शाक-पत्र करके, चतुरताकी वार्ता करके और उत्साह करके सुखोंको भोगता है । जिसके मीन राशि चतुर्थ भावमें स्थित हो वह जलके संश्रय करके सौख्यको पाता है और शनैश्चरदेवसे उत्पन्न विचित्र सुंदरवस्त्रों और धनसे संयुक्त होता है ॥ १०-१२ ॥ इति सुखभावस्थराशिफलम् ॥

अथ पंचमभावस्थराशिफलम् ।

मेषे सुतस्थे लभते मनुष्यः प्रियेण पुत्रान्वितचेतसा च ।
सुरात्सुखानीह कृतानि चान्यात्पापानुरक्ताकुलचित्तयुक्ताः ॥ १ ॥
वृषे सुतस्थे लभते मनुष्यः प्राप्नोति कन्यां सुभगां सुरूपाम् ।
अपत्यहीनां बहुकान्तियुक्तां सदानुरक्तां निजभर्तृधर्मे ॥ २ ॥

तृतीयराशौ सुतगे मनुष्यः प्राप्नोत्यपत्यानि मनःसुखानि।
सुशीलयुक्तानि गुणाधिकानि प्रीत्या समेतानि बलाधिकानि ॥३॥
कर्के सुतस्थे जनयेन्मनुष्यः पुत्रान्प्रसिद्धान्सुतलाभतश्च।
विस्तीर्णकीर्तींश्च महानुभावान्धनेन युक्तान्विनयेन युक्तान् ॥४॥

जिसके जन्मसमय मेषराशि पंचमभावमें स्थित हो उसको प्रियपुत्र युक्त चित्तवाले देवताओं तथा दूसरों करके सुख पानेवाले, पापी और व्याकुल चित्तवाले पुत्र प्राप्त होते हैं। जिसके वृषराशि पंचमभावमें स्थित हो वह मनोहर सुंदररूपवाली संतानहीन बहुत शोभा करके युक्त और पतिधर्ममें तत्पर कन्यावाला होता है। जिसके मिथुनराशि पंचमभावमें स्थित हो वह मनोवाञ्छित सुखवाली सुन्दरशील करके युक्त, अधिक गुणवान्, प्रीतियुक्त और अधिक बलवान् संतानको पानेवाला होता है। जिसके कर्कराशि पंचमभावमें जन्मसमय पडे वह प्रसिद्ध, सुतसे लाभवाले, विख्यात कीर्तिवाले, बहुत अनुभववाले, धन और विनयकरके युक्त पुत्रोंवाला होता है ॥ १-४॥

सिंहे सुतस्थे जनयेन्मनुष्यः क्रूरस्वभावान्नयनेन कान्तान्।
मांसप्रियान् स्त्रीजनकान् सुतीव्रान्विदेशभाजः क्षुधया समेतान् ५
कन्या यदा पञ्चमगा तदा स्युः कन्या नराणां तनयैर्विहीनाः।
पतिप्रियाः पुण्यतराः प्रगल्भाः प्रशान्तपापाः प्रियभूषणाश्च ॥६॥

जिसके जन्मसमय सिंहराशि पंचमभावमें स्थित हो वह क्रूरस्वभाववाले, मनोहर नेत्रोंवाले, मांससे प्यार करनेवाले, स्त्रियोंवाले, बडे तीव्र परदेशमें रहनेवाले और क्षुधावाले पुत्रोंको उत्पन्न करता है। जिसके कन्याराशि पंचम भावमें स्थित हो वह पुत्रों करके हीन, पतिको प्यारी, बहुत पुण्यवती, प्रगल्भा, पापरहिता और प्रियभूषणा कन्याओंवाला होता है ॥ ५ ॥ ६ ॥

तुला यदा पञ्चमगा नराणां तदा सुशीलानि मनोहराणि।
भवन्त्यपत्यानि सरूपकाणि क्रियासमेतानि शुभेक्षणानि ॥ ७॥
कीटे सुतस्थे जनयेन्नृयोनौ पुत्रान्मनुष्यः सुभगान्सुशीलान्!
अज्ञातदोषान्प्रणयेन युक्तान्निजेऽत्र धर्मे सततं मनुष्यः ॥ ८ ॥
चापे सुतस्थे जनयेन्मनुष्यः सुतान्विचित्रान् हयलुब्धलक्षान्।
धानुष्कचर्यान् हतशत्रुपक्षान् सेवाप्रियान्पार्थिवमानयुक्तान् ॥९॥

जिसके तुलाराशि पंचम भावमें स्थित होवे उसके सुंदर, शीलवान्, मनोहर स्वरूपवान् क्रिया करके युक्त और दर्शनीय संतान उत्पन्न होती हैं। जिसके वृश्चिकराशि पंचमभावमें स्थित हो वह मनुष्य मनोहर, सुशीलवान्, अज्ञातदोष अपने धर्ममें नम्रतायुक्त पुत्रोंको नहीं उत्पन्न करता है। जिसके धनुराशि पंचमभावमें स्थित हो वह मनुष्य विचित्र लाखों घोडोंकी आकांक्षावाले, धनुर्बाण धारण करनेवाले, शत्रुओं करके हीन, सेवा प्रिय और राजाके मानकरके युक्त पुत्रोंको उत्पन्न करता है॥ ८-९॥

मृगे सुतस्थे जनयेन्मनुष्यः पुत्रान् सदा पापमतीन् कुरूपान्।
क्लीबान् सुभावान्विगतप्रभावान् सुनिष्ठुरान्प्रेमविवर्जितांश्च॥१०॥
कुंभे सुतस्थे स्थिरतासमेतान् गम्भीरचेष्टानतिसत्ययुक्तान्।
पुत्रान्मनुष्यो जनयेत्प्रसिद्धान्कष्टंसहान्पुण्ययशःप्रभूतान्॥११॥
मीने सुतस्थे ललितान् सुरक्तान् पुत्रान्मनुष्यो लभते व्यवायात्।
रोगैः समेतांश्च सदा कुरूपान् सहास्यकान्स्त्रीसहितान् सदैव॥१२॥

जिसके मकर राशि पंचम भावमें पडी हो वह पापबुद्धिवाले, कुरूप सुभाव करके नपुंसक प्रतापतेजहीन बडे निर्दयी और प्रेम करके रहित पुत्रोंवाला होता है। जिसके कुंभराशि पंचमभावमें पडे वह स्थिरता युक्त, गंभीर चेष्टावाले सत्य करके युक्त, प्रसिद्ध, कष्ट सहनेवाले और बहुत पुण्ययशवाले पुत्रोंवाला होता है। जिसके मीनराशि पंचमभावमें पडे वह मनुष्य स्त्री प्रसंग करके ललित, रक्तवर्ण, रोग करके युक्त, कुरूप सदा हास्य और स्त्रीकरके संयुक्त पुत्रोंको पानेवाला होता है॥ १०-१२॥

इति सुतभावस्थराशिफलम्।

अथ षष्ठभावस्थराशिफलम्।

मेषे रिपुस्थे प्रभवन्ति वैरं सदा नराणां वृषभे रिपुस्थे।
अपत्यमार्गे गतमङ्गनानां सङ्गो नितान्तं निजबन्धुवर्गे॥१॥
तृतीयराशौ रिपुगे नराणां वैरं भवेत्स्त्रीजनितं सदैव।
तथा नराणां न हितं च पापैर्वणिग्जनैर्नीचजनानुरक्तैः॥२॥
कर्के रिपुस्थे सहसा भयं च भवेन्मनुष्यस्य सुतातुरस्य।
समं द्विजेन्द्रैश्च नराधिपैश्च महाजनैनैव परानुरोधात्॥३॥

जिसके जन्मसमयमें मेषराशि छठे भावमें पडे उस मनुष्यको सदा वैर होता है और जिसके वृषराशि छठे भावमें पड़े उसको अपने बंधुवर्गमें तथा अपत्यमार्गमें

प्राप्त स्त्रियोंके संगकरके वैर प्राप्त होता है । जिसके मिथुनराशि छठे भावमें स्थित हो उसको स्त्रीजनित तथा पापीजनों,वणिग्जनों और नीचजनोंकी संगति करके वैर प्राप्त होता है । जिसके कर्कराशि छठे भावमें स्थित हो उसको अकस्मात् कभी भय होजावे और ब्राह्मणों राजाओं और महाजनों तथा दूसरोंकी मित्रतासे समभाव प्राप्त होता है ॥ १-३ ॥

सिंहे रिपुस्थे प्रभवेच्च वैरं पुत्रीसमं बन्धुजनेन नित्यम् ।
धने क्षमात्तस्य विनिर्जितं च यद्वा मनुष्यस्य वराङ्गनाभिः ॥४॥
कन्यास्थिते शत्रुगृहे स्ववैरैरसंयुतानि प्रभवेन्नराणाम् ।
दुश्चारिणीभिश्च सुनिम्ननाभिर्वेश्याभिरेवाश्रयवर्जिताभिः ॥ ५ ॥
तुलाधरे शत्रुगृहे नरस्य निधिस्थितस्य प्रभवेच्च वैरम् ।
कार्ये सुधर्मस्य नरस्य साधोः स्वबन्धुवर्गाच्च निजालयश्च ॥६॥

जिसके सिंहराशि छठे भावमें स्थित होय उसे बंधुजनकरके पैदा कियेहुए धन भूमिके निमित्त अथवा स्त्रियोंकरके सदा शत्रुता होती है । जिसके कन्याराशि शत्रुभावमें स्थित हो उसको अपने जनोंकी संगतिसे अथवा दुश्चारिणी तथा गंभीर नाभिवाली और आश्रयरहित वेश्याओंकरके वैर होता है । जिसके तुलाराशि छठे भावमें स्थित होवे उसको धरेहुए धनके कारण धर्मके कार्यहेतु बंधुवर्गोंसे अपने स्थानसे वैर प्राप्त होता है ॥ ४-६ ॥

कौर्पे रिपुस्थे प्रभवन्ति वैरं सार्द्धं द्विजिह्वैश्च सरीसृपैश्च ।
व्यालैर्मृगैश्चोरगणैर्नराणां सर्वैः सुधान्यैश्च विलासिभिश्च ॥ ७ ॥
चापे रिपुस्थे च भवेच्च वैरं शरैः समेतं च सरागकैश्च ।
सदा मनुष्यैश्च हयैश्च हस्तिभिः पुण्यैस्तथान्यैः परवञ्चनाच्च ॥८॥
मृगे रिपुस्थे च भवेच्च वैरं सदा नराणां धनसंभवं च ।
मित्रैः समं साधुजने सहाये प्रभूतकालं गृहसम्भवं च ॥ ९ ॥

जिसके वृश्चिकराशि छठे भावमें स्थित हो उसको दो जिह्वावालों अर्थात् चुगुलखोर और सांपोंके साथ, सिंह, मृग और चोरोंकरके, धान्य करके और विलासिनी स्त्रियोंकरके वैर प्राप्त होता है । जिसके धनुराशि छठे भावमें स्थित हो उसको शरसंयुक्त सरागकोंसे, घोडों हाथियोंसे, पुण्यकरके तथा दूसरोंके वंचनासे वैर होता है । जिसके मकरराशि छठे भावमें स्थित हो उसको धनगृहसंबंधी बहुतकाल साधुजनोंकी सहायतासे मित्रकरके वैर होता है ॥ ७-९ ॥

कुम्भे रिपुस्थे च तथा हि तेजोनराधिपेनैव जलाश्रयैश्च।
वापीतडागादिभिरेव नित्यं क्षेत्राधिपाद्यैः पुरुषैः सुवेलैः ॥ १० ॥
मीने रिपुस्थे च भवेन्नराणां वैरं च नित्यं सुतवस्त्रजातम्।
स्त्रीहेतुकं स्वीयभवं पराणामपि प्रियाणामितरेतरं च ॥ ११ ॥

जिसके कुंभराशि छठे भावमें स्थित हो उसको बलवान् राजाकरके, जलाश्रयकरके, बावडी तडागादिकरके, क्षेत्राधिपकरके और श्रेष्ठपुरुषकरके भय होता है। जिसके मीनराशि छठे भावमें स्थित हो उसे सदा सुतवस्त्रजात स्त्रीहेतु अपनी एवं पराई संपदाके निमित्त शत्रुता होती है ॥ १० ॥ ११ ॥ इति षष्ठभावस्थराशिफलम् ॥

अथ सप्तमभावस्थराशिफलम्।

मेषेऽस्तसंस्थे च भवेत्कलत्रं क्रूरं नराणां च खलस्वभावम्।
पापानुरक्तं कठिनं नृशंसं वित्तप्रियं साध्यपरं सदैव ॥ १ ॥
वृषेऽस्तसंस्थे च भवेत्कलत्रं सुरूपकं वाक्प्रणतं प्रशान्तम्।
पतिव्रताचारुगुणेन युक्तं फलाधिकं ब्राह्मणदेवभक्तम् ॥ २ ॥
तृतीयराशौ च भवेत्कलत्रे कलत्रयुक्तं सुधनं सुवृत्तम्।
रूपान्वितं सर्वगुणोपपन्नं विनीतवेषं गुणवर्जितं च ॥ ३ ॥
कर्केण युक्ते च मनोहराणि सौभाग्ययुक्तानि गुणान्वितानि।
भवन्ति सौम्यानि कलत्रकाणि कलङ्कहीनानि सुसंयुतानि ॥ ४ ॥

जिसके मेषराशि जन्मसमय सातवें भावमें पडी हो वह क्रूरा, खलस्वभाववाली, पापकर्ममें तत्पर, कठिन, नृशंस, धनका प्यार करनेवाली और साध्य पर कलत्र (स्त्री) वाला होता है। जिसके वृषराशि सातवें भावमें स्थित हो वह सुरूपवती, नम्रवार्ता करनेवाली, पतिव्रता, चारुगुणकरके संयुक्त, अधिक संतानवाली, ब्राह्मण और देवताकी भक्तिसंयुक्तस्त्रीवाला होता है। जिसके सातवें भावमें मिथुनराशि स्थित होवे वह धनवती, सुवृत्ता, रूपवती, संपूर्णगुणोंकरके संपन्न, विनीतवेष और गुणरहित स्त्रीसे संयुक्त होता है। जिसके कर्कराशि सातवें भावमें पडे वह मनोहर, सौभाग्य और गुणसंयुक्त, सौम्य, कलंकरहित और शुभसंयुक्त स्त्रीवाला होता है ॥ १-४ ॥

सिंहेऽस्तसंस्थे च भवेत्कलत्रं तीव्रस्वभावं च खलं च दुष्टम्।
विहीनवेषं परसद्मयुक्तं वसुप्रियं स्वल्पकृतं कृशं च ॥ ५ ॥

कन्याऽस्तसंस्था च भवेत्सुदाराः सुरूपदेहास्तनयैर्विहीनाः ।
सौभाग्यभोगार्थनयेन युक्ताः प्रियंवदाः सत्यधनाः प्रगल्भाः ॥ ६ ॥
तुलेऽस्तसंस्थे गुणगर्विताङ्ग्यो भवन्ति नार्यो विविधप्रकाराः ।
पुण्यप्रिया धर्मपराः सुदान्तप्रसूतपुत्राः पृथिवीविनीताः ॥ ७ ॥
कीटेऽस्तसंस्थे विकलासमेता भवेच्च भार्या कृपणा नराणाम् ।
सुशिक्षिता च प्रणयेन हीना दौर्भाग्यदोषैर्विविधैः समेता ॥ ८ ॥

जिसके सातवें भावमें सिंहराशि पडै वह तीव्रस्वभाववाली, खल, दुष्टा, हीनभेष, परस्थानसंयुक्त रत्न द्रव्यादिका प्यार करनेवाली, थोडे उपकारवाली और दुर्बला स्त्रीवाला होता है। जिसके कन्याराशि सातवें भावमें स्थित हो वह सुरूपदेहा, पुत्र-हीना, सौभाग्य, भोग, अर्थ और नीतिकरके संयुक्त; प्रियवचन कहनेवाला, सत्यही धन जिनके और प्रगल्भा, सुंदर ऐसी स्त्रियोंवाला होता है। जिसके सातवें भावमें तुलाराशि स्थित होय वह गुणगर्विता, पुण्यप्रिया, धर्मपरा, सुदांत पुत्रोंको उत्पन्न करनेवाली, भूमिसंयुक्त, अनेक प्रकार स्त्रियोंवाला होता है। जिसके सातवें स्थानमें वृश्चिकराशि स्थित हो वह विकलता सहित, कृपण, सुंदर, शिक्षित, नम्रताकरके रहित, दुर्भगा और अनेक दोषोंकरके संयुक्त स्त्रीवाला होता है ॥ ५–८ ॥

चापेऽस्तसंस्थे च भवेत्कलत्रं नृणां सुदुष्टं विगतस्वभावम् ।
विस्रस्तलज्जं परदोषरक्षं युद्धप्रियं दम्भसमन्वितं च ॥ ९ ॥
मकरो यदिचेद् द्यूने भार्या दम्भान्विताऽधमा ।
निर्लज्जा लोलुपा क्रूरा दुःस्वभावा च दुःखिता ॥ १० ॥
घटेऽस्तसंस्थे च भवेत्कलत्रं नृणां सुदुष्टं विगतस्वभावम् ।
देवद्विजानां सततं प्रहृष्टं धर्मध्वजं सत्सु क्षमासमेतम् ॥ ११ ॥
मीनेऽस्तसंस्थे च विकारयुक्तं भवेत्कलत्रं कुमतं कुपुत्रम् ।
स्वधर्मशीलं प्रणयेन हीनं सदा नराणां विकलप्रियं च ॥ १२ ॥

जिसके धनुराशि सातवें भावमें पडै वह दुष्टा, विगतस्वभाववाली, विस्रस्तलज्जा, दूसरेके दोषकी रक्षा करनेवाली, कलहसे प्यार करनेवाली, दम्भयुक्त स्त्रीवाला होता है। जिसके सप्तमभावमें मकरराशि स्थित हो उसकी स्त्री कपटी, अधम (नीच) निर्लज्ज, लालची, क्रूर, दुष्टस्वभाववाली और क्लेशयुक्त होती है। जिसके सप्तम भावमें कुम्भराशि स्थित हो उसकी स्त्री दुष्टा, विगतस्वभाववाली, सदा देवता और

ब्राह्मणोंको प्रहृष्ट करनेवाली, धर्मकी ध्वजा और क्षमासंयुक्त होती है । जिसके मीन राशि सप्तमभावमें स्थित हो उसकी स्त्री विकारसंयुक्त, दुष्टमति और कुपुत्रवाली, अपने धर्ममें शीलवती, नम्रताकरके रहित और कलहको प्यार करनेवाली होती है ॥ ९-१२ ॥

इति जायाभावस्थराशिफलम् ॥

अथ अष्टमभावस्थराशिफलम् ।

मेषेऽष्टमस्थे च भवे नराणां भवेद्विदेशे तु रुजा स्थितानाम् ।
कथानुस्मृत्याथ विमूर्च्छितानां महाधनानामतिदुःखितानाम् ॥ १ ॥
वृषेऽष्टमस्थे च भवेन्नराणां मृत्युर्गृहे श्लेष्मकृताद्विकारात् ।
महाशनाद्वाथ चतुष्पदाद्वा रात्रौ तथा दुष्टजनादिसंगात् ॥ २ ॥
तृतीयराशौ च भवेन्नराणां मृत्युस्थिते मृत्युरनिष्टसङ्गात् ।
लाभोद्भवो वा रससंभवो वा गुदप्रकोपादथवा प्रमेहात् ॥ ३ ॥

जिस मनुष्यके जन्मकालमें मेषराशि अष्टमभावमें स्थित हो तो उस मनुष्यका मरण परदेशमें रोगकरके, कथास्मृतिमूर्च्छाकरके होता है, वह मनुष्य धनवान्, अतिदुःखयुक्त होता है । जिस मनुष्यके वृषराशि अष्टमभावमें स्थित हो तो उस मनुष्यकी मृत्यु अपनेही देशमें कफविकारकरके अथवा अधिकभोजनविकारकरके अथवा चतुष्पादकरके वा दुष्टमनुष्योंके संग करके रात्रिमें होती है । जिस मनुष्यके अष्टम स्थानमें मिथुन राशि स्थित होय तो अनिष्टसंगसे लाभके पैदा होनेसे अथवा रसोत्पत्तिसे गुह्यरोग (अर्श) से वा प्रमेहसे उसकी मृत्यु कहनी चाहिये ॥ १-३ ॥

कर्केऽष्टमस्थे च जलोपसर्गात्कीटात्तथा चैव विभीषणाद्वा ।
भवेद्विनाशः परहस्ततो वा विदेशसंस्थस्य नरस्य तस्य ॥ ४ ॥
सिंहेऽष्टमस्थे च सरीसृपाच्च भवेद्विनाशो मनुजस्य सम्यक् ।
व्यालोद्भवो वापि वनाश्रितस्य चोरोद्भवो वाऽथ चतुष्पदाच्च ॥ ५ ॥
कन्या यदा चाष्टमगा विलासात्सदा स्वचित्तान्मनुजस्य विद्यात् ।
स्त्रीणां हि हिंस्राद्विषमाशनात्स्यात् स्त्रीणां कृते वा स्वगृहाश्रितस्य ॥ ६ ॥
तुलाधरे चाष्टमगे च मृत्युर्भवेन्नराणां द्विपदोत्थ एव ।
निशागमे संस्थकृतोपवासाद्विष्टिं च कोपोऽप्यथवा प्रतापात् ॥ ७ ॥

जिसके कर्कराशि अष्टमभावमें स्थित होय तो उस मनुष्यकी मृत्यु जलके उपसर्गसे अथवा कीडेकरके वा सर्पकरके, पराये हाथ करके परदेशमें होती है ।

जिसके सिंहराशि अष्टमभावमें स्थित हो तो उस प्राणीकी मृत्यु कीडेकरके अथवा सर्प करके वनाश्रितसे अथवा चोर वा चौपाये करके होती है । जिसके कन्याराशि अष्टम भावमें स्थित हो तो उस मनुष्यकी मृत्यु विलास करके वा अपने चित्तकरके स्त्रियोंके हिंसक करके अथवा अपने घरकी स्त्रीकरके विषमाशनके हेतुसे कहनी चाहिये । जिस मनुष्यके तुलाराशि अष्टमभावमें स्थित हो तो उसकी मृत्यु द्विपद करके, व्रत करनेसे, मलकोपसे अथवा प्रतापसे रात्रिमें होती है ॥ ४-७ ॥

स्थानेऽष्टमस्याष्टमराशिसङ्के नृणां विनाशो रुधिरोद्भवेन ।
रोगेण वा कीटसमुद्भवैश्च स्वस्थानसंस्थस्य विषोद्भवो वा॥८॥
चापेऽष्टमस्थे प्रभवेन्नराणां मृत्युः स्वसंस्थे शरताडनेन ।
गुह्योद्भवेनापि गदोद्भवेन चतुष्पदोत्थस्य जलोद्भवेन ॥ ९ ॥

जिसके वृश्चिकराशि अष्टमभावमें स्थित हो तो उस मनुष्यका विनाश रुधिरके विकारके रोगकरके, कीडेकरके अथवा विषसे अपने स्थानमें होता है । जिसके धनुराशि अष्टम भावमें स्थित हो उसकी मृत्यु बाणके लगनेसे अथवा गुदामें उत्पन्न रोगसे या चौपायोंकरके वा जलमें उत्पन्न हुए जीव ग्राह इत्यादि करके कहनी चाहिये॥८।९॥

मृगोऽष्टमस्थश्च नरस्य यस्य विद्यान्वितो मानगुणैरुपेतः ।
कामी च शूरोऽथ विशालवक्षाः शास्त्रार्थवित्सर्वकलासु दक्षः१०
घटेऽष्टमस्थे च भवेद्विनाशो वैश्वानरात्सद्मगताच्च जन्तोः ।
नानाव्रणैर्वायुभवैर्विकारैः श्रमात्तथा गेहविहीनमृत्युः ॥ ११ ॥
मीनेऽष्टमस्थे प्रभवेच्च मृत्युर्नृणामतीसारकृतश्च कष्टात् ।
पित्तज्वराद्वा सलिलाश्रयाद्वा रक्तप्रकोपादथवा च शस्त्रात्॥१२॥

जिसके मकरराशि अष्टम भावमें स्थित होय वह विद्यावान्, मान गुणकरके युक्त, कामी, शूर, विशालवक्षस्थलवाला, शास्त्रार्थ जाननेवाला और संपूर्ण कलाओंमें दक्ष होता है । जिस मनुष्यके जन्मकालमें कुंभराशि अष्टमभावमें स्थित हो तो उस प्राणीके घर आग लगनेसे उसका नाश होता है, अनेक व्रण विकार: करके अथवा वायुसे उत्पन्न विकार करके वा श्रम करके परदेशमें मृत्यु होती है । जिसके मीनराशि अष्टम भावमें होय तो अतिसारकरके कष्टसे या पित्तज्वरसे अथवा जलके आश्रयसे वा रक्तकोपसे या शस्त्रके लगनेसे उसकी मृत्यु होती है ॥ १०-१२ ॥

इति अष्टमभावस्थराशिफलम् ॥

अथ धर्मभावस्थितराशिफलम्।

धर्मस्थिते चैव हि मेषलग्ने चतुष्पदोत्थं प्रकरोति धर्मम्।
तेषां प्रदानेन तु पोषणेन दयाविवेकेन सुपालनेन ॥ १ ॥
वृषे च धर्मे प्रगते मनुष्यो धर्मं करोत्येव धनप्रभूतम्।
विचित्रदानैर्बहुगोप्रदानैर्विभूषणाच्छादनभोजनेन ॥ २ ॥
तृतीयराशौ प्रकरोति धर्मं धर्माकृतिं सौम्यकृतं सदैव।
अभ्यागतोत्थं द्विजभोजनाद्वा दीनानुकम्पाश्रयमानसेवया ॥३॥
व्रतोपवासैर्विषमैर्विचित्रैः सदैव धर्मं कुरुते नरः सः।
धर्माश्रिते चैव चतुर्थराशौ तीर्थाश्रयाद्वा वनसेवनेन ॥ ४ ॥

जिसके मेषराशि नवमभावमें स्थित हो वह चौपायोंके दान अथवा पोषण और दया विवेक करके श्रेष्ठ, पालनद्वारा धर्म करनेवाला होता है। जिसके वृषराशि नवम भावमें स्थित होय वह मनुष्य धर्मका करनेवाला, अधिक धनवान्, विचित्र दान करके बहुत गोदान करके, वस्त्र भोजन भूषणादि करके शोभायमान होता है। जिसके मिथुनराशि नवमभावमें स्थित होय वह मनुष्य धर्म करनेवाला और अधर्म भी करनेवाला, सौम्यप्रकृति, सदैव अभ्यागतों करके अथवा ब्राह्मण भोजनसे अथवा दीनोंकी दयासे वा मानसे उनके आश्रयसे धर्मवान् होता है। जिसके कर्कराशि नवम भावमें स्थित होय वह व्रतोपवास करनेवाला, सदा विचित्र धर्म करनेवाला, तीर्थाश्रयी अथवा वनाश्रयी होता है ॥ १-४ ॥

आसंस्थिताचार्यह(?)सिंहराशौ धर्मं परेषां प्रकरोति मर्त्यः।
स्वधर्महीनोऽपि क्रियाभिरेव सुतीर्थरूपं विनयेन हीनम् ॥ ५ ॥
धर्माश्रितः स्याद्यदि षष्ठराशिः स्त्रीधर्मसेवां कुरुते मनुष्यः।
विहीनभक्तिर्बहुजन्मतश्च पाखण्डमाश्रित्य तथाऽन्यपक्षम् ॥ ६ ॥
तुलाधरे धर्मगते मनुष्यो धर्मं करोत्येव सदा प्रसिद्धम्।
देवद्विजानां परितोषणं च जनानुरागेण तथाऽद्भुतानाम् ॥ ७ ॥
धर्माश्रिते चाष्टमगे च राशौ पाखण्डधर्मं कुरुते मनुष्यः।
पीडाकरं चैव तथा जनानां भक्त्या विहीनं परपोषणेन ॥ ८ ॥

जिसके सिंहराशि नवम भावमें स्थित हो वह मनुष्य पराये धर्मको करनेवाला, अपने धर्म और क्रियासे हीन, तीर्थरूप और विनय करके रहित होता है। जिसके

कन्याराशि नवम भावमें स्थित होय वह मनुष्य स्त्रीधर्मकी सेवा करनेवाला, बहुत जन्मोंसे भक्तिहीन, पाखंड और अन्यपक्षकी सहाय करनेवाला होता है। जिसके तुलाराशि नवम भावमें स्थित होय वह सदा धर्म करनेवाला, प्रसिद्ध, देवता और ब्राह्मणोंको संतुष्ट करनेवाला, अनुरागयुक्त और अद्भुत होता है। जिसके वृश्चिकराशि नवम भावमें स्थित हो वह पाखंड धर्ममें तत्पर, मनुष्योंको पीडा करनेवाला, भक्ति और परपोषणसे हीन होता है ॥ ५-८ ॥

चापे तथा धर्मगते मनुष्यः करोति धर्मं द्विजदेवतर्पणम् ।
स्वेच्छान्वितं शास्त्रविनिर्मितं च प्रभूततोषं प्रथितं त्रिलोके ॥९॥
धर्माश्रिते चेन्मकरे मनुष्यः पापोऽस्त्यधर्मं कुरुते प्रतापम् ।
पश्चाद्विरक्तं च विडम्बनाभिः कौलं समाश्रित्य सदा च पक्षम् १०
कुम्भे च धर्मं प्रगतं च धर्मं पुंसां विधत्ते सुरसङ्गजातम् ।
वृक्षाश्रयोत्थं च तथा शिवं च आरामवापीप्रियता सदैव ॥ ११॥
धर्माश्रिते चैव हि मीनराशौ करोति धर्मं विविधं नृलोके ।
सत्सेवयाऽऽरामतडागजातं तीर्थाटनेनार्थसुखैर्विचित्रैः ॥ १२ ॥

जिसके धनुराशि नवमभावमें स्थित होय वह धर्मका करनेवाला, ब्राह्मणका भक्त, देवताओंका तर्पण करनेवाला, अपनी इच्छानुसार शास्त्रोंका बनानेवाला, अधिक सन्तोषवाला और तीनों लोकमें प्रसिद्ध होता है। जिसके मकरराशि नवमभावमें स्थित होय वह पापात्मा, अधर्म करनेवाला, प्रतापी होता है, पीछे विडंबनाकरके विरक्त होता है और कौलपक्षका सहाय करनेवाला होता है। जिसके कुम्भराशि नवमभावमें स्थित होय वह अच्छे धर्मका करनेवाला, देवताओंका तथा शिवका भक्त, बाग फुलवारी तालाबसे प्रीति करनेवाला होता है। जिसके मीनराशि नवमभावमें स्थित होय वह मनुष्य लोकमें विविध धर्मोंका करनेवाला, सत्सेवाकरके बाग तडागवाला, तीर्थाटन करके अनेक अर्थ और सुखवाला होता है ॥ ९-१२ ॥

इति नवमभावस्थराशिफलम् ॥

अथ दशमभावस्थितराशिफलम् ।

कर्माश्रितं मेषसुनामराशौ करोत्यधर्मं प्रवरं सुदुष्टम् ।
पैशुन्यरूपं विनयातिरिक्तं सुनिन्दितं साधुजनस्य लोके ॥ १ ॥
वृषेऽम्बरस्थे प्रकरोति कर्म व्ययात्मकं साधुजनानुकम्पम् ।

द्विजेन्द्रदेवातिथिभिर्विभाजकं ज्ञानात्मकं प्रीतिकरं सतां च ॥२॥
युग्मेऽम्बरस्थे प्रकरोति मर्त्यं कर्मप्रधानं गुरुभिः प्रदिष्टम् ।
कीर्त्याऽन्वितं प्रीतिकरं जनानां प्रभासमेतं कृषिजं सदैव ॥ ३ ॥
कर्केऽम्बरस्थे प्रकरोति मर्त्यः कर्म प्रपारामतडागसंज्ञम् ।
विचित्रवापीतटवृन्दजं च कूपापरं नित्यमकल्पकं च ॥ ४ ॥

जिसके जन्मसमयमें मेषराशि दशमभावमें स्थित होय वह मनुष्य बहुत अधर्म करनेवाला, दुष्ट प्रपंचरूप, विनयरहित और साधुजनोंकी निन्दा करनेवाला होता है। जिसके वृषराशि दशमभावमें स्थित होय वह खर्चीले कर्म करनेवाला, साधुजनोंपर दयावान्, ब्राह्मण और देवताओं अभ्यागतोंकरके विभाजक, ज्ञानवान् और सदा प्रीति करनेवाला होता है। जिसके मिथुनराशि दशमभावमें स्थित होय वह गुरु-करके शिक्षित, उत्तम कर्मको करनेवाला, कीर्तिकरके युक्त, प्रीति करनेवाला, खेतीसे उत्पन्न शोभासहित होता है। जिसके कर्कराशि दशम भावमें स्थित होय वह पौशाला, मनोहर तडाग, विचित्रबावली, जलके स्थान बनवानेवाला, दयावान् और अकल्पक होता है ॥ १-४ ॥

सिंहेऽम्बरस्थे कुरुते मनुष्यो रौद्रं सपापं विकृतं च कर्म ।
सपौरुषं प्राणसमं च नित्यं वधात्मकं निन्दनमेव नित्यम् ॥५॥
नभःस्थलस्थे त्वथ षष्ठराशौ करोति कर्माज्ञमितो मनुष्यः ।
स्त्री राज्यमानौ भजते विरुद्धं कामाल्पकं निर्धनमत्र लोके ॥६॥
तुलाधरे व्योमगते मनुष्यो वाणिज्यकर्म प्रचुरं करोति ।
धर्मात्मकं चापि नयेन युक्तं सतामभीष्टं परसंपदं च ॥ ७ ॥
कीटेऽम्बरस्थे प्रकरोति कर्म पुंसामदुष्टं जनसंमतं च ।
व्ययंकरं देवगुरुद्विजानां सुनिर्दयं नीतिविवर्जितं च ॥ ८ ॥

जिसके सिंहराशि दशम भावमें स्थित हो वह क्रूर, पापी, विकृतकर्म करनेवाला, पराक्रमी, हिंसा करनेवाला और सदा निन्दा करनेवाला होता है । जिसके कन्याराशि दशमभावमें स्थित हो वह अज्ञ कर्म करनेवाला, उसके घरमें स्त्री ही मालिक हो, भक्तिसे विरुद्ध, तुच्छ वीर्यवाला और निर्धन होता है। जिसके तुलाराशि दशम भावमें स्थित हो वह व्यापारकर्म अधिक करनेवाला, धर्मात्मा, नीतिमान्, अभीष्ट और सम्पदाकरके युक्त होता है। जिसके वृश्चिकराशि दशमभावमें स्थित होय वह

दुष्टकर्म करनेवाला, जनसंमती, खर्चीला, देवता ब्राह्मणके न माननेवाला, निर्दयी और नीतिकरके वर्जित होता है ॥ ५-८ ॥

चापेऽम्बरस्थे च करोति कर्म सर्वात्मजं चौर्ययुतं मनुष्यः ।
परोपकारात्मकभोजनाद्यं नृपात्मकं भूमियशःसमेतम् ॥ ९ ॥
मृगेऽम्बरस्थे प्रखरप्रतापं कर्मप्रधानं कुरुते मनुष्यम् ।
सुनिर्दयं बन्धुजनैः समेतं धर्मेण हीनं खलसंमतं च ॥ १० ॥
घटेऽम्बरस्थे च करोति कर्म प्रयाणमर्त्यं परवञ्चनार्थम् ।
पाखण्डधर्मान्वितमिष्टलोभाद्विश्वासहीनं जनताविरुद्धम् ॥ ११ ॥
मीनेऽम्बरस्थे प्रकरोति कर्म मर्त्यं कुले धर्मगुरुप्रदिष्टम् ।
कीर्त्यान्वितं सुस्थिरमादरेण नानाद्विजाराधनसंस्थिरं च ॥ १२ ॥

जिसके धनुराशि दशमभावमें स्थित होय वह पूर्णज्ञानवान्, चौर्ययुत, परोपकार करनेवाला, प्रकाशमान, राजाके समान, भूमि और यशकरके युक्त होता है । जिसके मकरराशि दशमभावमें स्थित हो वह बडा प्रतापवान्, श्रेष्ठकर्म करनेवाला, निर्दयी, बन्धुजनोंसे युक्त, धर्मकरके हीन और दुष्टजनोंकी संमतिवाला होता है । जिसके दशमभावमें कुंभराशि स्थित होय वह पाखंडधर्मकरके युक्त, इष्ट लोभहीके कारण विश्वासरहित और मनुष्योंसे विरुद्ध होता है । जिसके मीनराशि दशमभावमें स्थित होय वह अपने कुलमें गुरुके बतायेहुये धर्म कर्म करनेवाला, कीर्तिकरके युक्त, स्थिर-बुद्धिवाला और आदरपूर्वक ब्राह्मणोंके पूजनमें तत्पर होता है ॥ ९-१२ ॥

इति कर्मभावस्थराशिफलम् ॥

अथ लाभभावस्थितराशिफलम् ।

लाभालये मेषगते च राशौ चतुष्पदोत्थं प्रकरोति लाभम् ।
तथा नराणां नृपसेवया च देशान्तराराधितसुप्रभूतम् ॥ १ ॥
आयस्थिते वै वृषभे प्रलाभो भवेन्मनुष्यस्य विशिष्टजातेः ।
स्त्रीणां सकाशादथ सज्जनानां कुशीलगोधर्मकृतिस्तथैव ॥ २ ॥
तृतीयराशिः कुरुतेऽतिलाभं लाभाश्रितः स्त्रीदयितं सदैव ।
वस्त्वर्थमुख्यासनपानजातं सदा नराणां विविधप्रसिद्धम् ॥ ३ ॥
लाभो भवेल्लाभगते च राशौ सदा चतुर्थे वरजातकानाम् ।
सेवाकृषिभ्यां जनितः प्रभूतः शास्त्रेण वा साधुजनैश्च पश्चात् ॥ ४ ॥

जिसके मेषराशि जन्मसमय ग्यारहवें भावमें स्थित होय उसे चौपायोंसे उत्पन्न तथा राजाकी सेवा करके और देशांतरसे अधिक लाभ होता है। जिसके वृषराशि लाभ (ग्यारहवें) भावमें स्थित होय उसको विशिष्ट जातिके स्त्रियोंके सकाशसे अथवा सज्जनोंके सकाशसे तथा कुशील और गोधर्म करनेसे लाभ होता है। जिसके मिथुनराशि लाभ भावमें स्थित होय वह बहुत लाभवाला, सदा स्त्रियोंका प्यारा, वस्तु अर्थ मुख्य आसन पानजात सुखवाला और अनेक प्रसिद्धियोंवाला होता है। जिसके कर्कराशि लाभभावमें स्थित होय उसको सेवा करके वा खेती करके, शास्त्र करके और साधुजनोंकरके बहुत लाभ होता है ॥ १-४ ॥

लाभाश्रिते पञ्चमगे च राशौ भवेन्मनुष्यस्य विगर्हणा च।
नानाजनानां वधबन्धनैर्वा व्यायामदेशान्तरसंश्रयाच्च ॥ ५ ॥
कन्यात्मके लाभगते मनुष्यः प्राप्नोति लाभं विविधं सपर्याः।
शास्त्रागमाभ्यां विनयेन पुंसां नित्याविवेकेन तथाऽद्भुतेन ॥ ६ ॥
तुलाधरे लाभगते मनुष्यः प्राप्नोति लाभं वणिजे विचित्रे।
सुसाधुसेवाविनयेन नित्यं सुखं स्तुतं मुख्यमतं प्रभूतम् ॥ ७ ॥
लाभाश्रिते चाष्टमगेहराशौ प्राप्नोति लाभं मनुजोऽतिमुख्यम्।
छलेन पापेन सुभाषणेन परस्य पैशुन्यकृतैर्विकारैः ॥ ८ ॥

जिसके सिंहराशि लाभ भावमें स्थित होय उसको निंदा करके, अनेक जनोंके वध बंधन करके, परिश्रम करके अथवा देशांतर करके लाभ होता है। जिसके कन्याराशि लाभ भावमें स्थित होय उसको अनेक आराधन करके, शास्त्र आगम करके, विनय करके और अद्भुत अविवेक करके सदा लाभ होता है। जिसके तुलाराशि लाभभावमें स्थित होय उसको विचित्र व्यापारमें लाभ होता है और साधुसेवा विनय करके लाभ होता है और मुख्य मतके स्तुतिसे बहुत सुख मिलता है। जिसके वृश्चिकराशि लाभ भावमें स्थित होय उसको छल करके, पाप करके, सुंदर भाषण करके, दूसरोंसे प्रपंच करके श्रेष्ठ लाभ होता है ॥ ५-८ ॥

लाभाश्रिते चैव धनुर्धरे च नृपं विलासाद्व्रजते मनुष्यः।
सत्सेवया वा निजपौरुषेण मुख्यस्य चाराधनवांश्च नित्यम् ॥ ९ ॥
लाभाश्रिते वै मकरेऽर्थलाभो भवेन्नराणां जलयानयोगात्।
विदेशवासान्नृपसेवनाद्वा व्ययात्मकं भूरितरं सदैव ॥ १० ॥

आयस्थिते कुंभधरे च लाभो भवेन्मनुष्यस्य कुकर्मजातः ।
त्यागेन धर्मेण पराक्रमेण विद्याप्रभावात्सुसमागमश्च ॥ ११ ॥
लाभाश्रिते चान्त्यगमे च राशौ प्राप्नोति लाभं विविधैर्मनुष्यः ।
मित्रोद्भवं पार्थिवमानजातं विचित्रवाक्यैः प्रणयेन नित्यम् ॥ १२ ॥

जिसके धनुराशि लाभ भावमें स्थित होय वह नृपको विलास करके सेवता है, और उसको सत्सेवा करके निजपराक्रम करके तथा किसी मुख्यकी आराधना करके लाभ होता है । जिसके मकरराशि लाभ भावमें स्थित होय उसको जल यात्रासे, विदेशवाससे, राजसेवासे खर्चके अनुसार अधिक लाभ होता है । जिसके कुंभराशि लाभ भावमें स्थित होय उसको कुकर्मसे पैदा हुआ अथवा त्याग करके, धर्म करके, पराक्रम करके, विद्या प्रभाव करके लाभ होता है और सज्जनोंके आगमवाला होता है । जिसके मीनराशि लाभ भावमें स्थित होय उसको मित्रोद्भव पार्थिव (राजा) के मानसे उत्पन्न विचित्र वाक्यों करके अथवा प्रणय (नम्रता) करके विविध प्रकारका लाभ होता है ॥ ९-१२ ॥ इति लाभभावस्थितराशिफलम् ॥

अथ व्ययभावस्थितराशिफलम् ।

मेषे व्ययस्थे च भवेन्नराणां व्ययः सुखाच्छादनभोजनेन ।
चतुष्पदानेकविवर्द्धनेन लाभेन नानाविधपौरुषेण ॥ १ ॥
वृषे व्ययस्थे व्यय एव पुंसां भवेद्विचित्राम्बरयोषितां च ।
लाभेन राज्येन पराक्रमेण सधातुवादैर्विविधैः सदैव ॥ २ ॥
तृतीयराशौ व्ययगे नराणां व्ययो भवेत्स्त्रीव्यसनात्मकैश्च ।
भूतोद्भवावासततप्रभूतः कुशीलजः पापजनाद्गजैश्च ॥ ३ ॥
कर्के व्ययस्थे द्विजदेवतानां व्ययो भवेद्यज्ञसमुद्भवैश्च ।
धर्मक्रियाभिर्विदधाति चैव प्रशंसिते साधुजनेन लोके ॥ ४ ॥

जिसके मेषराशि बारहवें भावमें स्थित होय उसका सुखाच्छादन भोजनमें चौपायोंकी चाल वृद्धिमें लाभमें और अनेक प्रकार पराक्रममें खर्च होता है । जिसके वृषराशि बारहवें भावमें स्थित होय उसका विचित्र वस्त्रोंमें, स्त्रियोंमें, राज्यलाभमें, पराक्रममें, विवादमें धन खर्च होता है । जिसके मिथुनराशि बारहवें भावमें स्थित होय उसका स्त्रीव्यसनमें, कुशीलतामें, पापजनोंमें, हाथियोंके व्यापारमें धन खर्च होता है । जिसके कर्कराशि बारहवें भावमें स्थित होय उसको देवताब्राह्मणोंद्वारा यज्ञ करनेमें, धर्मक्रियामें, साधुजनके प्रशंसाकरके धन खर्च होता है ॥ १-४ ॥

सिंहे व्ययस्थे तु भवेन्नराणामसंशयो भूरितमः सदैव।
रूपश्च जातश्च कुकर्मणा च निन्द्यः सतां पार्थिवचोरतो वा ॥५॥
कन्यात्मके चान्त्यगते व्ययी च भवेन्मनुष्यः स हि चाङ्गनोत्सुकः।
विवाहमाङ्गल्यविचित्रमुख्यैः सूत्रप्रभाभिर्बहुसाधुसङ्गात् ॥ ६ ॥
तुले व्ययस्थे सुरविप्रबन्धुश्रुतिस्मृतिभ्यश्च कृतो व्ययश्च।
भवेन्नराणां नियमैर्यमैश्च सुतार्थसेवाजनितः प्रसिद्धः ॥ ७ ॥
अलौ व्ययस्थे च भवेद्व्ययस्तु पुंसां प्रदानेन विडंबनाभिः।
कुमित्रसेवाजनितः सुनिन्द्यः कुबुद्धितश्चौरकृताधिकारात् ॥ ८ ॥

जिसके सिंहराशि बारहवें स्थित हो वह सन्देहरहित, बडा क्रोधी, रूपवान्, कुकर्म करके राजा और चौरसे निंद्य होता है। जिसके कन्याराशि बारहवें भावमें स्थित होय उसका अंगनोत्सुक विवाह मांगल्य अथवा अनेक उत्तम कार्योंकरके सूत्रप्रभाकरके तथा साधुसंगतिकरके धनका खर्च होता है। जिसके तुलाराशि व्ययभावमें स्थित होय उसका देवता, ब्राह्मण-बन्धु-श्रुति-स्मृति इनके निमित्त नियमयमकरके एवं सुतार्थ सेवाजनित प्रसिद्ध धनका खर्च होता है। जिसके वृश्चिक राशि व्ययभावमें स्थित होय तो उस मनुष्यका दानकरके, विडंबनाकरके, कुमित्रसेवाजनित निंद्य कुबुद्धिसे और चौरकृत अधिकारसे धन व्यय होता है ॥ ५-८ ॥

चापे व्ययस्थे परवञ्चनानि व्ययो भवेत्पापजनप्रसङ्गात्।
सेवाकृतो जात्यधिकारिपुंसः कृषिप्रसङ्गात्परवञ्चनाद्वा ॥ ९ ॥
नृगे व्ययस्थे च भवेन्नराणां व्ययस्तु पापाशनकस्य जातः।
स्ववर्गपूजानिरतस्तथाऽल्पकृषिर्विहीनश्च विगर्हितश्च ॥ १० ॥
घटे व्ययस्थे सुरसिद्धविप्रतपस्विनो वन्दिभवो व्ययश्च।
पुंसां कुपुत्राशनपानजातस्तथा विवादेन विनिर्गतेन ॥ ११ ॥
ये स्थानचिन्तासु पुरा प्रदिष्टा योगा मया तान्परिगृह्य शास्त्रात्।
योगा विचिन्त्याः सुधिया ततस्तु वाच्यानि नॄणां हि शुभाशुभानि॥

जिसके बारहवें भावमें धनुराशि स्थित होय तो उस मनुष्यका दुष्टजनके प्रसंगसे सेवकोंकरके, जाति अधिकारी मनुष्योंकरके, कृषिप्रसंगसे और परवंचनासे धनका खर्च होता है। जिसके मकर राशि बारहवें भावमें स्थित होय तो उस मनुष्यका पाप

अशनकरके धनखर्च होता है और अपने जातिवर्गके पूजामें रत, थोडी खेतीवाला, विहीन और विगर्हित वह मनुष्य होता है । जिसके कुम्भराशि व्ययभावमें स्थित होय तो उस मनुष्यका देवता सिद्ध ब्राह्मण तपस्वी बन्दीजनोंके निमित्त धन खर्च होता है। कुपुत्र अशनपान करके तथा विवादकरके और विनिर्गतकरके धनका खर्च होता है । पूर्व कहेहुए स्थानचिन्ता योगोंका शास्त्रद्वारा ग्रहणकर तथा योगोंको चिन्तनकरके पण्डितजन मनुष्योंका शुभाशुभ फल कहैं ॥ ९-१२ ॥

इति द्वादशभावस्थितराशिफलम् ॥

अथ द्वादशराशिगतग्रहफलानि ।

तत्रादौ रविफलम् ।

भवति साहसकर्मकरो नरो रुधिरपित्तविकारकलेवरः ।
क्षितिपतिर्मतिमान्हितकृत्सदा सुसहसो महसामधिपे क्रिये ॥ १ ॥
परिमलैर्विमलैः कुसुमासनैः सुवसनैः पशुभिः सुखमद्भुतम् ।
गवि गतो हि रविर्जलभीरुतां विहितमाहितमादिशते नृणाम् ॥ २ ॥
गणितशास्त्रकलामलशीलतासुललितोऽद्भुतवाक् प्रथितो भवेत् ।
दिनपतौ मिथुने ननु मानवो विनयतानयतातिशयान्वितः ॥ ३ ॥
सुजनताराहितः किल कालविज्जनकवाक्यविलोपकरो नरः ।
दिनकरे तु कुलीरगते भवेत्सधनताधनतासहितोऽधिकः ॥ ४ ॥

जो मेषराशिका सूर्य होय तो वह मनुष्य साहसकर्म करनेवाला और रुधिरसे उत्पन्न रोगवाला, पित्तविकारसे युक्त शरीरवाला और भूमिका अधिकार पानेवाला, सदा हित करनेवाला, बुद्धिमान् और साहसी होता है । जिसके जन्ममें सूर्य वृषराशिका होय वह उत्तम सुगन्ध पुष्प शय्या और उत्तम वस्त्र धारण करनेवाला, पशुओं करके अद्भुत सुख पानेवाला और जलसे भय पानेवाला होता है । जिसके मिथुनराशिका सूर्य होय वह गणितशास्त्रमें प्रवीण, उत्तम शील स्वभाववाला, उत्तम वार्ता कथन करनेवाला, विख्यात कीर्तिवाला और विनययुक्त, सबसे हित करनेवाला होता है । जिसके सूर्य कर्कराशिका जन्मसमयमें हो वह क्रूरस्वभावयुक्त और पितासे विरोध करनेवाला और निरन्तर धनसे युक्त होता है ॥ १-४ ॥

स्थिरमतिश्च पराक्रमतोऽधिको विभुतयाद्भुतकीर्तिसमन्वितः ।
दिनकरे करिवैरिगते नरो नृपरतः परतोषकरो भवेत् ॥ ५ ॥

दिनपतौ युवतौ समवस्थिते नरपतेश्च नरो द्रविणं लभेत्।
मृदुवचाः श्रुतगेयपरायणः समहिमामहिमापहिताहितः॥ ६॥
नरपतेरतिभीतिमहर्निशं जनविरोधविधानमघं दिशेत्।
कलिमनाः परकर्मरतिर्घटे दिनमणिर्न मणिर्द्रविणादिकम्॥ ७॥
कृपणतां कलहं च भृशं रुषं विषहुताशनशस्त्रभयं दिशेत्।
अलिगतः पितृमातृविरोधितां दिनकरो न करोति समुन्नतिम्॥८॥

जिसके सूर्य सिंहराशिका जन्मसमयमें हो वह स्थिरबुद्धिवाला और अधिक पराक्रमी, बडी कीर्ति पानेवाला, राजसेवी और परोपकारी होता है। जिसके सूर्य कन्याराशिका जन्ममें होवे वह राजासे धन पानेवाला, कोमलवाक्य गान श्रवण करनेवाला और महामहत्त्वको पानेवाला होता है। जिसके तुलाराशिका सूर्य जन्मसमयमें हो वह राजासे निरन्तर भय पानेवाला और सबसे विरोध करनेवाला, पापकर्म करनेवाला, कलहमें प्रवीण और परकर्म करनेवाला होता है। जिसके सूर्य वृश्चिकराशिका होय वह बडा कृपण, निरन्तर कलह करनेवाला, विष, शस्त्र और अग्निसे भय पानेवाला, मातापितासे विरोध करनेवाला और उन्नतिको न पानेवाला होता है॥५–८॥

स्वजनकोपमतीव महन्मतिं बहुधनं हि धनुर्धरगो रविः।
स्वजनपूजनमादिशते नृणां सुमतितो मतितोषविवर्द्धनम्॥ ९॥
अटनतां निजपक्षविपक्षतां सधनतां कुरुते सततं नृणाम्।
मकरराशिगतो विगतोत्सवं दिनविभुर्न विभुत्वसुखं दिशेत्॥१०॥
कलशगामिनि पङ्कजिनीपतौ शठतरो हितरो गतसौहृदः।
मलिनताकलितो रहितः सदा करुणयारुणयार्तसुखी भवेत्॥११॥
बहुधनं क्रयविक्रयतः सुखं निजजनादपि गुह्यमहाभयम्।
दिनपतौ झषगेऽतिमतिर्भवेद्विभुतयाद्भुतयायतकीर्तिभाक्॥१२॥

जिसके सूर्य धनुराशिका होय वह पुरुष स्वजनोंसे कोपयुक्त, बडा बुद्धिमान्, बडा धनी, मित्रोंका हितकारी और संतोषी होता है। जिसके जन्मसमयमें सूर्य मकरराशिका होय वह भ्रमण करनेवाला, अपने कुटुम्बियोंसे विरोध करनेवाला, धनयुक्त उत्सवरहित और विभुतारहित होता है। जिसके कुंभ राशिके सूर्य होय वह अत्यन्त शठ और सबसे दुर्भाव रखनेवाला, किसीका मित्र नहीं, सदा मलिनवेष रहनेवाला, दयारहित और सुखी होता है। जिसके सूर्य मीनराशिका होय वह व्यापारद्वारा

अधिक धन पानेवाला सुखी और अपने निजजनोंसे भय पानेवाला, बुद्धिमान् और अतुल कीर्तिमान् होता है ॥ ९-१२ ॥ इति रविफलम् ॥

अथ चन्द्रफलम्।

स्थिरधनो रहितः सुजनैर्नरः सुतयुतः प्रमदाविजितो भवेत्।
अजगते द्विजराज इतीरितं विभुतयाद्भुतया स्वसुकीर्तिभाक् ॥ १ ॥
स्थिरगतिं सुमतिं कमनीयतां कुशलतां हि नृणामुपभोगताम्।
वृषगतो हिमगुर्भृशमादिशेत्सुकृतितः कृतितश्च सुखानि च ॥ २ ॥
प्रियकरः सुरकर्मयुतो नरः सुरतसौख्यभरो युवतिप्रियः।
मिथुनराशिगतो हिमगुर्भवेत्सुजनताजनताकृतगौरवः ॥ ३ ॥
श्रुतकलावलनिर्मलवृत्तयः कुसुमगन्धजलाशयकेलयः।
किल नरास्तु कुलीरगते विधौ वसुमतीसुमतीप्सितलब्धयः ॥ ४ ॥

जिसके जन्मसमयमें मेषराशिका चन्द्रमा होय वह पुरुष धनसंचय रहित, पुत्रादि सुख संपन्न, स्त्रीजित और उत्तम कीर्तिवाला होता है। जिसके वृषराशिका चन्द्रमा होय वह स्थिरगतिवाला, बुद्धिमान्, चतुर, कमनीय, अनेक भोगयुक्त, अच्छे कर्म करनेवाला और निरन्तर सुखी होता है। जिसके मिथुनराशिका चन्द्रमा होय वह सबसे प्रीति करनेवाला, सुरकर्मकरके युक्त, स्त्रियोंके संगसे विषयमें सुख पानेवाला, स्त्रियोंको प्रिय और सबसे स्नेह करनेवाला होता है। जिसके कर्कराशिका चन्द्रमा जन्मकालमें होय वह पुत्रादिसुखसे युक्त और अनेक चतुराईकी कलामें निपुण, सुगंधपुष्पका धारण करनेवाला और जलक्रीडा करनेवाला और पृथ्वीसे धन पैदा करनेवाला होता है ॥ १-४ ॥

अचलकाननयानमनोरथं गृहकलिं विकलोदरपीडनम्।
द्विजपतिर्मृगराजगतो नृणां वितनुते तनुते यशहीनताम् ॥ ५ ॥
युवतिगे शशिनि प्रमदाजनैः प्रवलकेलिविलासकुतूहलैः।
विमलशीलसुताजननोत्सवः सुविधिना विधिना सहितः पुमान् ॥ ६ ॥
वृषतुरङ्गमविक्रयवान्क्रये द्विजसुरार्चनदानमतिः पुमान्।
शशिनि तौलिगते बहुदारभाग्विभवसंभवसंचितविक्रमः ॥ ७ ॥
शशधरे हि सरीसृपगे नरो नृपदुरोदरजातधनक्षयः।
कलिरुचिर्विबलं खलमानसं कृशमनाः शमनापहतो भवेत् ॥ ८ ॥

जिसके सिंहराशिमें चन्द्रमा होय वह पर्वत और वनमें संचार करनेका मनोरथ रखनेवाला, गृहमें कलहकारी, विकल और पेटकी पीडा पानेवाला और यशहीन होता है। जिसके चन्द्रमा कन्याराशिमें स्थित होय वह स्त्रियोंसे उत्तम केलि विलास कुतूहल करनेवाला, उत्तम शीलस्वभावयुक्त, कन्योत्पत्तिसे सुख पानेवाला और सर्वविधि जाननेवाला होता है। जिसके तुलाराशिका चन्द्रमा जन्ममें स्थित होवे वह बैल घोडे बेंचनेवाला, ब्राह्मण और देवताका पूजनेवाला, दान देनेवाला, बहुतस्त्रियोंका भोग करनेवाला, धन और विभवसंयुक्त होता है। जिसके वृश्चिकराशिका चन्द्रमा होय तो उसका धन राजा हरै और वह कलहको प्रिय करनेवाला, निर्बल, दुष्टमतिवाला, दुर्बल शरीरवाला, चिंतायुक्त और स्त्रीजित होता है ॥ ५-८ ॥

बहुकलाकुशलः किल गीतवान्विमलताकलितः सरलोक्तिभाक्।
शशिधरे हि धनुर्धरगे नरो धनकरो न करोति बहुव्ययम् ॥ ९ ॥
कलितशीतभयः किल गीतवित्तनुरुषा सहितो मदनातुरः।
निजकुलोत्तमवित्तकरः परं हिमकरे मकरे पुरुषो भवेत् ॥ १० ॥
अलसतासहितोऽन्यसुतप्रियः कुशलताकलितोऽतिविचक्षणः।
कलशगामिनि शीतकरे नरः प्रशमितोऽशमितोरुरिपुव्रजात् ॥ ११ ॥
शशिनि मीनगते विजितेन्द्रियो बहुगुणः कुशलोऽनिललालसः।
विमलधीः किल शास्त्रकलादरान्नचलताचलताकलितो नरः ॥ १२ ॥

जिसके धनुराशिमें चन्द्रमा होवे वह अनेक कलाओंमें प्रवीण, गानेवाला, निर्मलबुद्धिवाला, उत्तम वचन कहनेवाला और थोडा धन खर्च करनेवाला होता है। जिसके मकरराशिका चन्द्रमा होय वह जलसे भय पानेवाला, गानविद्यामें निपुण, दुर्बल अंगवाला, कामातुर और अपने कुलमें उत्तम धन करनेवाला होता है। जिसके कुंभराशिमें चन्द्रमा स्थित होय वह बडा आलसी, परपुत्रोंसे प्रीति करनेवाला, निरंतर प्रसन्नतायुक्त, विचक्षण बुद्धिवाला और शत्रुका जीतनेवाला होता है। जिसके मीनराशिका चन्द्रमा होय वह जितेन्द्रिय, बडा गुणी, कुशल, हवामें लालसा रखनेवाला, शास्त्रविद्यामें कुशल और निर्बल शरीरवाला होता है ॥ ९-१२ ॥ इति चन्द्रफलम् ॥

अथ भौमफलम्।

क्षितिपतेः क्षितिमानधनागमैः सुवचसा महसा बहुसाहसैः।
अवनिजः कुरुते सततं शुभं त्वजगतो जगतोऽभिमतं नरम् ॥ १ ॥

गृहधनाल्पसुखं च रिपूदयं परगृहस्थितिमादिशते नृणाम् ।
अवनिजोऽरिरुजो वृषभस्थितः क्षितिसुतोऽतिसुतोद्भवपीडनम् २॥
बहुकलाकलनाकुलजोत्कालिं प्रचलनाप्रियतां च निजस्थलात् ।
ननु नृणां कुरुते मिथुनस्थितः कुतनयस्तनयप्रमुखात्सुखम् ॥३॥
परगृहस्थिरतामतिदीनतां विमतितां शमितां च रिपूद्‌यम् ।
हिमकरालयगे किल मङ्गले प्रबलयाऽबलया कलहं व्रजेत् ॥ ४ ॥

जिसके जन्मकालमें मेषराशिका मंगल स्थित होवे वह राजद्वारसे प्रतिष्ठा धन मान पानेवाला, साहसकर्म करनेवाला और सबका सहाय करनेवाला होता है । जिसके वृषराशिका मंगल होवे वह घरमें थोडा सुख पानेवाला, पराये घरमें निवास करनेवाला और शत्रुजनोंसे सदा भयवाला रहै और पुत्रपक्षसे कष्ट पानेवाला होता है। मिथुनराशिमें मंगल होय वह कुटुम्बीजनोंमें निरन्तर कलह करनेवाला और अपने स्थानसे दूर यात्रा करनेवाला और पुत्रादिकोंसे सुख प्राप्त करनेवाला होता है। जिसके कर्कराशिका मंगल होवे वह पराये घरमें निवास करनेवाला, अत्यन्त दीनभाव, दुष्टमति, बहुत शत्रुजनोंसे भयभीत, स्त्रीजित और स्त्रीसे कलहकारी होता है॥

अतितरां सुतदारसुतान्वितो हतरिपुर्विततोद्यमसाहसः ।
अवनिजे मृगराजगते पुमान् सुनयतानयताभियुतो भवेत् ॥ ५ ॥
स्वजनपूजनताजनताधिको यजनयाजनकर्मरतो भवेत् ।
क्षितिसुते सति कन्यकयान्विते त्ववनितो वनितोत्सवतः सुखी६॥
बहुधनव्ययताङ्गविहीनतागतगुरुप्रियतापरितापितः ।
वणिजि भूमिसुते विकलः पुमानवनितावनितोद्भवदुःखभाक्॥७॥
विषहुताशनशस्त्रभयान्वितः सुतसुतावनितादिमहत्सुखः ।
वसुमतीसुतभाजि सरीसृपे नृपरतः परतश्च जयं व्रजेत् ॥ ८ ॥

जिसके जन्मकालमें सिंहराशिका मंगल पडे वह स्त्रीपुत्रादिकोंसे अत्यन्त सुख पानेवाला, बडा साहसी, शत्रुको जीतनेवाला और विनयभावसे संयुक्त होता है । जिसके जन्ममें मंगल कन्याराशिका होवे वह मित्रोंका सत्कार करनेवाला, बहुत मनुष्योंके साथ सुख पानेवाला, पठनपाठनसे युक्त और स्त्रियोंके उत्सवकर्मसे सुख पानेवाला होता है । जिसके भौम तुलाराशिमें स्थित होय वह बहुत धन खर्च करनेवाला, अंगविहीन और बडे जनोंसे सन्तप्तशरीरवाला और स्त्रीपक्षसे दुःखित

होता है । जिसके वृश्चिकराशिमें मंगल पडा होवै वह विष अग्नि और शस्त्रसे भयभीत रहता है और स्त्रीपुत्रादिकोंसे बडा सुख पानेवाला और सर्वत्र विजय पानेवाला होता है ॥ ९-८ ॥

रथतुरङ्गमगौरवसंयुतः परमरातिजनैः कृतदुःखितः ।
भवति नाऽवनिजे धनुषि स्थिते सुवनितावनिता भवति प्रिया॥९॥
रणपराक्रमता वनितासुखं निजजनप्रतिकूलभयाश्रितः ।
विभवता मनुजस्य धरात्मजे मकरगे करगे चरमो भवेत् ॥ १० ॥
विनयितारहितं सहितं रुजा निजजनप्रतिकूलमलं खलम् ।
प्रकुरुते मनुजं कलशाश्रयः क्षितिसुतोऽतिसुतोद्भवदुःखितम्॥११॥
व्यसनतां खलतामदयालुतां विकलतां चलतां च निजालयात् ।
क्षितिसुतस्तिमिना सुसमन्वितो विमतिना मतिनाशनमादिशेत् ॥

जिसके धनुराशिमें भौम पडे वह बडा धनी, रथ और घोडे इत्यादि वाहनोंसे सुख पानेवाला और शत्रुजनोंकरके दुःखित और श्रेष्ठस्त्रियोंसे प्रीतिभाव और सुखी रहनेवाला होता है । जिसके मकरराशिमें मंगल स्थित होवै वह संग्राममें पराक्रम दिखानेवाला, स्त्रियोंसे सुख पानेवाला और निजजनोंकी प्रतिकूलतासे अधिक भय पानेवाला और धनविभवसे सुख पानेवाला होता है । जिसके कुम्भराशिमें भौम स्थित होवै वह विनयभावसे रहित, रोगयुक्त शरीरवाला, अपने जनोंसे प्रतिकूल, दुष्टमतिवाला और पुत्रादिकोंकी उत्पत्ति होनेमें अत्यन्त दुःखी होता है । जिसके मीनराशिमें मंगल पडे वह व्यसनयुक्त, दुष्ट मतिवाला, दयाहीन, विकलशरीरवाला, अपने स्थानसे दूर यात्रा करनेवाला अनेक विपत्तियुक्त और बुद्धिहीन होता है ॥ ९-१२ ॥

इति भौमफलम् ॥

अथ बुधफलम् ।

खलमतिः किल चञ्चलमानसो बहुलभुक्कलहाकुलितो नरः ।
अकरुणोऽनृणवांश्च बुधे भवेदविगते विगतेप्सितसाधनः ॥ १ ॥
वितरणप्रयतं गुणिनं दिशेद्बहुकलाकुशलं रतिलालसम् ।
धनिनमिन्दुसुतो वृषभस्थितस्तनुजतोऽनुजतोऽतिसुखं नरम् २॥
प्रियवचोरचनासु विचक्षणो द्विजननीतनयः शुभवेषभाक् ।
मिथुनगे जनने शशिनन्दने सदनतोऽदनतोऽपि सुखं नरम् ॥३॥

कुचरितानि च गीतकथादरो नृपरुचिः परदेशगतिर्नृणाम् ।
किल कुलीरगते शशभृत्सुते सुरततारतता नितरां भवेत् ॥ ४ ॥

जिसके जन्मकालमें मेषराशिका बुध बैठे वह दुष्टस्वभाववाला, चंचलचित्त, अधिक भोजन करनेवाला, कलहकारी, निर्दयी, निर्ऋणी और चिंतितपदार्थोंको साधन करनेवाला होता है । जिसके वृषराशिमें बुध बैठे वह गुणग्राहक और गुणीजनोंसे प्रीति रखनेवाला बहुत स्त्रियोंसे भोग करनेवाला सदा धनवान् और भ्रातृ पुत्रादिकोंसे सुख पानेवाला होता है । जिसके मिथुनराशिमें बुध स्थित होवे वह प्रियवचन बोलनेवाला, मातासे सुख पानेवाला, सुन्दर भेषवाला और सदनसे अशनसे निरन्तर सुखी रहनेवाला होता है । जिसके कर्कराशिमें बुध बैठा होवे वह कुत्सित चरित्र करनेवाला और कथा गानका निरादर करनेवाला राजसेवी, परदेशका रहनेवाला और निरन्तर स्त्रीभोगकी इच्छा रखनेवाला होता है ॥ १-४ ॥

अनृततासहितं विमतिं परं सहजवैरकरं कुरुते नरम् ।
युवतिहर्षपरं शशिनः सुतो हरिगतोऽरिगतोन्नतिदुःखितम् ॥५॥
सुवचनानुरतश्चतुरो नरो लिखनकर्मपरो हि वरोन्नतिः ।
शशिसुते युवतिं च गते सुखी सुनयनानयनाञ्चलचेष्टितैः ॥ ६ ॥
अनृतवाग्व्ययभाक्खलु शिल्पवित्कुचरिताभिरतिर्बहुजल्पकः ।
व्यसनयुङ्मनुजः सहिते बुधे वितुलयच्चलगान्वसतीयुतः ॥७॥
कृपणतातिरतिप्रणयश्रमो विहितकर्मसुखोपहतिर्भवेत् ।
धवलभानुसुतेऽलिगते क्षतिस्त्वलसतोलसतोऽपि च वस्तुनः ॥८॥

जिसके बुध सिंहराशिमें बैठा होवे वह झूँठ बोलनेवाला, हीनमतिवाला और बन्धुजनोंसे बैरभाव रखनेवाला, स्त्री जनोंसे प्रीति करनेवाला और हमेशा दुःख पानेवाला होता है। जिसके बुध कन्याराशिमें स्थित होवे वह अच्छे वचन बोलनेवाला, चतुर, लिखनेमें बडा प्रवीण, निरन्तर सुख पानेवाला और उत्तम स्त्रियोंसे प्रीति करनेवाला होता है । जिसके तुलाराशिमें बुध स्थित होवे वह मिथ्यावादी और अधिक खर्च करनेवाला और कारीगरीमें प्रवीण, बुरे काममें मन लगानेवाला, बहुत बोलनेवाला और व्यसनी होता है । जिसके वृश्चिक राशिमें बुध बैठा हुआ हो वह कृपण और अच्छे कामोंसे विमुख, बहुत परिश्रम करनेवाला और दुःख पानेवाला होता है ॥५-८॥

वितरणप्रणयो बहुवैभवः कुलपतिश्च कलाकुशलो भवेत् ।
शशिसुतेऽत्र शरासनसंस्थिते विहितया हितया रमयान्वितः॥९॥

रिपुभयेन युतः कुमतिर्नरः स्मरविहीनतरः परकर्मकृत् ।
मकरगे सति शीतकरात्मजे व्यसनतः स नतः पुरुषो भवेत् १०॥
गृहकलिं कलशे शशिनन्दनो वितनुते तनुतामनुदीनताम् ।
धनपराक्रमधर्मविहीनतां विमतितामतितापितशत्रुभिः ॥ ११ ॥
परधनादिकरक्षणतत्परो द्विजसुरानुचरो हि नरो भवेत् ।
शशिसुते पृथुरोमसमाश्रिते सुवदनावदनानुविलोकनः ॥ १२ ॥

जिसके धनुराशिमें बुध बैठा होय वह बडा नम्र, विभवयुक्त, अपने कुलका पालन करनेवाला, कारीगरीमें प्रवीण और स्त्रियोंसे सुख पानेवाला होता है। जिसके मकरराशिमें बुध बैठा होय वह निरन्तर शत्रुसे भयभीत, बुद्धिसे रहित और बलहीन अल्पकाम और पराया काम करनेवाला होता है। जिसके कुम्भराशिमें बुध बैठा होय वह निरन्तर घरमें कलह करनेवाला, अहंकार युक्त, धन और पराक्रमसे हीन, धर्मरहित, शत्रुओंसे दुःख पानेवाला और बुद्धिहीन होता है। जिसके मीन-राशिमें बुध बैठा होवै वह पराये धनकी रक्षा करनेवाला और ब्रह्मभक्त देवताओंका पूजनेवाला और उत्तमस्त्रियोंसे प्रीति करनेवाला होता है ॥ ९-१२ ॥ इति बुधफलम्॥

अथ गुरुफलम्।

बहुतरां कुरुते समुदारतां सुचरितानि च वैरिसमुन्नतिम् ।
विभवतां च मरुत्पतिपूजितः क्रियगतोयगतोऽनुमतिप्रदः ॥ १ ॥
द्विजसुरार्चनभक्तिविभूतयो द्रविणवाहनगौरवलब्धयः ।
सुरगुरौ वृषभे बहुवैरिणश्वरणगा रणगाढपराक्रमः ॥ २ ॥
कवितया सहितः प्रियवाक्शुचिर्विमलशीलरुचिर्निपुणः पुमान् ।
मिथुनगे सति देवपुरोहिते सहितताहिततासहितैर्भवेत् ॥ ३ ॥
बहुधनागमनो मदनोन्नतिर्विविधशास्त्रकलाकुशलो नरः ।
प्रियवचाश्च कुलीरगते गुरौ चतुरगैस्तुरगैः करिभिर्युतः ॥ ४ ॥

जिसके जन्मकालमें बृहस्पति मेषराशिमें स्थित होय वह बडा उदारचित्त, सुन्दर-चरित्रवाला, बहुत शत्रुओंवाला तथा पिछली बुद्धिवाला होता है। जिसके वृषराशिमें बृहस्पति बैठा होय वह देवता और ब्राह्मणोंका पूजनेवाला, भक्तियुक्त, धन वाहन और गौरवकरके सहित और रणमें उत्तम पराक्रमकरके शत्रुओंको जीतनेवाला होता है। जिसके मिथुनराशिमें बृहस्पति बैठा होय वह काव्यका रचनेवाला, प्रियवचन बोलनेवाला, पवित्र, उत्तम शीलवाला, निपुण और सबसे हित रखनेवाला होता है।

जिसके कर्कराशिमें बृहस्पति बैठा होय वह बडा धनी, उत्तम स्थानमें निवास करनेवाला, अनेक शास्त्रकलाओंमें प्रवीण, अच्छे वचन बोलनेवाला, शत्रुसे धन पानेवाला और हाथी घोडोंकरके युक्त होता है ॥ १-४ ॥

अचलदुर्गवनप्रभुतोर्जितो दृढतनुर्ननु दानपरो भवेत् ।
अरिविभूतिहरो हि नरो युतः सुवचसा वचसामधिपे गुरौ ॥ ५ ॥
कुसुमगन्धसदंबरशालिता विमलता धनदानमतिर्भृशम् ।
सुरगुरौ सुतया सति संयुते रुचिरता चिरतापितशत्रुता ॥ ६ ॥
सुतनयो जपहोममहोत्सवो द्विजसुरार्चनदानमतिर्भवेत् ।
वणिजजन्मपवित्रशिखंडिजे चतुरतातुरतासहितोऽरिणा ॥ ७ ॥
धनविनाशनदोषसमुद्भवैः कृशतनुर्बहुदंभपरो नरः ।
अलिगते सति देवपुरोहिते भवनतो वनतोऽपि च दुःखभाक् ॥८॥

जिसके सिंहराशिमें बृहस्पति बैठा होय वह दुर्ग, वन और कोटका स्वामी, बडा पराक्रमी, पुष्ट शरीरवाला, बडा दानी, शत्रुओंका धन हरनेवाला और अच्छे वचन बोलनेवाला होता है । जिसके कन्याराशिमें बृहस्पति बैठा होवे वह सुगंध व पुष्पमालाओंके धारण करनेवाला, उत्तम वस्त्र पहिरनेवाला, धनवाला और दान करनेवाला, सदा सुखी और शत्रुरहित होता है । जिसके तुलाराशिमें बृहस्पति बैठा होय वह सुंदर पुत्रोंवाला, जप होममें तत्पर, देवता और ब्राह्मणोंका पूजनेवाला, दानी, चतुरतामें रत और शत्रुओं करके सहित होता है । जिसके वृश्चिकराशिमें बृहस्पति बैठा होय वह धनसे हीन, दुर्बल शरीरवाला, मिथ्यावादी, पाखंडी और घरमें तथा वनमें भी दुःख भोगनेवाला होता है ॥ ५-८ ॥

वितरणप्रणयो बहुवैभवं ननु धनान्यपि वाहनसञ्चयः ।
धनुषि देवगुरौ हि मतिर्भवेत्सुरुचिरा रुचिराभरणानि च ॥ ९ ॥
हतमतिः परकर्मकरो नरः स्मरविहीनतरो भयरोषभाक् ।
सुरगुरौ मकरे विदधाति नो जनमनोनमनोरथसाधनम् ॥ १० ॥
गदयुतः कुमतिर्द्रविणोज्झितः कृपणतानिरतः कृतकिल्बिषः ।
घटगते सति देवपुरोहिते कदशनो दशनोदरपीडितः ॥ ११ ॥
नृपकृपात्तधनो वदनोन्नतिः सदनसाधनदानपरो नरः ।
सुरगुरौ तिमिना सहिते सतामनुमतोऽनुमतोत्सवदो भवेत् ॥ १२ ॥

जिसके धनुराशिमें बृहस्पति बैठा होय वह बडा विनीत, बहुत वैभव धन और वाहनादिसे युक्त और उत्तम आभरणों करके सहित होता है। जिसके मकर-राशिमें बृहस्पति बैठा होय वह बुद्धिहीन, पराया काम करनेवाला, स्मर (कामदेव) करके रहित, भययुक्त, क्रोधी और मनोरथको न सिद्ध करनेवाला होता है। जिसके कुंभराशिमें बृहस्पति बैठा होय वह रोगयुक्त, दुष्टमतिवाला, धनहीन, कृपण, पाप, कर्म करनेवाला, निंदित दांतोंवाला और दांत तथा पेटकी पीडा पानेवाला होता है। जिसके मीनराशिमें बृहस्पति बैठा होय वह राजाका मंत्री, उत्तम वदनवाला, धनी और दान देनेवाला, उत्तम स्थानमें निवास करनेवाला और प्रसन्न चित्त होता है॥ ९-१२

इति गुरुफलम्॥

अथ शुक्रफलम्।

भवनवाहनवृन्दपुराधिपः प्रचलनाप्रियताविहितादरः।
यदि च संजनने हि भवेत्कविः कवियुतो वियुतो रिपुभिर्नरः॥१॥
बहुकलत्रसुतोत्सवगौरवं कुसुमगन्धरुचिः कृषिनिर्मितः।
वृषगते भृगुजे कमला भवेदविरला विरला रिपुमण्डली॥ २॥
भृगुसुते जनने मिथुने स्थिते सकलशास्त्रकलामलकौशलम्।
सरलता ललिता किल भारती समधुरा मधुरान्नरुचिर्भवेत्॥ ३॥
द्विजपतेः सदने भृगुनन्दने विमलकर्ममतिर्गुणसंयुतः।
जनमलं सकलं कुरुते वशं सकलया कलयाऽपि गिरा नरः॥ ४॥

जिसके जन्मकालमें शुक्र मेषराशिका होय वह स्थान वाहनादि वृन्द करके युक्त, ग्रामोंका स्वामी, धनी, सर्वत्र आदर पानेवाला, कविता करनेवाला और शत्रुओंकरके हीन होता है। जिसके वृषराशिमें शुक्र बैठा होय वह बहुत कलत्र सुत उत्सव गौरव करके युक्त, कुसुम गंधादिमें रुचि करनेवाला, खेती करनेवाला, बहुत स्त्रियोंसे भोग करनेवाला और विरल शत्रुओंवाला होता है। जिसके मिथुनराशिमें शुक्र बैठा होय वह विद्यावान्, सर्व शास्त्रोंकी कलाओंमें निपुण, बडा चतुर, व्याख्या देनेवाला, उत्तम कर्म करनेवाला, उत्तम भोजन करनेवाला और बडा गुणी होता है। जिसके शुक्र कर्कराशिमें बैठा होय वह उत्तम कर्ममें बुद्धि लगानेवाला, गुणवान्, सर्व जनोंको वश करनेवाला और सुंदर वचन बोलनेवाला होता है॥ १-४॥

हरिगते सुरवैरिपुरोहिते युवतितो धनमानसुखानि च।
निजजनव्यसनान्यपि मानवस्त्वहिततो हिततोषमनुव्रजेत्॥ ५॥

भृगुसुते सति कन्यकयाऽन्विते बहुधनं खलु तीर्थमनोरथः ।
कमलया पुरुषोऽपि विभूषितस्त्वमितया मितयापि गिराऽन्वितः ६
कुसुमवस्त्रविचित्रधनान्वितो बहुगमागमनो ननु मानवः ।
जननकालतुलाकलनं यदा सुकविना कविनायकतां व्रजेत् ॥७॥
कलहघातमतिं जननिन्द्यतां प्रजनतामयतां नियतां नृणाम् ।
व्यसनतां जननेऽलिसमाश्रितः कविरलं विरलं कुरुते धनम् ॥८॥

जिसके सिंहराशिमें शुक्र बैठा होय वह स्त्रीद्वारा धन मान और सुखको पानेवाला, अपने जनोंसे कलह करनेवाला और शत्रुओंसे हित और संतोषका पानेवाला होता है। जिसके कन्याराशिमें शुक्र बैठा होय वह बडा धनी, तीर्थ करनेवाला, बहुत श्रीकरके विभूषित और थोडी बात करनेवाला होता है । जिसके तुलाराशिमें शुक्र बैठा होय वह उत्तम वस्त्र तथा उत्तम सुगन्ध, पुष्पमालादिका धारण करनेवाला, धनवान्, सबसे प्रिय वचन बोलनेवाला और कविनायक होता है । जिसके वृश्चिकराशिमें शुक्र बैठा हो वह कलह करनेवाला, जीव हिंसा करनेवाला और सबकी निन्दा करनेवाला, निषिद्ध कर्म करनेवाला, व्यसन युक्त और कभी २ धन पानेवाला होता है ॥५-८॥

युवतिसूनुधनागमनोत्सवं सचिवतां नियतं शुभशीलताम् ।
धनुषि कार्मुकगः कविनन्दनः कविरतिं विरतिं कुरुते नृणाम्॥९॥
अभिरतस्तु जराङ्गनया नृणां व्ययभयात्कृशतामतिचिन्तया ।
भृगुसुते मृगराशिगते सदा कविजने विजनेऽपि मतिर्भवेत् ॥ १०॥
उशनसः कलशे जनुषि स्थितौ वसनभूषणभोगविहीनता ।
विमलकर्ममहालसता नरैरुपगताऽपगतापि रमा भवेत् ॥ ११ ॥
भृगुसुते सति मीनसमन्विते नरपतेर्विभुता वितता भवेत् ।
रिपुसमाक्रमणद्रविणागमो वितरणे तरणे प्रणयो नृणाम् ॥ १२ ॥

जिसके धनुराशिमें शुक्र बैठा होय वह स्त्री पुत्रोंसे धन उत्सवको पानेवाला, राजमंत्री, नायक, उत्तम शील स्वभावयुक्त, कवितामें रति करनेवाला और विरतिको करनेवाला होता है । जिसके मकरराशिमें शुक्र बैठा होय वह वृद्धास्त्रीसे भोग करनेवाला, व्यय भयसे दुर्बलता और अधिक चिन्ताको प्राप्त होनेवाला, कवीश्वरोंसे प्रीति

करनेवाला और एकान्त निवास करनेवाला होता है। जिसके कुंभराशिमें शुक्र बैठा होय वह वस्त्र-भूषण और भोगकरके रहित, अच्छे कर्म करनेमें आलसी और उसके पास लक्ष्मी आवे फिर चली भी जाय। जिसके मीनराशिमें शुक्र बैठा होय वह राजासे विभव, धनको पानेवाला, शत्रुओंको जीतकरके धन पानेवाला और निरन्तर सुखी होता है॥

इति शुक्रफलम्॥

अथ शनिफलम्।

धनविहीनतया तनुता तनौ जनविरोधितयेप्सितनाशनम्।
क्रियगतेऽर्कसुते सुजनैर्नृणां विषमतासमताशमनं भवेत्॥ १॥
युवतिसौख्यविनाशनतां भृशं पिशुनसंगरुचिं मतिविच्युतिम्।
तनुभृतां जनने वृषभस्थितो रविसुतो विसुतोत्सवमादिशेत्॥२॥
प्रबलता विमलत्वविहीनता भवनबाह्यविलासकुतूहलम्।
व्रजति नो मिथुनोपगते सुते दिनविभोर्न विभोर्लभते सुखम्॥३॥
शशिनिकेतनगामिनि भानुजे तनुभृतां कृशतां भृशमम्बया।
वरविलासकरा कमला भवेदविरलं विरलं रिपुमण्डलम्॥ ४॥

जिसके शनि जन्मसमय मेषराशिमें स्थित होय वह धनहीन, दुर्बल शरीरवाला, जनोंसे विरोधके कारण चिंतित कार्य नाशको प्राप्त और सुजनोंकरके विषमता, समता शमनको प्राप्त होवे जिसकी ऐसा मनुष्य होता है। जिसके वृषराशिमें शनि बैठा होय वह स्त्रीसुखसे रहित और चुगुलखोरोंका संग रखनेवाला, बुद्धिहीन और सुतोत्सवकरके रहित होता है। जिसके मिथुनराशिमें शनि बैठा होय वह प्रबलता विमलत्वकरके रहित, घरसे बाहर हास्य विलास करनेवाला और दुःख पानेवाला होता है। जिसके कर्कराशिमें शनि बैठा होय वह दुर्बलशरीरवाला, मातृसुखसे रहित, उत्तम विलासदायक स्त्रीवाला और शत्रुओंका जीतनेवाला होता है॥ १-४॥

लिपिकलाकुशलश्च कलिप्रियो विमलशीलविहीनतरो नरः।
रविसुते रविवेश्मनि संस्थिते हतनयस्तनयप्रमदार्तिभाक्॥ ५॥
विहितकर्मणि शर्म कदापि नो विनयतापहतश्चलसौहृदः।
रविसुते सति कन्यकयाऽन्विते विबलताबलतासहितो भवेत्॥६

निजकुलेऽवनिपालबलान्वितः स्मरबलाकुलितो बहुदानदः ।
जलजिनीशसुते तुलयाऽन्विते नृपकृतोपकृतो हि नरो भवेत् ॥७॥
विषहुताशनशस्त्रभयान्वितो धनविनाशनवैरिगदार्दितः ।
विकलिताकलितोऽलिसमन्विते रविसुते विसुतेष्टसुखो नरः ॥८॥

जिसके सिंहराशिमें शनि बैठा होय वह लिखनेमें बडा प्रवीण और सब जनोंसे कलह करनेवाला, उत्तम शील स्वभावकरके रहित, नीतिरहित, पुत्र और स्त्रीसे दुःख पानेवाला होता है। जिसके कन्याराशिमें शनि बैठा होय वह श्रेष्ठ कर्मसे रहित, दुष्टशील और मित्रोंसे विरोध करनेवाला और निर्बल शरीरवाला होता है । जिसके तुलाराशिमें शनि बैठा होय वह राजबलकरके युक्त, कामी, दानी और राजासे उपकार पानेवाला होता है । जिसके वृश्चिकराशिमें शनि बैठा होय वह विषसे, अग्नि और शस्त्रसे भय पानेवाला, धन नाश करनेवाला, शत्रुसे रोगसे दुःख पानेवाला और कलहके कारण विकल होता है ॥ ५–८ ॥

रविसुतेन युते सति कार्मुके सुतगणैः परिपूर्णमनोरथः ।
प्रथितकीर्तिसुवृत्तिपरो नरो विभवतो भवतोषयुतो भवेत् ॥ ९॥
नरपतेरतिगौरवतां व्रजेद्रविसुते मृगराशिगते नरः ।
अगुरुणा कुसुमैर्मृगजातया विमलया मलयाचलजैः सुखम् १०॥
ननु जितो रिपुभिर्व्यसनावृतैर्विहितकर्मपराङ्मुखताऽन्वितः ।
रविसुते कलशेन समन्विते सुसहितः सहितः प्रचयैर्नरः ॥११॥
विनयताव्यवहारसुशीलतासकललोकगृहीतगुणो नरः ।
उपकृतो निपुणस्तिमिसंश्रिते रविभवे विभवेन समन्वितः॥१२॥

जिसके धनुराशिमें शनि बैठा होय वह पुत्रादिकोंकरके पूर्ण मनोरथवाला, प्रसिद्ध कीर्ति और उत्तम वृत्तिवाला होता है और विभवसमेत निरन्तर सुखी रहता है। जिसके मकरराशिमें शनि बैठा होय वह राजाके समान गौरवको प्राप्त होता है और अगुरु कुसुमादि सुगन्ध लेपनसे प्रसन्न चित्तवाला और सुखी होता है । जिसके कुंभराशिमें शनि बैठा होय वह शत्रुओंसे जीता हुआ, व्यसनी, विहितकर्मसे पराङ्मुख रहनेवाला और प्रसन्नताकरके युक्त होता है । जिसके मीनराशिमें शनैश्चर बैठा होवै वह विनयता और व्यवहारसुशीलताकरके संपूर्ण गुणोंको ग्रहण करनेवाला, उपकारमें निपुण और विभवकरके युक्त होता है ॥९–१२ ॥

इति द्वादशराशिस्थग्रहफलानि ॥

अथ मित्रामित्रकथनम् ।

विनापि मैत्रीं खलु खेचराणां न ज्ञायते ह्युत्तममध्यहीनाः ।
दिशादिकानां विदिशादिकाश्च तस्मात्प्रवक्ष्ये खलु मैत्रिचक्रम् ॥ १ ॥

विना मैत्रीचक्र ग्रहोंका उत्तम, मध्य, हीन बल तथा दिशा विदिशाका ज्ञान नहीं होता है इस कारण मैत्रीचक्र अब कहता हूं ॥ १ ॥

अथ स्वाभाविकादिमैत्रीकथनम् ।

शत्रू मन्दसितौ समश्च शशिजो मित्राणि शेषा रवेस्तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः । जीवेन्दूष्णकराः कुजस्य सुहृदो ज्ञोऽरिः सितार्की समौ मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे ॥ २ ॥ सूरेः सौम्यसितावरी रविसुतो मध्ये परे त्वन्यथा सौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी । शुक्रज्ञौ सुहृदौ समः सुरुगुरुः सौरस्य चान्येऽरयस्तत्काले च दशायबन्धुसहजस्वान्त्येषु मित्रस्थितः ॥ ३ ॥ मित्रमुदासीनोऽरिर्व्याख्यायते निसर्गभावेन । तेऽतिसुहृन्मित्रसमास्तत्कालमुपस्थिताश्चिन्त्याः ॥ ४ ॥ मूलत्रिकोणषट्कोणनिधनैकराशिसमसप्तमगाः । एकैकस्य यथाभविता तात्कालिका रिपवः ॥ ५ ॥

सूर्यके शुक्र शनि शत्रु, बुध सम, शेष अर्थात् चंद्र मंगल बृहस्पति मित्र हैं चन्द्रमाके बुध सूर्य मित्र, अन्य (शेष) सम हैं, शत्रु कोई नहीं । मंगलके गुरु चन्द्र सूर्य मित्र. बुध शत्रु. शुक्र शनि सम हैं । बुधके सूर्य शुक्र मित्र. चन्द्र शत्रु और शेष सम हैं । बृहस्पतिके बुध शुक्र शत्रु. शनि सम. शेष मित्र हैं । शुक्रके बुध शनि मित्र. मंगल बृहस्पति सम. शेष शत्रु हैं । शनिके शुक्र बुध मित्र. बृहस्पति सम. अन्य शेष शत्रु हैं । तात्कालिक मैत्रीचक्र बनानेके निमित्त दशवें, ग्यारहवें, चौथे, तीसरे और दूसरे बारहवें स्थानमें स्थित ग्रहके परस्पर मित्र होते हैं । इस प्रकार स्वाभाविक मित्र सम और शत्रुओंका विचारकरके फिर तत्काल उपस्थित ग्रहोंके मित्र सम शत्रुओंका चिंतन करै । मूलत्रिकोणमें स्थित ग्रहभी मित्र होते हैं यह किसी आचार्यका मत है और नववें पांचवें आठवें छठे पहिले और सातवें स्थानस्थित ग्रह तात्कालिक शत्रु होते हैं ॥ २-५ ॥

अथ स्वाभाविक (नैसर्गिक) मैत्रीचक्रम् ।

ग्रहाः	सू	च	मं	बु	बृ	शु.	श	रा	के
मित्र	च.मं बृ	सू.बु	बृ.चं सू	सू.शु.	सू. चं. मं	बु.श रा	शु.बु रा	बु.शु श	बु.शु श
सम	बु	मं.बृ शु.श	शु.श रा	मं.श बृ रा	श.रा	बृ.मं	बृ.	बृ	बृ
शत्रु	शु.श रा	००	बु	चं	बु.शु	सू.चं	सू.चं मं	सू.चं मं	सू.चं मं

अथ तात्कालिकपंचधा मैत्री ।

तत्कालमित्रं तु निसर्गमित्रं द्वयं भवेत्तत्त्वधिमित्रसंज्ञम् ।
तथैव शत्रोरधिशत्रुसंज्ञमेकत्र शत्रुः समतामुपैति ॥ ६ ॥

जो ग्रह तात्कालिकमित्र और नैसर्गिक मित्र हो तो वह ग्रह अधिमित्र होता है. जो ग्रह तत्काल मैत्रीमें शत्रु हो और नैसर्गिकमें भी शत्रु हो वह अधिशत्रु होता है. जो ग्रह एक जगह मित्र हो और दूसरी शत्रु हो वह ग्रह समभावको प्राप्त होता है और समशत्रु हो तो शत्रु मित्र सम हो तो मित्र मानना चाहिये ॥ ६ ॥

अथोदाहरणार्थं कस्यचिज्जन्माङ्गं लिख्यते— इष्टं; ८।१० उ. भा, पदे भयातं ३०।४६भभोग ६६।१६ मार्य

यहां सूर्यका चन्द्रमा नैसर्गिक मित्र है और चक्रमें चन्द्रमा सूर्यसे दशवें है. इस कारण तात्कालिक मित्र हुआ. अब दोनों जगह मित्र २ होनेसे तात्कालिक सूर्यका चन्द्रमा अधिमित्र हुआ; फिर सूर्यका मंगल नैसर्गिकमें मित्र है और चक्रमें सूर्यसे छठे है इस कारण शत्रु है तो मित्र शत्रु होनेसे तात्कालिक सम हुआ इसी प्रकार बुध सूर्यका नैसर्गिकमें सम है और तात्कालिक बारहवें मित्र है तो तात्कालिकमें बुध सूर्यका सम-मित्र होनेसे मित्र हुआ; नैसर्गिकमें बृहस्पति सूर्यका मित्र है तात्कालिकमें नवम होनेसे शत्रु है तो मित्रशत्रु होनेसे सूर्यका गुरु तात्कालिक सम हुआ; नैसर्गिकमें सूर्यका शुक्र शत्रु है तात्कालिक बारहवें मित्र है तो शत्रु मित्र होनेसे सम हुआ, एवं नैसर्गिकमें सूर्यका शनि शत्रु है तात्कालिक अष्टम होनेसे शत्रु है तो शत्रु शत्रु होनेसे अधिशत्रु हुआ; इसी प्रकार दूसरे ग्रहोंके तात्कालिक मित्रादि जानना जैसे चक्रमें स्पष्ट है सो देखना ॥

अथ तात्कालिकपंचधामैत्रीचक्रम्।

ग्रहाः	सू	चं	मं	बु	बृ	शु	श	रा	के
ऽमित्र	चं	बु	००	सू	चं. मं	के.	रा	श	शु.बु
मित्र	बु	बृ.शु श	श. रा	के बृ	रा.श	बृ	बृ	बृ	००
सम	मं.बृ.शु	सू	सू.चं.बृ	चं शु	सू	चं.सू.बु रा. श	चं.बु.शु के. मं	शु.बु के.मं	श.रा चं
शत्रु	००	मं.रा	शु. के	रा.मं.श	के	०मं	००	सू	बृ
ऽशत्रु	श.रा.क	के	बु	००	बु.शु	००	सू	चं	मं.सु

यथा स्वाभाविकीमैत्रीचक्रं यत्र प्रतिष्ठति।
तादृगेव हि तत्कालमैत्रीचक्रं तु स्थापयेत् ॥ १ ॥

जहां स्वाभाविक मैत्रीचक्र लिखा होय उसी प्रकार तात्कालिक मैत्रीचक्रभी बनाकर स्थापित करना चाहिये ॥ १ ॥ इति तात्कालिकमैत्रीचक्रकरणविधिः ॥

अथ षड्वर्गशुद्धिः।

लग्ने देहाचारो होरायामर्थसंपदो विपदः। द्रेष्काणे कर्मफलं सप्तांशे बन्धुसंख्या च ॥ १ ॥ जातकफलं नवांशे द्वादशांशे विचिन्तयेत्पत्नीम्। त्रिंशांशे निधनस्थं यवनाचार्यैः सदा ह्युक्तम् ॥ २ ॥ यस्मिन्मित्रगृहे स्वकीयभवने तुङ्गे त्रिकोणेऽपि वा तत्सर्वं विदधाति जन्मसमये षड्वर्गशुद्धो ग्रहः। एकस्तत्र हि सर्वभूरिनिकरो हस्तेषु कोशान्वितो द्वाभ्यां किं नरमत्र सिद्धसदृशं कुर्वन्ति मर्त्यं भुवि ॥३॥

अब षड्वर्गसे क्या क्या विचारना चाहिये सो कहते हैं–लग्नसे देह आचारका विचार करै, होरासे अर्थ सम्पदा और विपदाको विचारै, द्रेष्काणसे कर्म फलको, सप्तांशसे बन्धु (भाई) संख्याको, नवांशसे जातकफलको, द्वादशांशसे स्त्रीसंबंधी फलको और त्रिंशांशसे मृत्युको विचार करै ऐसा यवनाचार्योंका मत है ॥ जो ग्रह अपने मित्रके घरमें हो या अपने स्थानमें हो, उच्चका हो अथवा त्रिकोणका हो वह जन्मसमयमें सर्वपदार्थोंको देनेवाला षड्वर्ग शुद्धग्रह जानना. जिसके ऐसा एक ग्रह जन्ममें पडे वह अनेक पदार्थों तथा धनकरके युक्त होता है, यदि दो ग्रह ऐसे होवें तो फिर क्या उस मनुष्यको संसारमें सिद्धके समान बना देते हैं ॥ १–३ ॥

तत्र प्रथमं होराकरणम्।

ओजे रवीन्द्वोः सम इन्दुगव्योर्होरे गृहार्धप्रमिते विचिन्त्ये ॥ १ ॥

अब होराको कहते हैं--ओज (विषम) राशि (१।३।५।७।९।११) इनमें प्रथम १५ अंशतक सूर्यकी होरा, फिर शेष १५ अंश अर्थात् १६ से ३० अंशतक चन्द्रमाकी होरा कहिये और समराशि (२ । ४ । ६ । ८ । १० । १२) इनमें पहिले १५ अंशतक चन्द्रमाकी होरा शेष १५ अंशतक सूर्यकी होरा होती है. जैसा चक्रमें स्पष्ट है सो देखना ॥ १ ॥

अथ होराचक्रम्

राशि	मेष.	वृष.	मि.	कर्क	सिंह	कन्या	तु.	वृ.	ध.	म.	कुं	मी.
१५ अं	सू ५	चं ४	सू ५	चं ४	सू ५	चं ४	सू ५	चं ४	सू ५	चं ४	सू	चं ४
३० अं	चं ४	सू ५	चं ४	सू ५	चं ४	सू ५	चं ४	सू ५	चं ४	सू ५	चं ४	सू ५

अथ द्रेष्काणमाह–

राशित्रिभागा द्रेष्काणास्ते च षट्त्रिंशदीरिताः ।
परिवृत्तित्रयं तेषां मेषादेः क्रमशो भवेत् ॥ १ ॥
स्वपञ्चनवपानां च विषमेषु समेषु च ।
नारदागस्तिदुर्वासा द्रेष्काणेशाश्चरादयः ॥ २ ॥

राशिके तीसरे भागको द्रेष्काण कहते हैं. इस प्रकार मेषादिराशियोंमें क्रमसे तीन आवृत्ति करके छत्तीस द्रेष्काण होते हैं. सम, विषम दोनों प्रकारकी राशियोंमें पहिला द्रेष्काण उसी राशिका, दूसरा द्रेष्काण उस राशिसे पंचम राशिका, तीसरा द्रेष्काण उस राशिसे नवमराशिका होता है. यथा—लग्न ०० । ११ । १६ । २० यहां मेषराशि है तो पहिला द्रेष्काण मेषहीका हुआ । परंतु लग्नमें अंश १० से अधिक और ३० से कम हैं अतः मेषमें. दूसरा द्रेष्काण हुआ तो मेषसे पांचवीं सिंहराशि है इस कारण सिंहहीका द्रेष्काण हुआ ॥ १ ॥ २ ॥

अथ द्रेष्काणचक्रम् ।

स्वा.	रा.	मे.	वृष.	मि.	क.	सिं.५	क.	तु.	वृ.	ध.	मक.	कुं.	मी.
नारद	१० अं	मे.१	वृष२	मि.३	क.४	सिं.५	क. ६	तु.७	वृ. ८	ध.९	म.१०	कुं११	मी १२
अग.	२० अं	सिं.५	ध.४	तु.७	वृ. ८	ध.९	म.१०	कुं. ११	मी १२	मे.१	वृ.२	मि३	क.४
दुर्वा.	३० अं	ध.९	म १०	कुं. ११	मी१२	मे. १	वृ.२	मि.३	क.४	सिं.५	क.६	तु.७	वृ. ८

अथ सप्तांशानाह--

सप्तांशपास्त्वोजगृहे गणनीया निजेशतः ।
युग्मराशौ तु विज्ञेयाः सप्तमर्क्षादिनायकात् ॥ १ ॥

अब सप्तांशको कहते हैं-राशिका सातवां भाग सप्तांश होता है,सो विषमराशिमें प्रथम अपनी राशिसे गणना करै और समराशिमें अपनी राशिसे सातवीं राशिका प्रथम सप्तांश जाने. यथा मेषमें प्रथम मेषका एवं मिथुनमें प्रथम मिथुनका और वृषमें वृषसे सातवीं वृश्चिकका प्रथम सप्तांश होता है। इसी प्रकार समविषमराशिके हिसाबसे द्वादशराशियोंमें सप्तांश विचार करै जैसा चक्रमें स्पष्ट है सो देखना ॥ १ ॥

अथ सप्तांशचक्रम् ।

राशिसप्तांशः	मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	क	मी
४।१७।८।३४	१	८	३	१०	५	१२	७	२	९	४	११	६
८।३४।१७।८	२	९	४	११	६	१	८	३	१०	५	१२	७
१२।५१।२५।४२	३	१०	५	१२	७	२	९	४	११	६	१	८
१७।८।३४।१७	४	११	६	१	८	३	१०	५	१२	७	२	९
२१।२५।४२।५१	५	१२	७	२	९	४	११	६	१	८	३	१०
२५।४२।५१।२	६	१	८	३	१०	५	१२	७	२	९	४	११
३०।०।०।० ०	७	२	९	४	११	६	१	८	३	१०	५	१२

अथ नवांशविधिमाह--

मेषाद्या धनुसिंहश्च मकराद्या वृषकन्ययोः ।
तुलाद्या घटमिथुनश्च वृश्चिकमीनकुलीराद्याः ॥ १ ॥

अब नवांशक जाननेकी विधिको कहते हैं-मेष धनु और सिंह (१ । ९ । ५) इन राशियोंमें आदि मेषका नवांश होता है और धनुराशिपर्यन्त रहता है, मकरका आदि देकर मकर कन्या और वृष इन राशियोंमें जानना । तथा तुला आदि लेकर तुला कुंभ और मिथुनमें गणना करे, एवं कर्कराशिका नवांश आदिमें देकर कर्क, वृश्चिक और मीनराशियोंमें क्रमसे जानना एक राशिमें नौ नवांश भोग करते हैं और एकनवांश ३ तीन अंश २० कलाका होता है ॥ १ ॥

उदाहरण-स्पष्टलग्न०० । ११ । १६ । २० तो यहां मेषराशि है इस कारण आदिमें प्रथम मेषका नवांश ३ । २० तक हुआ । फिर ३ । २० से ६ । ४० तक वृषका हुआ एवं १० । ०० अंशतक मिथुनका हुआ,१० से १३ । २० तक कर्कका हुआ यहां ११ । १६ अंशादि हैं तो यही कर्कके मध्यमें है, अतः कर्कका नवांश मेषादिगणनासे हुआ ॥

अथ नवांशचक्रम् ।

राशि	मे	वृ	मि	कर्क	सिंह	कन्या	तु	वृ	ध	म	कुं	मी
३।२०	मे१	म१०	तु७	क४	मे१	म१०	तु७	क४	मे१	म१०	तु७	क
६।४०	वृ२	कुंभ	वृश्चि	सिंह	वृ	कुंभ	वृश्चि	सिं	वृष	कुं	वृ	सिं
१०।००	मि३	मीन	धन	कन्या	मि	मीन	धन	क	मि	मी	ध	क
१३।२०	कर्क४	मे	मक	तुला	कर्क	मेष	मक	तु	कर्क	मे	[illegible]	तु
१६।४०	सिंह५	वृष	कुंभ	वृ	सिं	वृष	कुंभ	वृ	सिंह	वृ	कु	वृ
२०।००	क.६	मि	मीन	ध	क	मिथु	मी	ध	क०	मि	मी	ध
२३।२०	तुला७	कर्क	मेष	म	तु	कर्क	मे	म	तु	क	मे	म
२६।४०	वृ.८	सिंह	वृष	कुं	वृ	सिंह	वृ	कुं	वृ	सिं	वृ	कुं
३०।००	धन९	कन्या	मिथु	मी	ध	क	मि	मी	ध	क	मि	मी

अथ द्वादशांशमाह--

द्वादशांशस्य गणनां तत्तत्क्षेत्राद्विनिर्दिशेत् ।
तेषामधीशाः क्रमशो गणेशाश्वियमाऽहयः ॥ १ ॥

द्वादशांशचक्रम् ।

अंशा:रा.	मे	वृ	[illegible]	क	सि	[illegible]	तु	वृ	ध	म	कु	मी
२।३०	१	२	३	४	५	६	७	८	९	१०	११	१२
५।००	२	३	४	५	६	७	८	९	१०	११	१२	१
७।३०	३	४	५	६	७	८	९	१०	११	१२	१	२
१०।००	४	५	६	७	८	९	१०	११	१२	१	२	३
१२।३०	५	६	७	८	९	१०	११	१२	१	२	३	४
१५।००	६	७	८	९	१०	११	१२	१	२	३	४	५
१७।३०	७	८	९	१०	११	१२	१	२	३	४	५	६
२०।००	८	९	१०	११	१२	१	२	३	४	५	६	७
२२।३०	९	१०	११	१२	१	२	३	४	५	६	७	८
२५।००	१०	११	१२	१	२	३	४	५	६	७	८	९
२७।३०	११	१२	१	२	३	४	५	६	७	८	९	१०
३०।००	१२	१	२	३	४	५	६	७	८	९	१०	११

अब द्वादशांशको कहते हैं–सब राशियोंमें क्रमसे पहिले अपनी ही राशिका द्वादशांश होता है। एकराशिका बारवाँ भाग (२ अं० ३० कला) द्वादशांश कहाता है. तिनके स्वामी क्रमसे गणेश, अश्विनीकुमार, यम, अहि इस रीतिसे होते हैं ॥ १ ॥ उदाहरण यथा–भौमः ३ । २९ । ९१ । ३७ यहां कर्कराशिका है तो प्रथम आदिमें कर्ककाही द्वादशांश हुआ । उससे गणना करनेसे २९ अंशपर मिथुनके द्वादशांशमें भौम हुआ ॥

अथ त्रिंशांशविधिमाह–

कुजशनिजीवज्ञसिताः पञ्चेन्द्रियवसुमुनीन्द्रियांशानाम् ।
विषमेषु समर्क्षेषूत्क्रमेण त्रिंशांशकाः कल्प्याः ॥ १ ॥
यद्वा–शरेषुनागाद्रिसमीरणानां भौमार्किजीवज्ञसितास्त्वधीशाः ।
त्रिंशांशकानां विषमे समर्क्षेषूक्ताद्विलोमाः खलु जातकज्ञैः ॥२॥

अब त्रिंशांशको कहते हैं–विषमराशियों (मे. मि. सिं. तु. ध. कुं.) में पहले ५ अंशतक मंगल अर्थात् मेषराशिका, फिर ५ से १० तक शनैश्वरकी कुंभराशिका, एवं १० से १८ तक बृहस्पतिका (धनुराशिका), १८ से २५ तक बुध (३ राशि) का, तथा २५ से ३० अंशोंतक शुक्र (तु. रा.) का त्रिंशांश होता है. समराशियों (वृ. कर्क. क. वृ. म. मी.) में विपरीत जानना. यथा ५ अंशतक शुक्र (२ रा.) का एवं ५ से १२ तक बुध (६ रा.) का त्रिंशांश इत्यादि जानना. जैसा चक्रमें स्पष्ट है सो देखना ॥ १ ॥ २ ॥

अथ त्रिंशांशचक्रम् ।

।.भा.	मं	वृष	मि	क	सिं	कं	तु	वृ.	ध	म	कुं	मी
५।००	म ५	शु ५	मं. ५	शु.५	मं.५	शु.५	मं.५	शु.५	म.५	शु.५	मं.५	शु. ५
१०।०० १२।००	श१०	बु.१२	श.१०	बु.१२	श.१०	ब १२	श१०	बु.१२	श१०	बु.१२	श.१०	बु.१२
१८।०० २०।००	बृ१८	बृ.२०	बृ.१८	बृ.२०	बृ.१८	बृ.२०	बृ.१८	बृ.२०	बृ१८	बृ.२०	बृ१८	बृ.२०
२५।००	बु२५	श.२५	बु.२५	श.२५	बु.२५	श२५	बु.२५	श२५	बु.२५	श२५	बु.२५	श२५
३०।००	शु३०	मं.३०	शु.३०	मं.३०	शु.३०	मं३०	शु.३०	म३०	मं३०.	मं.३०	शु.३०	मं.३०

अथ षड्वर्गफलानि ।

तत्रादौ होराफलम् ।

होराङ्गतोऽर्कस्य करोति चन्द्रो नरं सकामं वनिता च कष्टम् । दोषात्मकं बन्धुजनैर्विमुक्तं सव्याधिदेहं रिपुवर्गगम्यम् ॥१॥ सूर्यस्य होरां प्रगतो हिमांशुर्नरं प्रतापं विविधं च सौख्यम् । स्वबाहुसंपादितवित्तपुष्टं जाया अभावस्य मतिं करोति ॥२॥ धर्मिष्ठः सत्यदाता च गुरुदेवप्रपूजकः । उपार्जितवित्तभोगो होरायां सूर्यलक्षणम् ॥ ३॥ गन्धर्वसिद्धिराज्यं च लक्ष्मीवाँश्च सदासुखी । पुत्रपौत्रं च कल्याणं शतवर्षाणि जीवति ॥ ४ ॥

जिसके सूर्यकी होरामें चन्द्रमा युक्त होय वह कामी, स्त्रीकष्टवाला, दोषी, बंधुजनोंकरके रहित, व्याधियुक्तशरीरवाला और शत्रुवाला होता है । पुनः जिसके सूर्यहोरामें चन्द्रमा युक्त होय वह मनुष्य प्रतापवान्, अनेकसुखसे युक्त, अपने भुजाओंसे उपार्जित बहुत धनवाला, स्त्रीके अभाववाला होता है । सूर्यकी होरामें धर्मिष्ठ, सत्य बोलनेवाला, दानी, गुरु और देवताओंका पूजनेवाला, उपार्जितधनका भोग करनेवाला होता है । चन्द्रमाकी होरामें गानेवाला, सिद्धि, राज्यलक्ष्मीकरके युक्त, सदा सुखी, पुत्रपौत्रकल्याणसहित सौ वर्ष जीता है ॥ १-४ ॥

क्रूराः सूर्यस्य होरायां धनधान्यविभूतिदाः । आचारसत्यशीलाढ्यो रोङ्गागो नृपवल्लभः ॥ ५ ॥ होरायाश्चन्द्रमसः शुभग्रहाः कामिनीप्रियं कुर्युः । शीघ्रं मैथुनगामी च चिरं धत्ते कामिनीसङ्गम् ॥६॥ होरायां सूर्यस्य कठिनः प्रायश्च संभोगः । पापैः सर्वैर्बलवान् जितेन्द्रियो मानवो भवति ॥ ७ ॥ होरायां कर्कटे चन्द्रे मृत्युं सुन्दरमुत्तमम् । कामिनीनां प्रियं चैव जनयेत्पुत्रमीदृशम् ॥ ८ ॥

सूर्यकी होरामें क्रूरग्रह हो तो धनधान्यविभूतिको देनेवाले होते हैं और मनुष्य आचार सत्यशीलकरके युक्त रोगी और राजाको प्यारा होता है । जिसके चन्द्रमाकी होरामें शुभ ग्रह स्थित हो वह स्त्रीप्रिय, शीघ्र मैथुनगामी और बहुत कामिनी स्त्रियोंके संगवाला होता है । सूर्यकी होरामें मनुष्य कठिन, अधम, संभोगी होता है और संपूर्ण पापग्रह बलवान् हों तो जितेंद्रिय होता है । चन्द्रमाके कर्कराशिकी होरामें मनुष्य सुन्दर, उत्तम मृत्यु पाता है और कामिनी स्त्रियोंका प्यारा ऐसा पुत्र उत्पन्न करनेवाला होता है ॥ ५-८ ॥

बुधः करोति विख्यातं साध्वीं पत्नीं पतिं शुभम् । जीवः करोति निधनं तेजस्विनमनिन्दितम् ॥ ९ ॥ भोग्यपत्नीपतिं शुक्रः क्षीणश्चन्द्रोऽपि शुक्रवत् । जनयेत् कर्कटे भौमे मृतस्त्रीकं नराधमम् ॥ १० ॥ रविर्दुःखितमत्यन्तं पीडितं गुह्यपीडितम् । शनिर्दासीपतिं कुर्यात्कर्कटस्थे न संशयः ॥ ११ ॥ स्वहोरायां रविः कुर्याद्विद्वांसं दृष्टपौरुषम् । जितेन्द्रियं च शूरं तमुद्यमे धृतमानसम् ॥ १२ ॥

चन्द्रमाकी होरामें जिसके बुध हो वह प्रसिद्ध, शुभ और साधु पत्नीका पति होता है, चन्द्रमाकी होरामें बृहस्पति हो तो उत्तम मरण, तेजवाला और निंदारहित होता है, जिसके चन्द्रमाकी होरामें शुक्र होय वह भोगी हुई स्त्रीका पति होता है और क्षीण चन्द्रमाकाभी फल शुक्रके समान होता है और मंगल होय तो उसकी स्त्री मरजावै और वह मनुष्य अधम होता है । सूर्य जिसके चन्द्र होरामें होय तो वह दुःखित, अत्यन्त पीडित और गुदाकी पीडावाला होता है और कर्कहोरामें शनैश्चर होय तो वह दासीका पति होता है । सूर्य जिसके अपनी होरामें स्थित हो वह विद्वान्, बडा पराक्रमी, जितेन्द्रिय शूरवीर और उद्यममें चित्त लगानेवाला होता है ॥ ९-१२ ॥

होरायां च यदा प्राप्ते धीरं सूतं सतां प्रियम् । शूरं ख्यात धनाढ्यं च सन्मित्रं प्राप्तसंपदम् ॥ १३ ॥ कण्ठीरवस्य होरायां चन्द्रे नीचमनारतम् । बुधे दारिद्र्यपिशुनं जीवेरोगमृतंतकम् । शुक्रेऽगम्यामतिं कुर्याद्वृषलीचार्यमाश्रितः ॥ १४ ॥

जिसके सूर्यकी होरामें मंगल स्थित होय वह सज्जनोंको प्रिय, शूरवीर, प्रसिद्ध, धन करके युक्त, सज्जन मित्रोंवाला और प्राप्त संपदावाला होता है । चन्द्रमा सूर्यकी होरामें हो तो नीच और अनारत होता है. बुधसे दरिद्र और प्रपंची होता है और बृहस्पतिसे रोगी और निर्मल वाणीवाला होता है । जिसके सूर्यकी होरामें शुक्र होय वह चंचल बुद्धिवाला होता है और शनैश्चर हो तो श्रेष्ठ जीविकावाला होता है १३॥१४

इति होराफलम् ॥

अथ द्रेष्काणफलम् ।

यादृग्द्रेष्काणगाः सौम्या उच्चस्था वा स्ववर्गगाः । नित्यं भुञ्यते लक्ष्मीर्वरदा सत्यवादिनी ॥ १ ॥ द्रेष्काणमात्म प्रकरोति सौम्यः केन्द्रत्रिकोणे सुगते बलिष्ठः । द्रव्याधिकं मानगुणैः समेतं विद्यान्वितं

सर्वकलासु दक्षम् ॥ २ ॥ द्रेष्काणपे सौम्यगते निरीक्षिते शुक्रेक्षिते स्याद्विविधं च सौख्यम् । आरोग्यतां मानयशोऽभिवृद्धिस्वदेशकर्मप्रकटं विरुद्धम् ॥३॥ द्रेष्काणे शशिसंयुतेक्षिते वा भौमेक्षितेस्याद्भृगुनन्दने वा । वयःप्रमाणेन फलन्ति कर्म धर्मे धनं स्याद्विविधप्रकारैः ४

जितने शुभग्रह उच्चस्थानमें वा अपने वर्गमें प्राप्त होकर द्रेष्काणमें प्राप्त होवैं तो वे सदा वरदायक, सत्यवादिनी लक्ष्मीके भोग विलासको देते हैं । जिसके अपनेहीं द्रेष्काणमें शुभ ग्रह केन्द्र अथवा त्रिकोणमें बलवान् होकर स्थित हों वह अधिक धनवान्, मान गुण विद्या करके युक्त और सर्व कलाओंमें दक्ष होता है । जिसके द्रेष्काणका स्वामी शुभ राशिमें स्थित वा देखा जाता हो अथवा शुक्र करके देखा जाता हो वह विविध सौख्यवाला, आरोग्यवान्, मान और यशवाला, कर्मकरके अपने देशमें प्रसिद्ध और विरुद्धवाला होता है । जिसके द्रेष्काणमें चन्द्रमा युक्त हो अथवा देखता हो अथवा मंगल वा शुक्र करके देखा गया हो तो उसके कर्म अवस्था प्रमाण करके फलीभूत होते हैं और धर्ममें अनेक प्रकारसे धन होता है ॥ १-४ ॥

द्रेष्काणः केन्द्रगः कुर्यादुच्चस्थो भूपतेर्गृहे । स्वक्षेत्रस्य स्वभूतार्थं मित्रे सन्मानभागयम् ॥ ५ ॥ तथा पणफरस्थाने स्वमित्रोच्चगृहाश्रयः । सन्मित्रं पार्थिवं तद्वद्धनिनं चक्रता नरम् ॥ ६ ॥ आपोक्लिमे च व्युत्पन्नो मित्रस्वगृहदा च भूः । अपत्यं हि सदाचारं कृषितः प्राप्तवित्तकम् ॥ ७ ॥ शत्रुनीचाश्रिता ये च तेषां तत्तुल्यके तनौ । व्रणघातादिकं चापि वदेत्तदनुपूर्वकम् ॥ ८ ॥

जिसके द्रेष्काण केन्द्रस्थान १ । ४ । ७ । १० में स्थित हो वह राजाके घरमें उच्च पदवीवाला होता है और अपने क्षेत्रका होय तो धनवान् और मित्रोंके सन्मानवाला होता है । जिसके अपने मित्र उच्चघरमें प्राप्त पणफर २ । ५ । ८ । ११ स्थानमें स्थित होय वह सज्जन मित्रोंवाला, राजाके समान धनवाला होता है । मित्र स्वगृहमें प्राप्त होकर आपोक्लिम स्थान ३ । ७ । ९ । १२ में स्थित होय तो पृथ्वीदायक जानना और वह पुत्रवान्, सत् आचारवाला, खेतीसे प्राप्त धनवाला होता है । शत्रु नीचाश्रयी द्रेष्काणमें जितने ग्रह हों और उनके समान जन्मलग्नमें भी होवैं तो उन्हींके अनुसार शरीरमें व्रणघातादिक कहना चाहिये ॥५-८॥ इति द्रेष्काणफलम् ॥

अथ सप्तमांशफलम् ।

सप्तांशपे चन्द्रयुते च दृष्टे सौम्येक्षिते स्यात्स्वसहोदरे स्यात् । अत्युग्रताकान्तियशोऽभिवृद्धिर्मैत्राधिको मैत्रयुतः प्रगल्भः ॥ १ ॥

सप्तांशके च ये खेटा नीचस्था रविवर्जिताः। तेषां बलवतो ज्ञेया बन्धूनां चिन्तया स्थिताः ॥ २ ॥ वर्गेऽन्तिमांशे ये खेटा उच्चस्था वा स्ववर्गगाः। अश्वादिवाहने दक्षः शूरो बन्धुविवर्जितः ॥ ३ ॥

जिसके सप्तांशका स्वामी चन्द्रमा करके युक्त हो वा दृष्ट हो अथवा शुभ ग्रह देखते हों तो उसके सहोदर भाई होते हैं और वह अति उग्र कांति, यशका वृद्धिवाला, अधिक मैत्री और मित्रोंवाला और प्रगल्भ होता है। सप्तांशमें जो ग्रह सूर्यको छोडकर नीच स्थानमें स्थित होवे तो बलवान्, बन्धुओंकी चिन्ताकरके सहित होते हैं। जिसके जो ग्रह वर्गके अन्तिम नवांशोंमें उच्चके अथवा अपने वर्गके प्राप्त होकर स्थित हों उन ग्रहोंद्वारा वह मनुष्य अश्वादि वाहनमें दक्ष, शूरवीर और बन्धुओंकरके रहित होता है ॥ १-३ ॥

नृपपूज्यो भवेन्नित्यं सर्वकार्यार्थसंपदा। सप्तवर्गग्रहाश्चैवमुच्चस्थाः शुभवर्गगाः ॥ ४ ॥ नित्यं भुञ्जयते लक्ष्मीर्वरदा सत्यवादिनी। सप्तांशे भ्रातृभवने रविर्जीवश्च भूमिजः ॥ ५ ॥ पश्चाज्जाता पितुः पुत्रं शुक्रचन्द्रज्ञकन्यकाः ॥ ६ ॥ उच्चस्थक्षेत्रगाः खेटाः सप्तांशे खचराः स्थिताः। महाधनी च भवति नीचस्थे च दरिद्रकः ॥ ७ ॥

सप्तवर्ग ग्रह जिसके उच्चमें अथवा शुभ वर्गमें स्थित हों वह राजपूज्य, सम्पूर्ण कार्य, अर्थ और संपदाकरके युक्त होता है। सप्तांशकुंडलीमें सूर्य बृहस्पति और मंगल तीसरे भावमें स्थित हों तो पिताके पश्चात् पुत्र और शुक्र चन्द्रमा बुध हों तो कन्या होवे और मनुष्य सदा वरदायिनी सत्यवादिनी लक्ष्मी भोगनेवाला होता है। जिसके सप्तमांशमें उच्चराशिस्थ ग्रह होवें वह महाधनी होता है और नीचके हों तो दरिद्र होता है ॥ ४-७ ॥ इति सप्तमांशकफलम् ॥

अथ नवांशफलम्।

गुरुर्नवांशे विचरञ्छशाङ्के नरं प्रसूते बहुवित्तयुक्तम्। पुत्रान्वितं पुण्यधनैरुपेतं प्रियातिथिं सर्वजनाभिरामम् ॥ १ ॥ सन्मित्रदाराधनमित्रसौख्यं श्रेष्ठप्रतिष्ठातिविराजमानम्। नरं प्रकुर्यात्सुरराजमंत्री नवांशके चेत् सुखसंपदा स्यात् ॥२॥ नीचस्त्रीकं च नीचस्थे भावेशे तुङ्ग उच्चगः। कुर्याद्राजा नवांशे तु स्वनवांशे तदाधिपम् ॥ ३ ॥ सेनानीर्मित्रनवांशे भोगगुणसंयुतश्च । शत्रुनवांशे दुःखितमत्यन्त-

मलीमसम् ॥ ४ ॥ नीचांशे दास्यत्वं दशां प्राप्य फलं भवेत् । सर्व-मेवं खगैश्चिन्त्यं फलं वाच्यं विचक्षणैः ॥ ५ ॥

जिसके बृहस्पतिके नवांशमें चन्द्रमा होय वह धनकरके युक्त, पुत्रोंसहित, पुण्यधन करके संयुक्त, प्रिय अतिथिवाला और सर्व जनोंका प्यारा होता है। बृहस्पतिके नवांशमें जिसका जन्म होय वह सज्जनमित्र, स्त्रीधन, मित्रसौख्य और श्रेष्ठ प्रतिष्ठा करके विराजमान और सुखसंपदावाला होता है। जिसके नवांशमें भावका स्वामी नीचमें हो वह अधमस्त्रीवाला होता है और तुंग अथवा उच्च राशिमें स्थित हो तो राजा होता है और अपने नवांशमें हो तो स्वामी होता है। मित्रके नवांशमें हो तो सेनानी, भोग और गुणकरके संयुक्त होता है और शत्रुके नवांशमें हो तो दुःखित अधम और मलिन होता है। जिसके नीच नवांशमें हो तो दास और बुरे फलको प्राप्त होता है। इस प्रकार सम्पूर्ण ग्रह विचार करके फल कहना चाहिये ॥ १-५ ॥ इति नवांशफलम् ॥

अथ नवांशकुण्डल्यां पञ्चमस्थाने ग्रहफलम् ।

एकत्रिपञ्चपुत्राश्च धीस्थे तुर्ये कुजे गुरौ । द्विचतुःषट्सप्तसंख्य-पुत्रदा ज्ञसितौ शनिः ॥ १ ॥ सहजे च सिंहे सुतजीवकेतू षष्ठे शनिः सूर्यकलत्रसंस्थः । गर्भे च राहुर्दशमे च भौमः सन्तानहानिश्च भवेन्नराणाम् ॥ २ ॥ ग्रहः क्रूरो व्ययाधीशो धर्मारिसहजे व्यये । दग्धे चक्री सुतस्थाने जातको म्रियते सुतः ॥ ३ ॥ यावत्संख्या ग्रहा वै सुतभवनगताः पूर्णदृष्टिर्यदा वा तावत्संख्या प्रसूतिर्भवति बलयुता पुंग्रहापुत्रकथ्यम् । कन्या चन्द्रस्य शुक्रे हिमसुतरविजो गर्भहानिं करोति केचिच्चन्द्राद्विचार्य मुनिगणकथितं तद्विचिन्त्यं नवांशे ॥ ४ ॥

जिसके नवांशकुंडलीमें पांचवें चौथे मंगल बृहस्पति स्थित होंय उसके एक तीन अथवा पांच पुत्र होते हैं और बुध शुक्र शनि हों तो दो, चार, छः वा सात पुत्र होते हैं। जिसके तीसरे स्थानमें सिंहराशि होय और सुतस्थानमें बृहस्पति और केतु होय, छठेमें शनैश्चर और सप्तममें सूर्य होय और गर्भमें राहु और दशममें भौम होय तो उस मनुष्यके सन्तानकी हानि होती है। जिसके क्रूर बारहवें भावका स्वामी नववें, तीसरे अथवा बारहवें वा आठवेंमें स्थित हो और केतु पंचम भावमें स्थित होय तो उसके पुत्र उत्पन्न होकर मर जाते हैं। जितने ग्रह बलवान् होकर पंचम

भावमें स्थित हों अथवा पंचम भावको देखते हों उतनीही संतान उत्पन्न होती है, पुरुष ग्रहोंसे पुत्र वा चन्द्रमा शुक्र एवं बुधसे कन्या और शनिसे गर्भहानि जानै। ये सब नवांशकुण्डलीसे विचारना चाहिये, किसीका मत है कि, चन्द्रमासे भी विचारै ॥ १-४ ॥ इति नवांशकुंडल्यां पञ्चमस्थग्रहफलम् ॥

अथ द्वादशांशफलम्।

गृहस्था द्वादशे भागे मित्रोच्चसमवस्थिताः। बहुस्त्रीष्वधिकारी स्यान्नानाऋद्धिसमन्वितः ॥१॥ अशीतिचतुराशीतिषडशीत्यथ सप्तकम्। अष्टौ पंचषष्टिषट्पंचाशच्चैव सप्ततिः ॥ २ ॥ नवत्यङ्गाधिका षष्टिषट्पंचाशच्छतं यथा। उक्तमायुः प्रमाणेन द्विरसांशैकभेदतः ॥ ३ ॥ जलेनाष्टादशे वर्षे सर्पेण नवमे पुनः। अपरेण दशमे च द्वात्रिंशे राजयक्ष्मणा ॥४॥ (अष्टौ पञ्चाशीति षष्टिः षट्पञ्चाशच सप्ततिः)

जिसके द्वादशांशमें ग्रह उच्चके मित्रके स्थानमें अथवा अपने घरमें स्थित होकर पडें वह मनुष्य बहुत स्त्रियोंका अधिकारी और अनेक ऋद्धिसिद्धिसे युक्त होता है। अस्सी ८०-१। चौराशी ८४-२। छयासी ८६-३। सत्ताशी ८७-४। पंचाशी ८५-५। साठ ६०-६। छप्पन ५६-७। सत्तर ७०-८। नब्बे ९०-९। छासठ ६६-१०। छप्पन ५६-११। और सौ १००-१२। इस प्रकार द्वादशांशके भेदसे मेषादिराशियोंमें आयु कही है। अठारह वर्षमें जलकरके, नववें वर्ष सर्पकरके, दशवें वर्षमें किसी विकारकरके, बत्तीसवें वर्ष राजयक्ष्मा रोगकरके मरण होता है ॥ १-४ ॥

विंशे रक्तप्रमाणेन द्वाविंशे वह्निना तथा। अष्टाविंशतिमे वर्षे जलोदरभयं तथा ॥५॥ व्याघ्रदंष्ट्रिस्त्रिंशत्तमे शरघातेन तत्कटे। जलेन वातपीडात्वं मरणं मकरे विधौ ॥ ६ ॥ स्त्रीकन्ये मरणं विद्यात्रिंशद्वर्षेण मज्जनम्। चक्रेण मरणं प्राहू राश्यश्चेन्मुच्यते नरः ॥ ७ ॥ पूर्वोक्तमायुः प्राप्नोति सत्यमेतन्मयोदितम् ॥ ८ ॥

बीस वर्षमें रक्तविकारकरके, बाईसवें वर्ष अग्निकरके, अट्ठाईस वर्षमें जलोदरभयसे तीसवें वर्ष व्याघ्रसे, बत्तीसवें वर्ष शरघातकरके और मकरके चन्द्रमामें जलकरके वा वातपीडाकरके मरण होता है। कुंभमें तीस वर्षकरके स्त्री कन्याका मरण कहे और मीनमें चक्रकरके मरण उन्तीसवें वर्षमें कहना चाहिये। इस प्रकार द्वादशांशभेदसे राशियोंमें पूर्वोक्त आयुर्दाय सत्य होता है जैसा मुझकरके कहागया। चक्रमें स्पष्ट है सो देखना ॥ ५-८ ॥ इति द्वादशांशफलम्।

अथ द्वादशांशफलचक्रम् ।

१	२	३	४	५	६	७	८	९	१०	११	१२
८०	८४	८६	८७	८५	६०	५६	७०	९०	६६	५६	१००
जला-त्	सर्पे-ण	अन्य तः	राज-यक्ष्मा	रक्तवि-कारसे	अग्नि-तः	जलो-दरात्	व्या-घ्रात्	शरघा तात्	जला-त्	जला त्	चक्रे-ण
१८	९	१०	३२	२०	२२	२८	३०	३२	३०	३०	२९

अथ त्रिंशांशफलम् ।

त्रिंशांशके च ये खेटा मित्रोच्चसमवस्थिताः । सर्वकार्यकृतोत्साही धर्मिष्ठः कृतपूजितः ॥ १ ॥ सत्त्वं रजस्तमो वाऽपि त्रिंशांशे यस्य भास्करस्तादृक् । बलिनः सदृशो मूर्तिर्बोद्धा वा जातिकुलदेशानाम् ॥ २ ॥ गुरुरविशशिनः सत्त्वं रजस्सितज्ञौ तमोऽर्किसुतभौमौ । एते ह्यात्मसमानाः प्रकृतीस्तेभ्यः प्रयच्छन्ति ॥ ३ ॥

जिसके त्रिंशांशकुंडलीमें जो ग्रह अपने उच्च राशिमें मित्रकी राशिमें सम राशिमें स्थित हों वे ग्रह संपूर्ण कार्य करनेवाले, तथा उत्साह धर्म और पूज्य पदवीको देनेवाले होते हैं । जिसके त्रिंशांशमें, सतोगुणी, रजोगुणी, तमोगुणी इनमें से जिस ग्रहका प्रकाश हो उसके समान बलवाला सुरूपवाला और जाति कुल देशको जाननेवाला मनुष्य होता है। बृहस्पति, सूर्य और चन्द्रमा सतोगुणी, शुक्र और बुध रजोगुणी, शनैश्चर और मंगल तमोगुणी जानना और इसी प्रकार मनुष्योंको अपनी प्रकृति समान प्रकृतिको देते हैं ॥ १-३ ॥

तथा चोक्तं बृहज्जातके-

यः सात्त्विकस्तस्य दया स्थिरत्वं सत्यार्जवं ब्राह्मणदेवभक्तः ।
रजोऽधिकः काव्यकरः कुलस्त्रीसमग्रवित्तः पुरुषोऽतिशूरः ॥ १ ॥
तमोऽधिको वञ्चयते परेषां मूर्खोऽलसः क्रोधपरोऽतिनिद्रः ।
मिश्रैर्गुणैः सत्त्वरजस्तमोभिर्मिश्रो भवेद्वै स सहस्रभेदतः ॥ २ ॥

इति श्रीमानसागरीपद्धतौ तृतीयोऽध्यायः ॥ ३ ॥

जिसके सतोगुणी ग्रह बली हों वह दयावान् स्थिरता-सत्यता-श्रेष्ठताकरके युक्त और देवता ब्राह्मणका भक्त होता है और जो रजोगुणी बली हों तो वह काव्य

करनेवाला, कुलश्री और बहुत धनकरके युक्त और बडा शूर वीर होता है। तमोगुण अधिक हो तो वह दूसरेको छलनेवाला, मूर्ख, आलसी, क्रोधी और बहुत निद्रावाला होता है और मिश्र गुणोंकरके मिश्र फल कहना चाहिये ॥ १ ॥ २ ॥ इति त्रिशांशफलम्॥

इति श्रीमानसागरीजन्मपत्रीपद्धतौ राजपंडितवंशीधरकृतभाषाटीकायां तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः ४ ।

अथ पंचमहापुरुषलक्षणानि निरूप्यन्ते–

ये महापुरुषसंज्ञकाः पञ्च पूर्वमुनिभिः प्रकीर्तिताः ।
वच्मि तान्सरलामलोक्तिभी राजयोगविधिदर्शनेच्छया ॥ १ ॥

जो महापुरुषसंज्ञक राजयोग पांच पहिले मुनियोंने वर्णन किये हैं उनको मैं राजयोगविधिदर्शनकी इच्छा करके सरल रीतिसे कहता हूं ॥ १ ॥

अथ रुचकादियोगः ।

स्वगेहतुङ्गाश्रयकेन्द्रसंस्थैरुच्चोपगैर्वाऽवनिसूनुमुख्यैः ।
क्रमेण योगा रुचकाख्यभद्रहंसाख्यमालव्यशशाभिधानाः ॥ २ ॥

जिसके जन्मकालमें अपनी राशिमें तुंग अर्थात् अपनी उच्चराशिहीमें होकर केन्द्र १।४।७।१० स्थानमें अथवा उच्चराशिहीमें स्थित होय तो मंगलको आदि देकर क्रमसे रुचकादि योग होते हैं अर्थात् मंगल मेष वा वृश्चिक वा मकरका होकर केन्द्रमें पडै तो रुचक नाम योग होता है, एवं बुध कन्या-मिथुनका केन्द्रमें हो तो भद्रयोग होता है इसी प्रकार गुरु, धनु, मीन, कर्कका केन्द्रमें हो तो हंसयोग, शुक्र वृष-तुला-मीनका केन्द्रमें हो तो मालव्ययोग और शनैश्चर मकर, कुंभ एवं तुलाका होकर केन्द्रमें स्थित हो तो शशकनाम योग होता है। इस प्रकार रुचकादि पाँच योग जानने ॥ २ ॥ इति रुचकादियोगाः ॥

अथ रुचकयोगफलम् ।

दीर्घायुः स्वच्छकान्तिर्बहुरुधिरबलः साहसी चाप्तसिद्धिश्चारुभ्रूर्नीलकेशः समकरचरणो मंत्रविच्चारुकीर्तिः । रक्तः श्यामोऽतिशूरो रिपुबलमथनः कम्बुकण्ठो महौजाः क्रूरो भक्तो नराणां द्विजगुरुविनतः क्षामजानूरुजङ्घः ॥ १ ॥ खट्वाङ्गपाशवृषकार्मुकचक्रवीणा-

विज्ञाङ्कहस्तचरणः सरलाङ्गुलिः स्यात् । मंत्राभिचारकुशलस्तुलयेत् सहस्रं मध्यं च तस्य गदितं मुखदैर्घ्यतुल्यम् ॥२॥ सह्यस्य विन्ध्यस्य तथोज्जयिन्याः प्रभुः शरत्सप्ततिरायुरस्मात् । शस्त्राग्निचिह्नो रुचकाभिधाने देवालयान्ते निधनं करोति ॥ ३ ॥

बडी उमरवाला, निर्मलकांतिवाला, अधिक रुधिर और बलवाला, साहसी, सिद्धियों-सहित, उत्तम भौंह और श्यामकेशवाला, जिसके हाथ पैर एक समान हों, मंत्रका जानने-वाला, उत्तम कीर्तिवाला, लाल श्यामता लिये स्वरूपवाला, शूर, शत्रुओंके बलका नाश करनेवाला, शंखकीसी गरदनवाला, महान यशस्वी, क्रूर, मनुष्योंका भक्त, ब्राह्मण और गुरुसे नम्र रहनेवाला, दुर्बल जानु और जंघावाला होता है । हाथ पैरमें खट्-वांग, पाश, वृष, धनुष, चक्र, वीणा ये चिह्न होते हैं । सीधी अंगुली, सलाह करनेमें चतुर, हजारों मनुष्योंमें नामी, मध्यम शरीर, चौडा मुख, सह्य, विंध्य, उज्जयिनीं देशोंका स्वामी, सत्तर वर्षकी उमरवाला, शस्त्र अग्निसे चिह्नित, रुचकयोगमें पैदा हुआ मनुष्य होता है एवं किसी देवताके स्थानमें मृत्युको प्राप्त होता है ॥ १-३ ॥

इति रुचकयोगफलम् ॥

अथ भद्रयोगफलम् ।

शार्दूलप्रतिमाननो द्विपगतिः पीनोरुवक्षःस्थलो
लम्बापीनसुवृत्तबाहुयुगलस्तत्तुल्यमानोच्छ्रयः ।
कामी कोमलसूक्ष्मरोमनिचयैः संरुद्धगण्डस्थलः
प्राज्ञः पङ्कजगर्भपाणिचरणः सत्त्वाधिको योगवित् ॥ १ ॥
शङ्खासिकुञ्जरगदाकुसुमेषुकेतुचक्राब्जलाङ्गलसुचिह्नितपाणिपादः ।
यात्रागजेन्द्रमदवारिकृतार्द्रभूमिसत्कुङ्कुमप्रतिमगन्धतनुः सुघोषः २॥
संभ्रूयुगोतिमतिमान्खलुशास्त्रवेत्तामानोपभोगसहितोऽपि निगूढगुह्यः ।
सत्कुक्षिधर्मनिरतस्सुललाटपट्टो धीरोभवेदसितकुञ्चितकेशपाशः ३॥
स्वतन्त्रः सर्वकार्येषु स्वजनं प्रति न क्षमी ।
भुज्यते विभवस्तस्य नित्यमर्थिजनैः परैः ॥ ४ ॥
भारं तुलायां तुलयेत्प्रयत्नैः श्रीकान्यकुब्जाधिपतिर्भवेत्सः ।
भद्रोद्भवः पुत्रकलत्रसौख्यो जीवेन्नृपालः शरदामशीतिम् ॥५॥

सिंहके समान तेजवाला, गजकीसी चाल, ऊंचा वक्षस्थल, लंबी छातीवाला, मोटी सुढार, दोनों बाहें तिसके तुल्य मान, कामी, कोमल शरीर, सूक्ष्म रोम, उत्तम कपोल, पंडित, कमलके समान हाथ पैर, बलवान्, योगका जाननेवाला। शंख, तलवार, हाथी, गदा, पुष्प, बाण, पताका, कमल, लांगल इन चिह्नोंसे अंकित हाथ पैरवाला, मतवाले हाथीकीसी चालसे भूमिपर यात्रा करनेवाला, अच्छे कुंकुम और गंधमय शरीर, उत्तम वाणीवाला, उत्तम भौंह, अति बुद्धिमान्, शास्त्रका जाननेवाला, मान भोग सहित, छिपा हुआ गुह्यस्थान, अच्छी कुक्षि, धर्ममें तत्पर, अच्छे मस्तकवाला, धैर्यवान्, अति श्याम घूघरवाले बालोंवाला, संपूर्ण कार्योंमें स्वतंत्र, अपने मनुष्योंपर दया करनेवाला, ऐश्वर्यका भोगनेवाला और उसके विभवको सदैव याचक मनुष्य भोग करैं। जिसकी तुलाका भार रत्नों करके तोला जाय, कान्यकुब्ज देशका स्वामी, पुत्रस्त्रीके सुखसहित, अस्सी बरसकी उमरवाला राजा भद्रयोगमें पैदा होनेवाला मनुष्य होता है ॥ १-५ ॥ इति भद्रयोगफलम् ॥

अथ हंसयोगफलम्।

रक्तास्योन्नतनासिकः सुचरणो हंसे प्रसन्नेन्द्रियो गौरः पीनकपोलरक्तकरजो हंसस्वनः श्लेष्मतः। शङ्खाब्जाङ्कुशमत्स्यदामयुगकैः खट्वाङ्गमालाघटैश्चञ्चत्पादकरस्थलो मधुनिभे नेत्रे सुवृत्तं शिरः ॥ १ ॥ जलाशयप्रीतिरतीव कामी न याति तृप्तिं वनितासु नूनम्। उच्चोऽङ्गुलैरवयवैः षडशीतितुल्यैरायुर्भवेत्षष्टचवधिः समानाम् ॥ २ ॥ बाह्लीकदेशादरशूरसेनगन्धर्वगङ्गायमुनान्तरालान्। भुक्त्वा वनान्ते निधनं प्रयाति हंसोऽयमुक्तो मुनिभिः पुराणैः ॥ ३ ॥

लाल मुख, ऊंची नासिका, अच्छे पैर, हंसयोगमें उत्पन्न हुआ मनुष्य प्रसन्नचित्त, गौर, मोटे कपोल, लाल नख, हंसकीसी वाणी बोलनेवाला, शंख, कमल, अंकुश, युगल, मत्स्य, खट्वांग (शस्त्र विशेष), माला, घट ये चिह्न हाथ पैरोंमें शोभित, सहतके समान अरुण नेत्र, उत्तम शिर, जलाशयमें प्रीति करनेवाला, अतिकामी, स्त्रियोंसे तृप्त नहीं होनेवाला, छयासी अंगुल ऊंचे शरीरवाला, साठ बरसकी उमरवाला, बाह्लीक, शूरसेन, गन्धर्व, गंगायमुना मध्य इन देशोंका भोग करनेवाला, वनके अन्तमें मृत्युको प्राप्त होता है, प्राचीन मुनीश्वरोंने ऐसा फल हंसयोगका कहा है ॥ १-३ ॥ इति हंसयोगफलम् ॥

अथ मालव्ययोगफलम्।

अस्थूलोष्ठोऽप्यविषमवपुर्नैव रक्ताङ्गसन्धिर्मध्ये क्षामः शशधर-

रुचिर्हस्तनासः सुगण्डः। सद्दीप्ताक्षः समसितरदो जानुदेशाप्तपाणि-मालव्योऽयं विलसति नृपः सप्ततिर्वत्सराणाम् ॥ १ ॥ वक्त्रं त्रयोदश-मिताङ्गुलमस्य दीर्घं तिर्यग्दशाङ्गुलमितं श्रवणान्तरालम्। मालव्य-संज्ञनृपतिः स भुनक्ति नूनं लाटांश्च मालवकसिन्धुसुपारियात्रान्॥२॥

अस्थूल होठोंवाला, दुर्बलशरीरवाला, एकसी देह, कहीं खाली नहीं, कमर जिसकी क्षीण, चन्द्रमाकीसी रुचि, अच्छे हाथ नासिका और कपोलवाला, प्रकाशवान् नेत्र, बराबर सफेद दांत, आजानुबाहु होता है तथा इस मालव्ययोगमें उत्पन्न हुआ मनुष्य सत्तरवर्षकी उमरतक राजसुखको भोग करता है । तेरह अंगुल दीर्घ मुख और कानोंके बीचमें दश अंगुल तिर्यक् (चौडा) होता है । इस योगमें पैदा हुआ मनुष्य मालव्यसंज्ञक राजा होता है और निश्चय लाट, मालवा, सिंधु, पारियात्र देशोंको भोग करता है ॥ १ ॥ २ ॥ इति मालव्ययोगफलम् ॥

अथ शशकयोगफलम् ।

लघुद्विजास्योऽद्रिगतः सकोपः शठोऽतिशूरो विजनप्रचारः। वना-द्रिदुर्गेषु नदीषु सक्तः प्रियातिथिर्नातिलघुः प्रसिद्धः ॥१॥ नानासेना-निचयनिरतो दन्तुरश्चापि किञ्चिद्धातोर्वादे भवति कुशलश्चञ्चलो लोलनेत्रः। स्त्रीसंसक्तः परधनहरो मातृभक्तः सुजङ्घो मध्ये क्षामः सुल-लितमती रन्ध्रवेदी परेषाम् ॥ २ ॥ पर्यङ्कशंखशरशस्त्रमृदङ्गमाला-वीणोपमाः खलु करे चरणे च रेखाः। वर्षाणि सप्ततिमितानि करोति राज्यं प्राप्तं शशाख्यनृपतिः कथितो मुनीन्द्रैः ॥ ३ ॥

छोटे दाँत और मुखवाला, क्रोधसहित, अत्यन्त शठ, शूर, जंगलमें प्रचार करने-वाला, वन, पर्वत, किला, नदी इनमें आसक्त, अतिथियोंका प्यारा, अतिछोटा नहीं किंतु प्रसिद्ध होता है । अनेक सेनाको इकट्ठा करनेमें तत्पर, कुछ छिदरे दांत, धातुकी परीक्षामें कुशल, चंचल, चंचलनेत्र, स्त्रीमें आसक्त, परधनका हरनेवाला, माताका भक्त, उत्तम जांघोंवाला, बीचमें कृश, शोभायमान बुद्धि, दूसरेके छिद्रोंका देखनेवाला । पर्यंक, शंख, बाण, तलवार, मृंदंग, माला, वीणा इन चिह्नोंके सदृश निश्चय हाथ पैरोंमें रेखा होती हैं. शशकयोगमें पैदाहुआ मनुष्य सत्तर ७० वर्षकी उमरवाला राजा होता है और भले प्रकार राज्य करता है ऐसा मुनियोंने कहा है॥ १–३॥

इति शशकयोगफलम् ॥

अथ पञ्चमहापुरुषभङ्गयोगः।

केन्द्रोच्चगा यद्यपि भूसुताद्या मार्तण्डशीतांशुयुता भवन्ति।
कुर्वंतिनोर्वीपतिमात्मपाके यच्छन्ति ते केवलसत्फलानि॥ १॥

भौमादिग्रह स्वोच्चादिके होकर केन्द्रस्थानमें स्थित होनेपर भी यदि वह सूर्य औरके सहित होंय तो अपनी दशामें पृथ्वीका पति नहीं करते हैं. केवल उत्तम फलके दाता होते हैं॥ १॥ इति पंचमहापुरुषभंगयोगः॥

अथ सुनफायोगफलम्।

भौमादीनां फलं यत्स्याज्जातकस्यातुलं बुधः। प्रज्ञाय प्रवदेत् सम्यक्सुनफादिकृतं फलम्॥ १॥ विक्रमवित्तप्रायो निष्ठुरवचनश्च भूपतिश्चन्द्रः। हिंस्रो नित्यविरोधी सुनफायां सोमसंयोगे॥२॥श्रुतिशास्त्रगेयकुशलो धर्मरतः काव्यकृन्मनस्वी च। सर्वहितो रुधिरतनुः सुनफायां सोमजो भवति॥ ३॥ नानाविद्याचार्यं ख्यातं नृपतिं वृषप्रियं चापि। सकुटुम्बधनसमृद्धं सुनफायां सुरगुरुः कुरुते॥ ४॥ स्त्रीक्षेत्रगृहपश्चतुष्पदाढ्यः सुविक्रमो भवति। नृपसत्कृतः सुवेषो दक्षः शुक्रेण सुनफायाम्॥ ५॥ निपुणमतिर्ग्रामपुरैर्नित्यं संपूजितो धनसमृद्धः। सुनफायां रवितनये क्रियासु गुप्तो भवेन्मलिनः॥ ६॥

भौमादिक ग्रहोंसे उत्पन्न फलको पंडित जन अच्छी रीतिसे जानकर सुनफादि योगोंका फल कहे। जिसके जन्मकालमें चन्द्रमासे दूसरे स्थानमें मंगल होवै सो विक्रमी अर्थात् बडा पराक्रमी और धनी, निष्ठुर वाणीवाला, सेनापति, प्रचंड, हिंसाके करनेवाला और सदा विरोधका करनेवाला होता है। जिसके जन्ममें बुध चन्द्रमासे दूसरे होवे सो वेदशास्त्रगानमें कुशल और धर्ममें रत, मनस्वी सबका हित करनेवाला और काव्य करनेवाला और सुन्दर रूपवाला होता है। जिसके जन्म समयमें चन्द्रमासे दूसरे स्थानमें बृहस्पति होवे सो अनेक विद्या करके निपुण, प्रसिद्ध राजा, राजश्री करके युक्त. श्रेष्ठ कुटुंब और धनकी समृद्धि करके युक्त होता है। जिसके जन्मकालमें चन्द्रमासे दूसरे स्थानमें शुक्र होवे सो स्त्री और क्षेत्रकरके युक्त और गृहपति होता है और चौपाये जीवों करके युक्त, बडे पराक्रमवाला और राजासे सत्कार पानेवाला, उत्तम वेशवाला और चतुर होता है। जिसके जन्मकालमें चन्द्रमाके दूसरे स्थानमें शनि होवे तो चतुर बुद्धिवाला, ग्रामपुरोंमें मान पानेवाला, धनकी समृद्धिवाला, क्रियामें गुप्त और मलिन होता है॥ १-६॥ इति सुनफायोगफलम्॥

अथ अनफायोगफलम् ।

चौरः स्वामी दृप्तः स्ववशी मानी रणोत्कटः सेर्ष्यः । क्रोधात्सं-पत्साध्यः सुतनुः कुजोऽनफायां प्रगल्भश्च ॥ १ ॥ गन्धर्वो लेख्य-पटुः कविः प्रवक्ता नृपाप्तसत्कारः । रुचिरः सुभगोऽनफायां प्रसिद्ध-कर्मा विबुधश्च भवेत् ॥ २ ॥ गंभीरः सन्मेधैश्चानुयुतो बुद्धिमान् नृपाप्तयशाः । अनफायां त्रिदशगुरौ संजातः सत्कविर्भवति ॥ ३ ॥ युवतीनामतिसुभगः प्रणयी क्षितिपस्य गोपतिः कान्तः । कनक-समृद्धश्च पुमाननफायां भार्गवे भवति ॥ ४ ॥ विस्तीर्णभुजः सुभगो गृहीतवाक्यश्चतुष्पदसमृद्धः । दुर्वनितागणभोक्ता गुणसहितः पुत्रवान्रविजे ॥ ५ ॥

जिसके जन्ममें चन्द्रमाके बारहवें स्थानमें मंगल होवे सो चोरोंका स्वामी, ढीठ, धनी, अपने वशमें रहनेवाला, मानी, युद्धमें प्रबल ईर्षा करके युक्त, क्रोधी और सुंदर देहवाला होता है । चन्द्रमासे जिसके बारहवें बुध होवे तो गांधर्वविद्याका जाननेवाला, लिखनेमें चतुर, कविता करनेवाला, वक्ता, राजासे सत्कार पानेवाला, श्रेष्ठ भाग्योंवाला और नीतिको जाननेवाला होता है । चन्द्रमासे बारहवें बृहस्पति होवे तो गंभीर, बुद्धिमान् मनुष्यों करके युक्त, बुद्धिमान्, राजासे यशको पानेवाला और श्रेष्ठ कवि होता है । जिसके जन्मसमयमें चन्द्रमासे बारहवें शुक्र होवे सो स्त्रियोंके सौभाग्यवाला और राजाकी प्रीतिवाला, गौओंका स्वामी, सुन्दर रूपवाला और सुवर्णकी समृद्धिवाला होता है । जिसके जन्मकालमें चन्द्रमासे बारहवें शनि होवे सो बडे विस्तारवाली बाहोंवाला, शूरवीर, वाक्यको प्रमाण करनेवाला, चतुष्पदोंकी समृद्धिवाला, दुष्टस्त्रियोंका भोगनेवाला, गुणोंकरके युक्त पुत्रोंवाला होता है॥ १-५॥

इत्यनफायोगफलम् ।

अथ दुर्धरायोगफलम् ।

अनृतको बहुवित्तो निपुणोऽतिशठो गुणाधिको लुब्धः । वृद्धस्त्रीसक्तः कुलाग्रणीः शशिनि भौमबुधमध्ये ॥ १ ॥ ख्यातः कर्मसु कितवो बहुधनवैरस्त्वमर्षणो धृष्टः । आरक्षकः कुजगुर्वोर्मध्यगते शशिनि संग्राही ॥ २ ॥ " उत्तमरामासुभगो विषादशीलोऽस्त्रविद्भवेच्छूरः । व्यायामी रणशीलः सितारयोर्मध्यगे चन्द्रे ॥ " उत्तम-

सुरतो बहुसंचयकारको व्यसनसक्तः। क्रोधी पिशुनो रिपुमान् यमारयोः स्याद्गुरधरायाम् ॥ ३ ॥ धर्मरतः शास्त्रज्ञो वाक्पटुः सर्ववर्द्धनः समृद्धः। त्यागयुतो विख्यातो गुरुबुधमध्यास्थिते चन्द्रे ॥ ४ ॥

जिसके जन्मकालमें मंगल बुधके मध्यमें चन्द्रमा स्थित होवे सो झूंठ बोलनेवाला, बहुत धनवाला, बडा चतुर, शठ, अधिक गुणोंसे युक्त, लोभी, वृद्धस्त्रीमें सक्त और कुलमें मुख्य होता है। जिसके जन्ममें मंगल बृहस्पतिके मध्यमें चन्द्रमा होवे सो कर्मोंमें प्रसिद्ध, धूर्त्त, बहुत धनवान्, शत्रुओंकरके युक्त, क्रोधी, ढीठ, रक्षा करनेवाला और संग्रह करनेवाला होता है। " और जिसके जन्ममें मंगल, शुक्रके मध्यमें चन्द्रमा होवे सो श्रेष्ठ भाग्योंवाला, विषादी, शास्त्रोंको जाननेवाला, शूरवीर, व्यायाम करनेवाला और युद्ध करनेवाला होता है ॥ " उत्तम सुरत, बहुत संचय करनेवाला, व्यसनमें सक्त, क्रोधी, चुगुलखोर और शत्रुओंकरके युक्त, जिसके जन्मकालमें शनि मंगलके मध्यमें चन्द्रमा पडै तो ऐसा होता है। जिसके जन्मसमयमें बुध बृहस्पतिके मध्य चन्द्रमा स्थित होवै सो धर्ममें तत्पर, शास्त्रका जाननेवाला,. वाचाल, सर्ववर्द्धन, समृद्धिवाला, त्याग करके युक्त एवं प्रसिद्ध होता है ॥ १-४ ॥

प्रियवाक्सुभगः कान्तः प्रवृत्तगो यदि सुकृतवान् नृपतिः। सौख्यः शूरो मंत्री बुधसितयोर्मध्यगे च हिमकिरणे ॥ ५ ॥ देशेदेशे गच्छति वित्तवशो नास्ति विद्यया सहितः। चन्द्रेऽन्येषां पूज्यः स्वजनविरोधी ज्ञमन्दयोर्मध्ये ॥ ६ ॥ धृतिमेधः स्थैर्ययुतो नीतिज्ञः कनकरत्नपरिपूर्णः। ख्यातो नृपकृत्यकरो गुरुसितयोर्दुरुधरायोगे ॥ ७ ॥ सुखनयविज्ञानयुतः प्रियवाग्विद्वान् धुरंधरो मर्त्यः। ससुतो धनी सुरूपश्चन्द्रो गुरुभार्गवे तुलान्तरगे ॥ ८ ॥ वृद्धवनितः कुलाढ्यो निपुणस्त्रीवल्लभो धनसमृद्धः। नृपसत्कृतं बहुज्ञं कुरुते चन्द्रः शनिसितयोः ९

जिसके जन्ममें बुध शुक्रके मध्यमें चन्द्रमा होवे सो मीठा बोलनेवाला, श्रेष्ठ भाग्यवाला, सुंदर, सुशीलवान्, राजा, सौख्यकरके युक्त, शूरवीर और मंत्री होता है। जिसके जन्ममें बुध शनिके मध्य चन्द्रमा स्थित होवे सो देशदेशांतरमें फिरनेवाला और धनवाला, विद्याकरके हीन, मित्रोंका विरोधी और जनोंकरके पूज्य होता है। जिसके जन्ममें गुरु शुक्रके मध्य चन्द्रमा स्थित होवै सो धैर्य बुद्धिवाला, स्थैर्य करके युक्त, नीति विद्याका जाननेवाला, सुवर्ण एवं रत्नोंसे परिपूर्ण, प्रसिद्ध, राजाके

कर्मोंका करनेवाला होता है। जिसके जन्ममें गुरु शनिके मध्य चन्द्रमा होवे सो सुख और नीति विद्याकरके युक्त, मीठी वाणीवाला, विद्वान्, धुरंधर, पुत्रवान्, धनी और सुंदर रूपवाला होता है। जिसके जन्मसमयमें शुक्र शनिके मध्यमें चन्द्रमा होवे वह बूढी स्त्रीवाला, कुलमें प्रधान, चतुर और स्त्रीका प्यारा, धनकी समृद्धिवाला, राजासे सत्कार पानेवाला होता है ॥ ५-९ ॥ इति दुर्धरायोगफलम् ॥

अथ केमद्रुमफलम् ।

केमद्रुमे भवति पुत्रकलत्रहीनो देशान्तरे व्रजति दुःखसदाभितप्तः । ज्ञातिप्रमोदनिरतो मुखरः कुचैलो नीचः सदा भवति भीतियुतश्चिरायुः ॥ १ ॥ कुले नित्यभोगधनभुग्धनसहनाढ्यसौख्यान्वितो दुरधरां प्रभवेत्सुभृत्यः । केमद्रुमे मलिनदुःखितनीचप्रेष्यो निस्वश्च तत्र नृपतेरपि वंशजातः ॥ २ ॥

जिसके केमद्रुमयोग होवै वह पुत्र स्त्री करके हीन, देशान्तरमें रहनेवाला, सदा दुःखित, जातिके प्रमोदमें रत, वाचाल और कुचालवाला, नीच, सदा भयसे युक्त और बहुत उमरवाला होता है। दुर्धरायोगमें उत्पन्न हुआ मनुष्य अपने कुलमें सदा भोग और धनको भोगनेवाला, धनकरके युक्त और सौख्यवाला होता है तथा केमद्रुममें उत्पन्न हुआ मनुष्य मलिन, दुःखित, नीच, दूत, दरिद्र, राजाके यहांभी उत्पन्न हुआ हो तोभी ऐसा होता है ॥ १ ॥ २ ॥

अथ केमद्रुमभंगमाह ।

हित्वाऽर्कं सुनफायुजी दुरधरा स्वान्त्यौ भवस्थैर्ग्रहैः
शीतांशोः कथितोऽन्यथा तु बहुभिः केमद्रुमोत्थैः परैः ।
केन्द्रे शीतकरेऽथवा ग्रहयुते केमद्रुमोनेऽपि ते
केचित्केन्द्रनवांशकेष्विति वदंत्युक्तिप्रसिद्धा न ते ॥ १ ॥

सूर्यको छोडकर दूसरे, बारहवें चन्द्रमासे ग्रह होवै तो क्रमसे सुनफा, अनफा, दुर्धरायोग होते हैं. यथा चन्द्रमासे दूसरे कोई ग्रह हों तो सुनफा और चन्द्रमासे बारहवें ग्रह होनेसे अनफा और चन्द्रमासे दूसरे बारहवें दोनों तरफ ग्रह होनेसे दुर्धरा नामक योग होता है। अन्यथा अर्थात् चन्द्रमाके दोनों तरफको २ ग्रह न हों तो अथवा बहुत प्रकारोंसे केमद्रुमयोग होता है. केन्द्रमें अथवा केन्द्रनवांशकमें चन्द्रमा हो अथवा ग्रह स्थित हो तो केमद्रुमयोग भंग हो जाता है अर्थात् अशुभ फलको नहीं करता है ॥ १ ॥

कुमुदगहनबन्धुर्वीक्षमाणः समस्तैर्गगनगृहनिवासैर्दीर्घजीवी चिरायुः। फलमशुभसमुत्थं यच्च केमद्रुमोक्तं स भवति नरनाथः सार्वभौमो जितारिः ॥१॥ पूर्णः शशी यदि भवेच्छुभसंस्थितो वा सौम्यामरेज्यभृगुनन्दनसंयुतश्च। पुत्रार्थसौख्यजनकः कथितो मुनीन्द्रैः केमद्रुमे भवति मङ्गलसुप्रसिद्धिः ॥ २ ॥

जिसके जन्मसमयमें चन्द्रमाको सब ग्रह देखते हों तो उस मनुष्यकी दीर्घायु करते हैं और केमद्रुमयोगसे उत्पन्न अशुभ फलको नाशकरके चक्रवर्ती राजा करते हैं। जिसके पूर्णबली चन्द्रमा शुभग्रहसे अथवा शुभराशिसे युक्त हो वा बुध, बृहस्पति, शुक्र करके युक्त हो तो केमद्रुम योगमें वह पुरुष पुत्रार्थ सौख्य करके संयुक्त होता है ऐसा मुनियोंने कहा है ॥ १ ॥ २ ॥

अथ सुनफादयो योगास्ते कथमुत्पद्यंते तदाह–

रविवर्ज्यं द्वादशगैः सुनफा चन्द्राद्द्वितीयगैः।
सुनफाया उभयस्थितैर्दुर्द्धराकेमद्रुमसंज्ञिता वाच्याः ॥ १ ॥

सूर्यको छोडकर चन्द्रमासे बारहवें कोई ग्रह (पाप अथवा शुभ) स्थित हो तो अनफायोग होता है और दूसरे ग्रह होनेसे सुनफायोग होता है और दूसरे बारहवें दोनों तरफ ग्रह होनेसे दुर्धरायोग होता है और चन्द्रमासे दोनों तरफ कोई ग्रह नहीं होवे तो केमद्रुमयोग होता है ये योग चन्द्रमासे उत्पन्न होते हैं ॥ १ ॥

अथ सूर्याद्वेशिवोशियोगावाह–

सूर्याद्व्ययगे वोशिर्द्वितीयगैश्चन्द्रवर्जितैर्वेशिः। उभयस्थितैर्ग्रहगणैरुभयचरी नामतः प्रोक्तः ॥ १ ॥ मन्ददृक्स्थिरवचनं परिभूरिश्रमं नतोर्ध्वतनुम्। कथयति गणिताधिपतिर्वेशिसमुत्थं त्वधोदृष्टिम् ॥२॥ बहुसंचयं यदि नु सदृक्वोशौ पुरुषो भवेद्गुरोर्जातः। भीरुः कायाद्विलग्नो लघुचेष्टो भृगुसुतः पराधीनः ॥ ३ ॥ परतर्कितो दरिद्रो मृदुविनीतो बुधो विगतलज्जः। मातृघ्नः क्षितिपुत्रः परोपकारी नरो वोशौ ॥४॥ परदारश्चन्द्रे च वृद्धकायो घृणी भवेन्मनुजः। संजातो नरो वोशौ योगे शनैश्चरेण संयुक्ते ॥ ५ ॥

चन्द्रमाको छोडकर सूर्यसे बारहवें कोई ग्रह होय तो वोशियोग होता है और सूर्यसे दूसरे कोई ग्रह होय तो वेशियोग होता है और सूर्यसे बारहवें दूसरे दोनों

तरफ ग्रह होवें तो उभयचरीनामक योग होता है (और दोनों तरफ कोई ग्रह न होवै तो कर्त्तरीयोग होता है) ॥ जिसके जन्मकालमें वेशियोग होय वह मन्ददृक् पराक्रम व सत्यसहित (ऊंचे) नम्र शरीरवाला और अधोदृष्टिवाला होता है । जिसके वोशियोगमें सूर्यसे बारहवें बृहस्पति होय तो वह बहुत संचयवाला और सुन्दर दृष्टिवाला होता है और शुक्र होय तो डरपोक लघुचेष्ट और पराधीन होता है । सूर्यसे बारहवें बुध होय तो वह दूसरेका तर्क करनेवाला, दरिद्र, मृदुल, विनीत और लज्जारहित होता है। भौम होय तो उसकी माता मरजावे और वह परोपकारी होता है । और चन्द्र होय तो परस्त्रीमें रत एवं शनैश्चरसे बूढी कायावाला घृणी मनुष्य होता है ॥१-६ ॥

इति वोशियोगफलम् ॥

अथ वेशियोगफलम् ।

उच्चेष्टवचाः स्मृतिमान्योगयुतो निरीक्षते तिर्यक् । पूर्वशरीरे पृथुलस्तुच्छगतिः सात्त्विको वेशौ ॥१॥ धृतिसत्यबुद्धियुक्तो भवति गुरुर्वेशिगो रणे शूरः । ख्यातो गुणवानार्यः शूरो भार्गवे पुरुषः ॥२॥ प्रियभाषां रुचिरतनुर्वेशः स्याद्वा बुधे पराज्ञाकृत् । संग्रामे विख्यातो भूमिसुते सूतगुणवानपि ख्यातः ॥ ३ ॥ वणिक्कलास्वभावः स्यात् परद्रव्यापहारकः । गुरुद्वेषी शनिः सूर्यः सोमो वेशिः शनैश्चरे ॥४॥

वेशियोग जिसके जन्मकालमें होय वह उत्तम इष्ट वचन बोलनेवाला स्मृतिमान्, तिर्च्छा देखनेवाला, स्थूल शरीरवाला, तुच्छगतिवाला और सात्त्विक होता है । वेशियोगमें सूर्यसे दूसरे बृहस्पति होय तो मनुष्य सत्यसहित, बुद्धिमान् और रणमें शूर होता है और शुक्र होनेसे प्रसिद्ध गुणवान् श्रेष्ठ और शूर होता है । बुधसे वेशियोग होय तो मनुष्य प्रियवचन बोलनेवाला सुन्दर शरीर भेषवाला और दूसरोंपर आज्ञा करनेवाला होता है. भौमसे होय तो वह संग्राममें प्रसिद्ध सूत गुणवान् और प्रसिद्ध होता है । जिसके वेशियोगमें सूर्यसे शनैश्चर दूसरे हो वह वणिजकलाके स्वभाववाला परद्रव्य हरनेवाला गुरुसे द्वेष करनेवाला होता है ॥ १-४ ॥

इति वेशियोगफलम् ॥

अथ उभयचरीयोगफलम् ।

**सर्वसहः सुसमदृक्समकायः सुस्थितो निपुणसत्त्वः ।
सिंहे जीवस्तुलाकीटधनुर्मकरकेषु च । ग्रहाश्चान्ये यदा जातो देशभोगी भवेन्नरः ॥ ९२ ॥ स्वगृहे च भवेत्सूर्यस्तुलायां च भवेत् सितः । मिथुने तिष्ठति सौरी राजयोगः प्रजायते ॥ ९३ ॥ षष्ठे च पञ्चमे चैव नवमे द्वादशे तथा । सौम्यक्रूरग्रहा योगा राजमान्यः सकण्टकः ॥ ९४ ॥ त्रिकोणकोणे बुधजीवशुक्रास्त्रिषट्दशे सोमसुते-ऽर्कपुत्रे । जायास्थिते चेत्परिपूर्णचन्द्रे नूनं स जातो नृपतेः समानः ॥

जिसके बृहस्पति सिंहराशिमें और शेषग्रह तुला, वृश्चिक, धनु, मकर इन राशि-योंमें हों तो वह देशका भोगनेवाला होता है । अपने घरमें सूर्य तुलाराशिमें शुक्र, मिथु-नमें शनैश्चर होवै तो राजयोग होता है । छठे, पांचवें, बारहवें शुभ और क्रूर

ग्रह जिसके स्थित होवें वह कंटकसहित राजमान्य होता है। त्रिकोणमें बुध, बृहस्पति, शुक्र होवे तीसरे, छठे, दशमें बुध शनैश्वर होवें और पूर्ण चन्द्रमा सातवें स्थित हो तो ऐसे योगमें उत्पन्न हुआ मनुष्य राजाओंके समान होता है ॥ ९२-९५ ॥

लग्ने सौरिस्तथा चन्द्रश्चाष्टमे भवने सितः। राजमान्यो महाकामी भोगपत्नीजनस्तथा ॥ ९६ ॥ धने शुक्रश्च भौमश्च मीने जीवो घटे बुधः। नीचश्चन्द्रः सूर्ययुक्तो राजयोगोऽभिधीयते ॥ ९७ ॥ अस्मिन् योगे नरो जातो राजा विभववर्जितः । दानभोगादिविख्यातः सम्मान्यः स भवेन्नरः ॥ ९८ ॥ मीने शुक्रो बुधश्चान्ते लग्ने सूर्यः शशी धने । सहजे च भवेद्राहू राजयोगः प्रचक्ष्यते ॥ ९९ ॥ मीने जीवस्तथा शुक्रश्चन्द्रमाश्च यदा भवेत् । तस्य जातस्य राज्यं स्यात् पत्नी च बहुपुत्रिका ॥ १०० ॥

जिसके शनैश्वर लग्नमें अथवा चन्द्रमा लग्नमें हो और मंगल आठवें हो वह राजमान्य, बडा कामी, भोगपत्नीवाला होता है। शुक्र भौम धनुराशिमें, बृहस्पतिं मीनमें, कुंभमें बुध और नीचराशि (८) में चन्द्रमा सूर्यसहित स्थित हो तो यह राजयोग होता है। इस योगमें उत्पन्न हुआ पुरुष विभवकरके हीन राजा होता है। दानभोगादिसे विख्यात मान्य होता है। मीनराशिमें शुक्र, बारहवें बुध, लग्नमें सूर्य, दूसरे चन्द्रमा, तीसरे राहु हो तो राजयोग होता है। जिसके मीनराशिमें बृहस्पति तथा शुक्र चन्द्रमा स्थित हों वह बहुपुत्रस्त्रीवाला तथा राज्यवाला होता है ॥ ९६-१०० ॥

आयस्थाने यदा सौम्यः क्रूरस्थानीयचन्द्रमाः । कर्मस्थाने पुनः सौम्यस्तदा राज्यं विधीयते ॥ १ ॥ आदौ जीवः पञ्चमे च दशमे चन्द्रमा भवेत् । राजमान्यो महाबुद्धिस्तेजस्वी चातितेजसः ॥ २ ॥

ग्यारहवें शुभ ग्रह हो और क्रूरराशिमें चन्द्रमा हो तथा दशमभावमें भी शुभग्रह स्थित हों तो राजयोग होता है। जिसके लग्नमें बृहस्पति पांचवें तथा दशवें चन्द्रमा स्थित हो वह राजमान्य, बडा बुद्धिमान्, तेजस्वी और प्रतापी होता है ॥१॥२॥

इति चतुरशीतिराजयोगाः ॥

अथ अरिष्टयोगः।

तत्र–तनुभावफलम्।

सूर्याच्च नवमे तातश्चन्द्रे माता चतुर्थगः । भौमस्य तृतीये भ्राता

बुधे चतुर्थमातुलः ॥३॥ गुरोः पञ्चमतः पुत्रो भृगुः सप्तमतः स्त्रियाः । शनेरष्टमतो मृत्युर्यदा क्रूरो भवेन्नरः ॥ ४ ॥

सूर्यसे नवम स्थान पिताका, चन्द्रमासे चतुर्थ माताका, भौमसे तीसरा भाइयोंका, बुधसे चौथा मामाओंका, बृहस्पतिसे पांचवां पुत्रोंका, शुक्रसे सातवां स्त्रीका और शनिसे आठवाँ मृत्युका स्थान है। सो इनमें यदि क्रूरग्रह होवैं तो क्रमसे सबको अरिष्ट जाने ॥ ३ ॥ ४ ॥

अथ द्वादशभवनविचारः ।

तत्रादौ अरिष्टमाह-

सूर्यो भौमस्तथा राहुः शनिर्मूर्तौ यदाऽन्वितः । सन्तापो रक्तपीडा च सौम्यैः सर्वविरोगता ॥ ५ ॥ भौमक्षेत्रे यदा जीवो जीवक्षेत्रे च भूसुतः । द्वादशे वत्सरे मृत्युर्बालकस्य न संशयः ॥ ६ ॥ धनस्थाने यदा भौमः शनैश्वरसमन्वितः । सहजे च भवेद्राहुर्वर्षमेकं स जीवति ॥ ७ ॥ चतुर्थे च यदा राहुः षष्ठे चन्द्रोऽष्टमेऽपि वा । सद्यश्चैव भवेन्मृत्युः शङ्करो यदि रक्षति ॥ ८ ॥ अष्टमस्थो निशानाथः केन्द्रे पापेन संयुतः । चतुर्थे च यदा राहुर्वर्षमेकं स जीवति॥९॥लग्ने व्यये धने क्रूरो यदा मृत्यौ च जायते । विष्ठाया मार्गबन्धः स्याद्द्वादशाष्टमवत्सरे॥

जिसके जन्मसमय सूर्य, मंगल तथा राहु, शनैश्वर लग्नमें स्थित होवैं वह संताप पीडाकरके पीडित होता है और यदि शुभग्रह स्थित हों तो रोगहीन होता है। जिसके जन्मसमय बृहस्पति मंगलके स्थान (१ । ८) में हो और बृहस्पतिके स्थान (९ । १२) में मंगल स्थित होवे तौ वह निस्सन्देह बारहवें वर्षमें मृत्यु पाता है। जिसके दूसरे स्थानमें शनैश्वर युक्त मंगल हो और तीसरे स्थानमें राहु हो वह एक वर्ष जीता है। जिसके चतुर्थ स्थानमें राहु और छठे अथवा आठवें चन्द्रमा स्थित हो तौ वह बालक शंकरका रक्षा कियाहुआभी शीघ्रही मरजाता है। जिसके अष्टम स्थानमें चन्द्रमा हो और पापग्रहोंसे केन्द्रस्थान युक्त हो तथा राहु चौथे स्थित हो तौ वह बालक एकही वर्ष जीता है। जिसके लग्न बारहवें दूसरे और आठवें क्रूरग्रह हों तिसकी बारहवें आठवें दिनमें विष्ठाका मार्ग रुकके मृत्यु होजावे ॥ १०५-११० ॥

सप्तमे भवने भौमो ह्यष्टमे भार्गवो यदा । नवमे भवने सूर्यश्चाल्पायुस्तस्य कथ्यते ॥ ११ ॥ धने क्रूरः स्वभवने क्रूरः पातालगो यदा । दशमे भवने क्रूरः कष्टं जीवति जातकः ॥ १२ ॥ स्मरे व्यये च सहजे

मध्ये क्रूरे यदा ग्रहाः । तदा जातस्य बालस्य शरीरे कष्टमादिशेत् ॥ १३ ॥ लग्नस्थाने यदा भौमो द्वादशे च यदा गुरुः । शुक्रः शत्रुगृहे यस्य मासमेकं स जीवति ॥ १४ ॥ क्षीणचन्द्रे गते लग्ने क्रूरग्रहनिरीक्षिते । द्वितीये द्वादशे भौमो मासमेकं स जीवति ॥ १५ ॥

जिसके सातवें स्थानमें मंगल आठवेंमें शुक्र और नवममें सूर्य हो तिसकी थोडी आयु होती है । जिसके धनभावमें क्रूर हो और स्वगृही क्रूर चौथे हों तथा दशवें क्रूर ग्रह हों तो वह बालक कष्टसे जीता है । जिसके सातवें बारहवें तीसरे और दशवें क्रूर ग्रह होवें उस बालकके शरीरमें कष्ट होता है । जिसके लग्नमें मंगल हो बारहवें बृहस्पति हो और शुक्र शत्रुके घरमें हो वह बालक एक मास जीता है, जिसके क्षीण चन्द्रमा पापग्रहसे दृष्ट लग्नमें स्थित हो और दूसरे तथा बारहवें मंगल होवै वह बालक एक मास जीता है ॥ ११-१५ ॥

मूर्तिसप्तमयोः क्रूराः पापा व्ययद्वितीयगाः । चतुर्थे च यदा राहुः सप्ताहान्म्रियते तदा ॥ १६ ॥ षष्ठाष्टमेऽपि चन्द्रः सद्यो मरणाय पापसन्दृष्टः । अष्टाभिः शुभदृष्टो वर्षैर्मिश्रैस्तदर्द्धेन ॥ १७ ॥ द्वादशस्थो यदा सौरिर्लग्नसंस्थश्च भूसुतः । चतुर्थो रौहिणेयश्च ह्यष्ट मासान् स जीवति ॥१८॥ शुभलग्ने यदा जीवो ह्यष्टमे च शनैश्चरः । रन्ध्रसंस्थे च पापे च सद्यो मृत्युप्रदो भवेत् ॥१९॥ चतुर्थे नवमे सूर्ये अष्टमे च बृहस्पतौ । द्वादशे च शशाङ्के च सद्यो मृत्युकरो भवेत् १२०

जिसके लग्न और सातवें क्रूरग्रह स्थित हो और पापग्रह बारहवें, दूसरे स्थित हो और चौथे राहु स्थित हो वह बालक सात दिनमें मरजाता है । जिसके पाप दृष्ट चन्द्रमा छठे आठवें स्थित हों उसको शीघ्रही मारता है. यदि शुभग्रह देखते हों तो आठ वर्षमें और पापशुभ दोनों देखते हों तौ चार वर्षमें वह बालक मर जाता है । जिसके बारहवें स्थानमें शनैश्चर, लग्नमें मंगल, चौथे बुध स्थित होवे वह बालक आठ मास जीता है । जिसके शुभराशिमें बृहस्पति स्थित हो, आठवें शनैश्चर हो तथा आठवें स्थानमें पापग्रह स्थित हों तो वह बालक शीघ्रही मरजाता है । जिसके चौथे वा नववें सूर्य हों और आठवें बृहस्पति हो और बारहवें चन्द्रमा हो तौ वह शीघ्रही मरता है ॥ ११६-१२० ॥

शशिसूर्यसिते केन्द्रे संयुक्तश्चन्द्रजार्किणा । हन्ति वर्षद्वयेनैव जातकं शिष्टभावितः ॥२१॥ गुरुर्मन्दगृहे वक्री मन्दगे बुधभास्करे ।

ईप्सितं कुरुते मृत्युं मन्दे चैकादशे ध्रुवम् ॥२२॥ सूर्यमन्दगृहे शुक्रो गुरुणा च विलोकितः। नवभिर्मारयत्येनं वर्षैर्जातं न संशयः ॥२३॥ सूर्येण सहितश्चन्द्रो बुधस्थानगतः सदा । न वीक्षितश्च सौम्येन नववर्षेण मृत्युदः ॥ २४॥ बुधः सूर्येन्दुसंयुक्तो वीक्षितोऽपि शुभैर्ग्रहैः। वर्षैरेकादशैस्तेन मारयत्येव निश्चितम् ॥ २५ ॥

जिसके शुक्र, चन्द्रमा, सूर्य केन्द्रस्थानमें बुध शनैश्चरकरके युक्त स्थित हो तौ वह बालक दो वर्षमें मृत्यु पाता है । जिसके बृहस्पति वक्री होकर शनैश्चरके घर (१० । ११) में स्थित हो और बुध, सूर्य सातवें स्थान हों तो स्वेच्छानुसार वह मृत्यु पाता है और यदि ग्यारहवें शनैश्चरभी हो तो शीघ्रही उसकी मृत्यु होती है। जिसके शुक्र, बृहस्पतिसे दृष्ट सूर्य अथवा मंगलके घरमें स्थित होवै तो उस बालकको नव वर्षों करके मारता है । जिसके सूर्ययुक्त चन्द्रमा बुधके स्थान (६ । ३) में स्थित हो और बुधकी दृष्टिसे रहित हो तौ उसको नवम वर्षमें मृत्युदायक होता है। बुध, सूर्य चन्द्रमा करके युक्त हो और शुभग्रहों करके देखागया हो तौ ग्यारह वर्षों करके मरता है ॥ २१-२५ ॥

लग्नादष्टमगो राहुः शनिः सूर्यावलोकितः । निरीक्षितः शुभैः कुर्यादष्टद्वादशभिः क्षयम् ॥ २६ ॥ धने राहुर्बुधः शुक्रः सौरिः सूर्यो यदा स्थितः । तत्र जातो भवेन्मृत्युर्मृते पितरि जायते ॥ २७ ॥ व्यये राहुः सौरिसौम्यौ जीवो लग्ने च पञ्चमे। अत्र योगे च यो जातो जातमात्रः स नश्यति ॥ २८॥ जीवार्कराहुभौमाः स्युश्चत्वारः क्रूरवेश्मगाः। सप्तमे च गृहे शुक्रो देहकष्टकराः सदा ॥ २९ ॥ गुह्यस्थाने यदा भौमो राहुः सौरिसमन्वितः । नृपपीडा भवेत्तस्य स्वासने नैव तिष्ठति ॥ १३० ॥

जिसके लग्नमें आठवें राहु स्थित हो और शनैश्चर सूर्यकरके देखाजाता हो और शुभग्रहोंकी दृष्टि हो तो उसकी आठवें बारहवें वर्षमें भय करता है । जिसके धनस्थानमें राहु,बुध, शुक्र, शनैश्चर, सूर्य स्थित हों तो वह बालक पिताके मरजाने पर उत्पन्न होकर मरजाता है । बारहवें राहु शनैश्चर बुध और बृहस्पति लग्नमें अथवा पंचम स्थानमें हो तो ऐसे योगमें पैदा हुआ बालक मातासहित नाश होजाता है । जिसके बृहस्पति, सूर्य, राहु और मंगल ये चारों ग्रह क्रूरग्रहकी राशिमें बैठे होंय और सातवें

राहु होय तो उसके शरीरके कष्टकारी सदा होते हैं। जिसके छठे स्थानमें मंगल राहु शनैश्चरयुक्त स्थित हो तौ उसको नृपपीडा होती है, अपने आसनपर नहीं ठहरताहै॥

चतुर्थे राहुसौरार्काः षष्ठे चन्द्रो बुधः कुजः। भार्गवश्चात्र यो जातः स गृहस्य क्षयंकरः ॥ ३१ ॥ एकः पापोऽष्टमस्थोऽपि शत्रुक्षेत्रे यदा भवेत्। पापेन वीक्षितो वर्षान्मारयत्येव बालकम् ॥ ३२ ॥ भौमभास्करमन्दाश्च शत्रुक्षेत्रेऽष्टमे यदा। यमेन रक्षितोप्येष वर्षमात्रं स जीवति ॥ ३३ ॥ वक्री शनिर्भौमगेहे केन्द्रे षष्ठेऽष्टमेऽपि वा। कुजेन बलिना दृष्टो हन्ति वर्षद्वये शिशुम् ॥ ३४ ॥ शनिराहुकुजैर्युक्तः सप्तमे नवमे शशी। सप्तमे दिवसे हन्ति मासे वा सप्तमे शिशुम् ३५

जिसके चौथे स्थानमें राहु, शनैश्चर, सूर्य हों, छठे चन्द्रमा, बुध, मंगल हो और तहां शुक्रभी स्थित होय तौ वह घरका नाश करनेवाला होताहै। जिसके एकभी पापग्रह शत्रुक्षेत्रमें होकर अष्टमस्थानमें स्थित हो और पापग्रह शत्रुक्षेत्रमें होकर अष्टम स्थानमें स्थित हो और पापग्रहकरके देखा हो तो उस बालकको वर्षमें मारता है। जिसके शत्रुराशिमें प्राप्त होकर मंगल, सूर्य, शनैश्चर, अष्टम भावमें स्थित होवे तो वह बालक यमकरके रक्षा किया हुआ भी वर्षमात्रही जीता है। जिसके वक्री शनैश्चर भौमघरमें केन्द्रस्थान अथवा छठे आठवें स्थानमें स्थित होय और मंगल बलवान् दृष्टिसे देखता होवै तो उस बालकको दो वर्षमें मारता है। जिसके शनैश्चर, राहु मंगल करके युक्त सातवें हो और चन्द्रमा नवमस्थानमें हो तो वह बालक सातवें दिन अथवा सातवें मास मरजाता है ॥ ३१-३५ ॥

लग्नस्थश्च यदा भानुः पञ्चमस्थो निशाकरः। अष्टमस्था यदा पापास्तदा जातो न जीवति ॥ ३६ ॥ लग्नपः पापसंयुक्तो लग्ने वा पापमध्यगे। लग्नात्सप्तमगः पापस्तदा चात्मवधो भवेत् ॥ ३७ ॥ क्रूरक्षेत्रे यदा जीवो लग्नेशोऽस्तं गतो भवेत्। अकर्मा च तदा जातः सप्तवर्षाणि जीवति ॥ ३८॥ अष्टमे च यदा सौरिर्जन्मस्थाने च चन्द्रमाः। मंदाग्न्युदररोगी च गात्रहीनश्च जायते ॥ ३९ ॥ शनिक्षेत्रे यदा भानुर्भानुक्षेत्रे यदा शनिः। द्वादशे वत्सरे मृत्युस्तस्य जातस्य जायते ॥ १४० ॥

जन्मलग्नमें सूर्य स्थित हो और पांचवें स्थानमें चन्द्रमा हो और आठवें स्थानमें पापग्रह होवें तो ऐसे योगमें उत्पन्न हुआ बालक जीता नहीं है। जिसके जन्मलग्नका

स्वामी पापग्रहकरके युक्त हो अथवा लग्न पापग्रहोंके बीचमें हो और लग्नसे सातवें पापग्रह होवें तो वह आत्मवध करनेवाला होता है । जिसके क्रूरग्रहके स्थानमें बृहस्पति स्थित हो और लग्नेश अस्तको प्राप्त होवे वह बालक कुकर्मी होकर सात वर्षमें मर-जावे । जिसके आठवें स्थानमें शनैश्चर और जन्मस्थान (लग्न) में चन्द्रमा हो उसके मन्दाग्नि और पेटमें रोग होता है तथा गात्रहीन होजाता है । जिसके शनैश्चरके स्थान (१० । ११) में सूर्य और सूर्यके स्थान (५) में शनैश्चर हों तौ उस बालककी बारह वर्षमें त्मृयु हो जावे ॥ ३६–१४० ॥

बुधभौमौ यदा लग्ने षष्ठस्थानेऽथवा स्थितौ । तस्करश्चौरकर्मा स्याद्धस्तपादौ च नश्यतः ॥ ४१ ॥ षष्ठेऽष्टमे वा मूर्तौ च शत्रुक्षेत्रे यदा बुधः । चतुर्वर्षैर्भवेन्मृत्युर्बालकस्य न संशयः॥४२॥अष्टमस्थो यदा राहुः केन्द्रस्थाने च चन्द्रमाः । सद्य एव भवेन्मृत्युर्बालकस्य न संशयः ॥ ४३ ॥ चतुर्थस्थो यदा राहुः षष्ठाष्टमगृहे शशी । विंशत्या दिवसैर्मृत्युर्बालकस्य न संशयः ॥ ४४ ॥ सप्तमे नवमे राहुः शत्रुक्षेत्रे यदा भवेत् । षोडशे वत्सरे मृत्युर्बालकस्य न संशयः ॥ ४५ ॥

जिसके बुध और मंगल लग्नमें वा छठे स्थानमें हों वह बालक चोर और कुकर्मी होता है और हाथ पाँवभी उसके नाश होजाते हैं । छठे आठवें या मूर्ति (लग्न) हीमें पापग्रहोंकरके युक्त जिसके शनैश्चरके स्थानमें अथवा शत्रुके स्थानमें बुध हो तो उस बालककी चौथे वर्षमें मृत्यु होजाती है । जिसके आठवें राहु हो और केन्द्रस्थान (१। ४।७।१०) में चन्द्रमा होवै तौ उस बालककी शीघ्रही निःसन्देह मृत्यु होती है । जिसके चौथे स्थानमें राहु और छठे वा आठवें चन्द्रमा होवै तो निःसन्देह बीस दिनकरके उस बालककी मृत्यु होजावे । जिसके शत्रुक्षेत्री राहु सातवें नववें स्थित हो तौ उस बालककी सोलहवें वर्षमें मृत्यु होजावे ॥ ४१–४५ ॥

द्वादशस्थो यदा चन्द्रः पापः स्यादष्टमे गृहे । एकमासे भवेन्मृत्यु-स्तस्य बालस्य निश्चितम् ॥ ४६ ॥ जन्मस्थाने यदा राहुः षष्ठस्थाने च चन्द्रमाः । अपस्मारस्तदा रोगो बालकस्य हि जायते ॥ ४७ ॥ भार्गवेण युतश्चन्द्रः षष्ठाष्टमगतो भवेत् । मन्दाग्न्युदररोगी च हीना-ङ्गोऽपि च बालकः ॥ ४८ ॥ षष्ठाष्टमे यदा चन्द्रो बुधयुक्तश्च तिष्ठति । विषदोषेण बालस्य तदा मरणमुच्यते ॥ ४९ ॥ भानुना संयुतश्चन्द्रः षष्ठाष्टमयुतो भवेत् । गजदोषेण मृत्युर्वा सिंहदोषेण वा भवेत् ॥ १५० ॥

जिसके बारहवें चन्द्रमा और पापग्रह आठवें होवै तो उस बालककी निस्सन्देह एक मासमें मृत्यु होजावे। जिसके जन्मस्थानमें राहु और छठे स्थानमें चन्द्रमा हो तो उस बालकको निःसन्देह अपस्मार रोग होता है। जिसके शुक्रयुक्त चन्द्रमा छठे वा आठवें स्थानमें हो तो वह बालक मंदाग्नि, उदररोगी और हीनांग होता है। जिसके छठे वा आठवें स्थानमें बुधयुक्त चन्द्रमा स्थित हो तो वह बालक विषदोषसे मरता है। जिसके सूर्य करके युक्त चन्द्रमा छठे आठवें स्थानमें स्थित हो तो उसकी हाथी अथवा सिंहसे मृत्यु होती है ॥ १४६-१५० ॥

एकोऽपि यदि मूर्तौ स्याज्जन्मकाले दिवाकरः। स्थानहीनो भवेद्बालो वृत्तिर्दुष्टा सदा पुनः ॥ ५१ ॥ लग्नेऽष्टमे यदा राहुश्चन्द्रो वा यदि दृश्यते। दशाहैर्जायते तस्य बालस्य मरणं ध्रुवम् ॥ ५२॥ लग्नाच्च नवमे सूर्ये सूर्यपुत्रे तथाऽष्टमे। एकादशे भार्गवे च मासमेकं न जीवति ॥५३॥ नवमे दशमे चन्द्रः सप्तमे च यदा सितः। पापे पातालसंस्थे च वंशच्छेदकरो नरः॥५४॥ शत्रुक्षेत्रेऽष्टमे षष्ठे द्वितीये द्वादशे रविः। स जीवेद्रसवर्षाणि बालको नात्र संशयः ॥ ५५ ॥

जिसके केवल सूर्य ही जन्मलग्नमें हो तौ वह घरकरके हीन, दुष्टजीविकावाला होता है। जिसके लग्न वा अष्टमस्थानमें राहु स्थित हो और यदि चन्द्रमा देखता होवै तो निःसन्देह दश दिनोंमें उस बालककी मृत्यु हो जावे। जिसके नवम स्थानमें सूर्य हो और शनैश्चर अष्टमस्थानमें हो और शुक्र ग्यारहवें होवै तौ वह बालक महीनेभर जीता है। जिसके चन्द्रमा नवम वा दशम स्थानमें हो और सातवें स्थानमें शुक्र होवै और पापग्रह चतुर्थस्थानमें स्थित हो तौ वह वंशच्छेद करनेवाला होता है। जिसके शत्रुक्षेत्री सूर्य आठवें छठे दूसरे अथवा बारहवें स्थित हो वह बालक छः वर्ष जीता है ॥ १५१-१५५ ॥

शत्रुक्षेत्रेऽष्टमे मूर्तौ बुधः षष्ठे प्रजायते। बालो जीवति वर्षाणि चत्वारि नात्र संशयः ॥ ५६ ॥ एकादशे तृतीये च नवमे पञ्चमे गुरौ। शत्रुक्षेत्रे वृद्धस्थाने भवेत्पञ्चाशदष्टायुः ॥ ५७ ॥ नवमे पञ्चमे वापि रिपुक्षेत्रे बृहस्पतिः। तदा षट्त्रिंशद्वर्षाणि जीवते नात्र संशयः ॥ ५८ ॥ मित्रक्षेत्रैकादशमे दशमे वा यदा गुरुः। शत्रुक्षेत्रेऽथवा शुक्रो द्वितीये द्वादशे भवेत्। एकविंशतिवर्षायुर्जायते बालको

ध्रुवम् ॥ ५९ ॥ शत्रुक्षेत्रेऽष्टमे षष्ठे द्वितीये द्वादशे शनिः । अष्टौ दिनान्यष्ट मासानष्ट वर्षाणि जीवति ॥ १६० ॥

जिसके शत्रुक्षेत्री बुध आठवें जन्मलग्नमें अथवा छठे स्थित हो तो वह बालक चार वर्ष जीता है। जिसके शत्रुक्षेत्रमें अथवा वृद्ध स्थानमें प्राप्त होकर बृहस्पति ग्यारहवें तीसरे नववें अथवा पांचवेंमें स्थित हो तो उसकी अट्ठावन वर्षकी आयु होती है। जिसके शत्रुक्षेत्री बृहस्पति नववें वा पांचवें स्थित हो तो वह तिरसठ ६३ वर्ष जीता है। जिसके मित्रके घरमें प्राप्त होकर बृहस्पति ग्यारहवें अथवा दशवें स्थित हो और शत्रुक्षेत्री शुक्र दूसरे अथवा बारहवें होवै तो उसकी इक्कीस २१ वर्षकी आयु होती है। जिसके शत्रुघरमें प्राप्त शनैश्चर आठवें, छठे, दूसरे अथवा बारहवें स्थित हो तो वह बालक आठ दिन वा आठ मास वा आठ वर्ष जीता है ॥ १५६–१६० ॥

चन्द्रक्षेत्रे यदा भौमो जायते मनुजः सदा । रक्तपित्तेन हीनाङ्गो नानाव्याधिसमन्वितः ॥ ६१ ॥ चन्द्रक्षेत्रे यदा चान्द्रिर्जायते यस्य जन्मनि । स जातः क्षयरोगी स्यात्कुष्ठादिभिरुपद्रुतः ॥६२॥ राहौ च केन्द्रगे मृत्युः पापानां दृष्टिसंयुते । संवत्सरे तु दशमे षोडशे तु विशेषतः ॥ ६३ ॥ चन्द्रः सप्तमभवने शनिभौमराहुसंयुतो भवति । यदा सप्तमदिवसे मृत्युः सप्तममासे न सन्देहः ॥६४॥ भौमक्षेत्रे यदा जीवः षष्ठेऽष्टमे च चन्द्रमाः । षष्ठेऽष्टमे भवेन्मृत्यू रक्षको यदि शङ्करः ६५॥

जिसके जन्मसमय चन्द्रमाके घर ४ मंगल स्थित होय वह रक्तपित्तविकारकरके हीनांग और अनेक व्याधियोंकरके युक्त होता है। जिसके चन्द्रमाके घर बुध स्थित हो वह क्षयरोगवाला, कुष्ठादि उपद्रवोंवाला, होता है। जिसके पापग्रहोंकी दृष्टिकरके युक्त राहु केन्द्रस्थान (१ । ४ । ७ । १०) में स्थित हो उसकी दशवें वर्षमें विशेषकरके सोलहवें वर्षमें मृत्यु होजावे। जिसके चन्द्रमा सातवें स्थानमें शनि, मंगल, राहुकरके संयुक्त स्थित हो तो उसकी सातवें दिन मृत्यु कहनी. यदि सातवें दिनतक न होवै तो निःसन्देह सात महीनोंकरके उसकी मृत्यु होती है। जिसके मंगलके घर (१ । ८) में बृहस्पति और छठे आठवें चन्द्रमा हो तो वह शंकरकरके रक्षा किया हुआ भी छठे, आठवें दिन, मास वा वर्षमें मृत्यु पाता है ॥ १६१–१६५ ॥

जन्मसप्तमभे सौरिरष्टमे यदि चन्द्रमाः । ब्रह्मपुत्रो यदा जातः सोऽपि पुत्रो न जीवति ॥ ६६ ॥ षष्ठाष्टमे यदा चन्द्रो रविर्भवति सप्तमः ।

पितृमातृधनं हन्ति मासमेकं न जीवति ॥ ६७ ॥ द्वादशे जीवशुक्रौ च जन्मतो राहुरेव च । सप्तमे च यदा सौरिर्वर्षमेकं न जीवति ॥६८॥ भौमे दिवाकरे छिद्रे जातः शत्रुगृहे यदि । स नरो म्रियतेऽवश्यं यमो मासं न रक्षकः ॥ ६९॥ यदा लग्ने ग्रहः क्रूरः षष्ठाष्टमेऽपि चन्द्रमाः । तदा सद्यो भवेन्मृत्युर्जातकस्य न संशयः ॥ १७० ॥

जिसके जन्मसमयमें सातवें शनैश्चर स्थित हो और आठवें स्थानमें चन्द्रमा हो तो वह ब्रह्मपुत्र भी उत्पन्न हुआ होवै तो नहीं जीता है । जिसके चन्द्रमा छठे आठवें और सूर्य सातवें होवै वह मातापिताका धननाश करता है और एक मासभी न जीता है। जिसके बारहवें बृहस्पति शुक्र, जन्मलग्नमें राहु और सातवें शनैश्चर हो वह एक वर्ष भी नहीं जीता है । जिसके मंगल सूर्य शत्रुक्षेत्रमें स्थित होकर आठवें भावमें पडैं वह यमकरके रक्षा कियाहुआ भी एक मासकरके मृत्यु पाता है । यदि लग्नमें क्रूरग्रह और छठे आठवें चन्द्रमा हो तो शीघ्रही उस बालककी मृत्यु होती है॥६६-१७० ॥

चतुर्थेऽपि यदा राहुः केन्द्रे भवति चन्द्रमाः । विंशद्वर्षे भवेन्मृत्युर्जातकस्य न संशयः ॥ ७१ ॥ सप्तमस्थो यदा राहुर्जन्मकाले यदा तदा । दशवर्षैर्भवेन्मृत्युरमृतं यदि पीयते ॥७२॥लग्नेऽष्टमे सदा राहुश्चन्द्रो वा यदि पश्यति । जातकस्य तदा मृत्युर्यदि शक्रेण रक्षितः ॥७३॥ दशमेऽपि यदा भौम उच्चः शत्रुगृहे स्थितः । जातकस्य भवेन्मृत्युर्मातुश्चैव न संशयः ॥ ७४ ॥ लग्नस्थितो यदा भानुः पञ्चमस्थो निशापतिः । लग्नेऽष्टमे स्थिताः पापास्तदा जातो न जीवति ॥७५॥

जिसके चौथे राहु और केन्द्रमें चन्द्रमा होवै तो बीस वर्षमें उस बालककी मृत्यु होती है । जिसके जन्मकालमें राहु सातवें स्थित होवै तो वह बालक अमृत पीताहुआ भी दश वर्ष करके मृत्यु पाता है । जिसके लग्न अथवा आठवें स्थित राहुको चन्द्रमा देखता हो तो वह इन्द्रकरके रक्षा कियाहुआ भी मरजाता है । जिसके मंगल उच्च शत्रुराशिका दशमभावमें स्थित हो तो वह बालक और उसकी माता मृत्यु पावै । जिसके जन्मलग्नमें, सूर्य, पांचवें चन्द्रमा और लग्न आठवें पापग्रह स्थित हों तो वह बालक मरजाता है ॥ १७१-१७५ ॥

लग्नात्सप्तमशीतांशुः पापाष्टमेषु लग्नगः । लग्नस्थितो यदा भानुर्मासेन म्रियते शिशुः ॥ ७६ ॥ धने गुरुः सैंहिकेयो भौमः शुक्रश्च

सप्तमे। अष्टमे रविचन्द्रौ च म्लेच्छः स्याद्यवनैः स्थितः॥ ७७॥ लग्नस्थाने यदा भौमो ह्यष्टमे च दिवाकरः। सौरेश्चतुर्थभवने तदा कुष्ठी भवेन्नरः॥ ७८॥ धर्मस्थाने यदा पापा लग्नात्पापश्चतुर्थगः। कर्मस्थानगतो राहुस्तदा म्लेच्छो भवेद्ध्रुवम्॥ ७९॥ व्ययभवनगे चन्द्रे वामं चक्षुर्विनश्यति। यदा सूर्यो द्वितीयस्थस्तदा ह्यन्धं समादिशेत्॥ १८०॥

जिसके लग्नसे सातवें चन्द्रमा हो और पापग्रह लग्नमें आठवें स्थित हों और सूर्य लग्नमें स्थित हो तो वह बालक एकमासमें मृत्यु पाता है। जिसके दूसरे बृहस्पति, राहु, मंगल, शुक्र सातवें और सूर्य चन्द्रमा आठवें हों तो वह म्लेच्छ होजाता है और मुसलमानोंके साथ रहता है। जिसके लग्नमें मंगल, आठवें सूर्य, चतुर्थ राहु स्थित हो तौ वह बालक कुष्ठरोगवाला होता है। जिसके नवममें पापग्रह और चतुर्थ स्थानमें पापग्रह और दशमभावमें राहु होवै तो वह म्लेच्छ होजाता है। बारहवें चन्द्रमा वामनेत्रको विनाश करता है और द्वितीयस्थ सूर्य अधा करता है १७६-१८०

सिंहलग्ने यदा जन्म शनिर्मूर्तौ यदा भवेत्। चक्षुर्हीनो भवेद्बालः शुक्रे जन्मान्धको भवेत्॥ ८१॥ होरायां द्वादशे राशौ स्थितो यदि दिवाकरः। करोति दक्षिणे काणं वामनेत्रे च चन्द्रमाः॥ ८२॥ स्वस्थाने लग्नतः क्रूरः क्रूरः पातालगः पुनः। दशमे भवने क्रूरः कष्टं जीवति जातकः॥ ८३॥ अस्मिन्योगेन यो जातो मातुर्दुःखकरो भवेत्। यदि जीवेदसौ जातो मातृपक्षक्षयंकरः॥ ८४॥ क्रूरे क्षेत्रे भवेत्सूर्यः कन्यायां क्रूरसंस्थितः। क्रूरक्षेत्रे भवेद्राहुः कष्टं जीवति जातकः॥ ८५॥

जिस मनुष्यका सिंहलग्नमें जन्म हो और शनैश्चर मूर्तिमें स्थित होवै तो वह नेत्रहीन और यदि शुक्र होवै तो जन्महीका अंधा होता है। होरामें बारहवीं राशिमें जिसके सूर्य स्थित हो तो दहिने नेत्रको काना करै और जो चन्द्रमा स्थित हो तो वामनेत्रको नाश करै। जिसके अपने घरका क्रूर ग्रह लग्नमें और चतुर्थमें और दशममें स्थित हो तो वह बालक कष्टसे जीता है। इस योगमें जो उत्पन्न होता है वह माताको दुःखकारक होता है और यदि जीता रहा तौ मातृपक्षका क्षय करनेवाला होताहै। जिसके क्रूरराशिमें सूर्य और कन्याराशिमें क्रूर और क्रूरराशिहीमें राहु स्थित हो तौ वह कष्टसे जीता है॥ १८१-१८५॥

शुक्रे च वाक्पतौ बुद्धौ नीचे राहुसमन्विते। चन्द्रमाश्च न पश्येत सोऽपि बालो न जीवति ॥ ८६ ॥ षष्ठाष्टमे यदा चन्द्रो द्वादशे रविमङ्गलौ। सोऽपि जातो न जीवेत रक्षते यदि शंकरः ॥८७॥ षष्ठाष्टमे यदा केतुः केन्द्री भवति चन्द्रमाः। सद्यो बालकमृत्युः स्याद्रक्षिता यदि शङ्करः॥ ८८॥ चन्द्रो बुधस्तथा सूर्यः शनिश्चान्ते यदा भवेत्। मध्यस्थाने यदा भौमो हीनदृष्टिस्तदा भवेत् ॥ ८९ ॥ अर्कः सौरिस्तथा भौमः स्वर्भानुः केतुसंयुतः। नीचसंयुक्तदृष्टिः स्यात् स जातो मातृघातकः ॥ १९० ॥

जिसके शुक्र बृहस्पति पंचममें और राहु नीचमें स्थित होवै और चन्द्रमाकी दृष्टि न हो तौ वह भी बालक नहीं जीता है। जिसके छठे आठवें चन्द्रमा और बारहवें सूर्य, मंगल हों तौ वह बालक यदि शंकरभी रक्षा करते हों तो मरजाता है। जिसके छठे,आठवें केतु और केन्द्रमें चन्द्रमा हो वह भी बालक शीघ्रही मरजाता है। जिसके चन्द्रमा, बुध, सूर्य, शनैश्चर बारहवें स्थित हों और मंगल दशम स्थानमें हो तो वह हीनदृष्टिवाला होता है। जिसके सूर्य, शनि तथा भौम राहु केतुसे युक्त हो और नीचराशिमें स्थित ग्रहकी दृष्टि हो तो वह मातृघातक होता है ॥ १८६-१९० ॥

रविराहू सौरिभौमौ जीवो लग्ने च पञ्चमे। योगेऽस्मिन्नपि यो जातो जातमात्रो विनश्यति ॥ ९१ ॥ क्रूरे क्षेत्रे गतो जीवो रवी राहुर्धरासुतः। सप्तमे भवने शुक्रो देही कष्टं प्रयाति च ॥ ९२ ॥ क्रूरे लग्ने भवेज्जातस्तत्स्वामी क्रूरक्षेत्रगः। आत्मघातो भवेत्तस्य शरीरे कष्टमादिशेत् ॥ ९३ ॥ सप्तमे भवने भौमः पञ्चमे च दिवाकरः। अरण्ये च भवेज्जन्म वृक्षालये न संशयः ॥ ९४ ॥

सूर्य राहु अथवा शनैश्चर मंगल और बृहस्पति लग्नमें वा पंचमस्थानमें स्थित हों तौ ऐसे योगमें उत्पन्न हुए बालककी माता मरजाती है। जिसके क्रूरराशिमें बृहस्पति, सूर्य, राहु, मंगल हो और सातवें भावमें शुक्र होवै तौ उसके शरीरमें कष्ट होता है। जिस मनुष्यका क्रूर लग्नमें जन्म हो और लग्नका स्वामी क्रूरराशिमें स्थित हो तो उसका आत्मघात होता है और शरीरमें कष्ट कहना चाहिये। जिसके सातवें स्थानमें मंगल, पांचवें सूर्य स्थित हो उसका जन्म वृक्षालय अथवा वनमें कहना चाहिये ॥ १९१-१९४ ॥ इति अरिष्टयोगः ॥

अथ जारजयोगः ।

एकः पापो यदा लग्ने लग्नेशो वा न पश्यति । सूर्यः पश्यति नो लग्नमन्यजातस्तदा भवेत् ॥ ९५ ॥ तिथिप्रान्ते दिनान्ते च लग्नस्यान्ते तथैव च । चरांशेऽपि च यो जातः सोऽन्यजातः शिशुर्भवेत् ॥ ९६ ॥ न पश्यति शशी लग्नं मध्यस्थः सौम्यशुक्रयोः । ततः परोक्षे जन्म स्याद्भौमेऽस्ते वा तनौ यमे ॥ ९७ ॥ जीवक्षेत्रगते चन्द्रे शुक्रे वेतरराशिगे । द्रेष्काणे च तदंशे वा न परैर्जात इष्यते ॥ ९८ ॥ न लग्नमिन्दुर्न गुरुर्निरीक्षते न वा शशाङ्को रविणा समागतः । सौरेण वाऽर्केण युतश्च वा शशी परेण जातं प्रवदन्ति सूरयः ॥ १९९ ॥

जिसके एक पापग्रह लग्नमें हो और लग्नेश न देखता होय अथवा सूर्यकी दृष्टि न होवै तो वह बालक अन्यसे उत्पन्न कहना चाहिये । तिथिके अन्तमें, दिनके अन्तमें, लग्नके अंतमें अथवा चरनवांशकमें पैदाहुआ बालक दूसरेसे उत्पन्न जानना । जन्मलग्नको चन्द्रमा न देखता होय अथवा बुध और शुक्रके बीचमें चन्द्रमा होय अथवा मंगल सातवें स्थित होय और चन्द्रमा लग्नको न देखता होय अथवा लग्नमें शनैश्चर स्थित होय, चन्द्रमा लग्नको न देखता होय तो इस प्रकार ये चार योग हुए। इनमें उत्पन्न हुए बालकका पिताके परोक्षमें जन्म कहना चाहिये । चन्द्रमा बृहस्पतिकें स्थानमें स्थित होय और शुक्र अपनी राशिके विना अन्यत्र स्थित हो अथवा बृहस्पति द्रेष्काण वा नवांशमें चन्द्रमा स्थित होय तो वह मनुष्य दूसरेसे उत्पन्न न कहना चाहिये। लग्नको चन्द्रमा अथवा बृहस्पति लग्नप चन्द्रमाको न देखता होय और न चन्द्रमायुक्त सूर्यको देखता होय वा शनैश्चर सूर्यकरके चन्द्रमायुक्त होय तो दूसरेसे उत्पन्न बालक कहना चाहिये ॥ १९५-१९९ ॥

लग्नं पश्यति नाऽङ्गिरा न च भृगुर्जारेण जातः शिशुः क्षौण्यर्कः समवेक्षते शशधरो योगे शिवावन्यजे । चन्द्रःपापयुतो दिनेशसहितः स्यादेवमप्यन्यजः प्रोक्तं प्राङ्मुनिपुङ्गवैः स्फुटमिदं योगत्रये जायते ॥२००॥ यदि वापि भवेच्चन्द्रो जन्माष्टमाद्वितीयगः। द्वादशैकादशस्थो वा पश्चाज्जातस्तदा शिशुः ॥१॥ क्षपाकरः पश्यति नैव लग्नं विदेशसंस्थे जनके प्रसूतः । कुजार्किसंसर्गगते विलग्ने कवीज्यकेन्द्रांशविहीनके वा ॥२॥ रविशशियुते सिंहे लग्ने कुजार्किनिरीक्षिते नयन-

रहितः सौम्यैः खेटैः स बुद्बुदलोचनः। व्ययगृहगतश्चन्द्रो वा महीजस्त्वपरं रविर्न शुभा गदिता योगा भवन्ति शुभेक्षिताः॥ २०३॥

लग्नको न बृहस्पति और न शुक्र देखता होय एकयोग, मंगल सूर्य देखते होंय लग्न वा चन्द्रमाको द्वितीययोग, चन्द्रमा पापग्रहोंसे युक्त सूर्यसहित होय तो तृतीय योग इन योगोंमें उत्पन्न हुआ बालक दूसरेका कहना चाहिये। जिसके चन्द्रमा जन्मलग्नमें आठवें वा दूसरे बारहवें अथवा ग्यारहवें स्थित हो तौ परोक्षमें उस बालकका जन्म कहना चाहिये। जिसके चन्द्रमा लग्नको नहीं देखता होय और मंगल शनि लग्नमें होवें अथवा शुक्र बृहस्पति केन्द्रांशकरके रहित हों तो उस बालकका पिताके परोक्षमें जन्म कहना चाहिये। जिसके सूर्य चन्द्रमायुक्त सिंह लग्नमें स्थित हो और मंगल शनैश्चर देखते हों तौ नेत्रहीन मनुष्य होता है. यदि शुभग्रह देखते होंय तौ छोटे नेत्रोंवाला होता है और चन्द्रमा वा मंगल वा सूर्य बारहवें स्थित हो तो भी शुभ न कहना. यदि शुभग्रह देखते होयँ तो शुभ कहना चाहिये॥ २००-२०३॥

इति जारजयोगः। इति तनुभावविचारः॥

अथ धनभावविचारः।

पापाः सर्वे धनस्थाने धनहानिकरा मताः। अन्यैः सौम्यैः शुभं सर्वमृद्धिवृद्धिधनादिकम्॥१॥ क्रूराश्चतुर्षु केन्द्रेषु तथा क्रूरो धनेऽपि च। दरिद्रयोगं जानीयात्स्वपक्षस्य भयंकरः॥ २॥ अष्टमस्थो यदा भौमस्त्रिकोणे नीचगो रविः। स शीघ्रमेव जातः स्याद्भिक्षाजीवी च दुःखितः॥ ३॥ कन्यायां च यदा राहुः शुक्रो भौमः शनिस्तथा। तत्र जातस्य जायेत कुबेरादधिकं धनम्॥ ४॥

धनभावमें पापग्रह धनहानि करनेवाले होते हैं और शुभग्रह होनेसे संपूर्ण शुभ ऋद्धि धनादिक बढाते हैं, क्रूर ग्रह चारों केन्द्रमें तथा दूसरे स्थानमें हों तो दारिद्र्ययोग जानिये और ऐसे योगमें बालक अपने पक्षका भय करनेवाला होता है। जिसके आठवें मंगल और नीचराशिका सूर्य त्रिकोणमें होवे तो वह बालक भिक्षासे जीविका करनेवाला और दुःखित होता है। जिसके कन्याराशिमें राहु, शुक्र, मंगल, शनैश्चर स्थित हों उसके कुबेरसे अधिक धन होता है॥ १-४॥

अर्ककेन्द्रे यदा चन्द्रो मित्रांशे गुरुणेक्षितः। वित्तवाग्ज्ञानसंपन्नो जायते च तदा नरः॥ ५॥ स्वक्षेत्रस्थो यदा जीवो बुधः सौरिस्त-

थैव च। तदा जातः स दीर्घायुः संपत्तिश्च पदेपदे॥६॥ लग्नं लग्नेश-संयुक्तं यस्य जन्मनि जायते । न मुञ्चन्ति गृहं तस्य कुलस्त्रिय इव श्रियः॥ ७ ॥ चन्द्रेण मङ्गलो युक्तो जन्मकाले यदा भवेत् । तस्य जातस्य गेहं तु लक्ष्मीर्नैव विमुञ्चति ॥ ८ ॥ मासमध्ये तु यत्संख्य-दिवसैर्जायते पुमान् । तत्संख्यवर्षभुक्तौ तु लक्ष्मीर्भवति निश्चितम्९

जिसके बृहस्पति करके दृष्ट मित्रनवांशके चन्द्रमा सूर्यसे केन्द्रमें स्थित हो वह धन-वान्, ज्ञानकरके संपन्न होता है। जिसके अपनी राशिमें बृहस्पति बुध तथा शनैश्चर स्थित हो तौ वह बडी उमरवाला और पदपदमें संपदावाला होता है। जिसके जन्मसमय लग्नका स्वामी लग्नमें स्थित हो तौ कुलकी स्त्रीके समान लक्ष्मी उसका घर नहीं छोडती है। जिसके जन्मसमय मंगल चन्द्रमाकरके युक्त होवै उसके घरको लक्ष्मी नहीं छोडती है। मासके बीचमें जितने संख्यावाले दिन (तिथि) करके मनुष्य उत्पन्न होता है उतनेही वर्षोंके भुक्त होनेपर लक्ष्मी स्थिर होती है ॥ ५-९ ॥

इति धनभावविचारः ॥

अथ सहजभावविचारः ।

पापैस्तृतीयगैः सर्वैर्बान्धवै रहितो भवेत् । सौम्यैश्च भ्रातृसंयुक्तः कीर्तियुक्तो धनप्रियः॥१॥ लग्नात्तृतीयभवने शिखिना सह चन्द्रमाः। लक्ष्मीवाञ्जायते बालो भ्रातृहीनो न संशयः ॥ २ ॥ आदौ जातान् रविर्हन्ति पश्चाद्भौमशनैश्चरौ । राहुणा च द्युभौ हन्ति केतुः सर्व-निवारकः ॥ ३ ॥ स्वक्षेत्रेस्थो यदा राहुर्धनस्थाने बृहस्पतिः। बुधेन च समायुक्तस्तस्य बन्धुत्रयं भवेत् ॥ ४ ॥

जिसके जन्मसमय संपूर्ण पापग्रह तीसरे स्थानमें स्थित हों वह भाइयोंकरके रहित होता है और यदि शुभग्रह युक्त हों अर्थात् स्थित हों तो भ्रातृयुक्त कीर्तिमान् और प्रिय धनवाला होता है। जिसके जन्मलग्नसे तीसरे भावमें केतुयुक्त चन्द्रमा स्थित होय वह बालक लक्ष्मीवान् और भाइयोंसे हीन निःसन्देह होता है। जिसके सूर्य तीसरे बैठा होय तो उसके बडे भाईका नाश करता है और मंगल शनैश्चर हो तो छोटे भाईका नाश और राहु बैठा होय तो दोनोंका नाश करता है और केतु सर्वनिवारक होता है। जिसके अपने घरमें राहु स्थित हो और बुध करके युक्त बृहस्पति दूसरे भावमें स्थित हो तौ उसके तीन भाई होते हैं ॥ १-४ ॥

लग्ने चन्द्रे धने शुक्रो व्यये च बुधभास्करौ । राहुश्चेत्पञ्चमे बालः स भवेद्बन्धुबन्धकृत् ॥ ५ ॥ धनस्थाने यदा क्रूरो भौमः सौरिसमन्वितः । सहजे च भवेद्राहुर्भ्राता तस्य न जीवति ॥ ६ ॥ षष्ठे च भवने भौमः सप्तमे राहुसम्भवः । अष्टमे च यदा सौरिर्भ्राता तस्य न जीवति ॥ ७ ॥ विलग्नस्थो यदा जीवो धने सौरिर्यदा भवेत् । राहुश्च सहजे स्थाने भ्राता तस्य न जीवति ॥ ८ ॥

जिसके लग्नमें चन्द्रमा, दूसरे शुक्र, बारहवें बुध सूर्य और राहु पंचममें स्थित हो तो वह बालक भाइयोंका वध करनेवाला अर्थात् उसके भाई मरजाते हैं । जिसके दूसरे स्थानमें क्रूरग्रह हों मंगल, शनैश्चर युक्त हों और तीसरे भावमें राहु होय तो उसके भाई नहीं जीते हैं । जिसके छठे मंगल सातवें राहु और आठवें शनैश्चर हो तो उसके भाई नहीं जीते हैं । जिसके जन्मलग्नमें बृहस्पति दूसरे शनैश्चर और तीसरे राहु स्थित हो तौ उसके भाई नहीं जीते हैं ॥ ५-८ ॥

सप्तमे भवने भौमश्चाष्टमेऽपि सितो यदि । नवमे च भवेत्सूर्यः स्वल्पायुश्च समूर्जितः ॥ ९ ॥ तस्य भ्राता भवेदन्यः पिता चायं समुद्धरेत् । तस्य चैको भवेत्पुत्रः सोऽपि विघ्नं विनश्यति ॥ १० ॥ उदयति मृदुभांशे सप्तमस्थे च मन्दे यदि भवति निषेकः सूतिमब्दत्रयेण । शशिनि तु विधिरेष द्वादशाब्दे प्रकुर्यान्निगदितमिह चिन्त्यं सूतिकालेऽपि युक्त्या ॥ ११ ॥ पुंग्रहोच्चस्थितो यस्य पत्रिकायां नरस्य च । तस्य षष्ठो भवेद्भ्राता चान्यथा भगिनी भवेत् ॥ १२ ॥

जिसके सातवें मंगल शुक्र और आठवें नववें सूर्य हो वह थोडी आयुवाला होता है और उसके पिताकरके दूसरा भाई रखा जाता है उसके एक पुत्र विघ्नका नाश करनेवाला होता है । गर्भाधानकालमें जो राशि लग्नमें स्थित हो उसमें मृदुभांश अर्थात् मकरनवांश अथवा कुंभनवांशका उदय हो और लग्नसे सातवें स्थानमें शनैश्चर स्थित हो तो तीन वर्षपर गर्भस्थका जन्म कहना चाहिये । और जो गर्भाधानकालिक लग्नमें कर्कनवांशका उदय हो और लग्नसे सातवें स्थानमें चन्द्रमा स्थित हो तौ बारह वर्ष गर्भस्थका जन्म कहना चाहिये । जिसके उच्चराशिमें पुरुषग्रह तीसरे भावमें स्थित हो तो उसके छः भाई होते हैं अन्यथा अर्थात् स्त्रीग्रह वा नपुंसकग्रहसे भगिनी कहना चाहिये ॥ ९-१२ ॥ इति सहजभावविचारः ॥

अथ सुखभावफलम् ।

तुर्यस्थाने स्थिताः पापा बालत्वे मातृकष्टदाः । सौख्यं सौम्याः प्रकुर्वन्ति राजसम्मानदायकाः ॥ १ ॥ लग्नाच्चतुर्थगः पापो यदि स्याद् बलवत्तरः । तदा मातृवधं कुर्यात्केन्द्रे वा न परो यदि ॥२॥ द्वितीये द्वादशे स्थाने यदा पापो व्यपोहति । तदा मातुर्भयं विद्याच्चतुर्थे दशमे पितुः ॥ ३ ॥ पापमध्यगते लग्ने चन्द्रे वा पापसंयुते । सौम्ये न धनगे पापे मातृहा सप्तवासरे ॥ ४ ॥

पापग्रह चौथे स्थानमें स्थित होवै तो बाल्यावस्थामें माताको कष्टदायक होते हैं. यदि शुभग्रह स्थित हों तो सौख्यको करते हैं और राजसम्मानदायक जानना । जिसके बलवान् होकर पापग्रह लग्नसे चतुर्थभावमें स्थित हों और केन्द्र (१।४।७।१०) स्थानमें और ग्रह न हों तो उसकी माता मरजाती है । दूसरे और बारहवें यदि पापग्रह प्राप्त होवें तो माताको और चौथे दशवें हों तो पिताको भय देते हैं। जिसके पापग्रहोंके बीचमें लग्न स्थित हो और चन्द्रमा पापयुक्त हो और शुभग्रह दूसरे स्थानमें नहीं तथा पापग्रह स्थित होवें तो ऐसे योगमें उसकी माता सात दिनमें मरजाती है ॥ १-४ ॥

चतुर्थे हन्यते माता दशमे च तथा पिता । सप्तमे भवने क्रूरास्तस्य भार्या न विद्यते ॥ ५ ॥ शन्यङ्गारकमध्यस्थः सूर्यः कुर्यात् पितुर्वधम् । मध्ये वा रजनीनाथो मातुर्मरणमादिशेत् ॥ ६ ॥ चन्द्रादष्टमगे पापे चन्द्रे पापसमन्विते । पापैर्बलिष्ठैः संदृष्टः सद्यो भवति मातृहा ॥ ७ ॥ लग्नस्थाने यदा जीवो धनस्थाने शनैश्चरः । राहुश्च सहजस्थाने माता तस्य न जीवति ॥ ८ ॥

क्रूरग्रह चौथे स्थानमें माताको, दशवें पिताको और सातवें स्थानमें स्त्रीको मारता है। शनैश्चर और मंगलके बीचमें सूर्य स्थित हो तो पिताको और मध्यमें चन्द्रमा स्थित हो तो माताको निःसन्देह मारता है। जिसके चन्द्रमासे आठवें पापग्रह स्थित हो और चन्द्रमा पापग्रहकरके युक्त हो तथा चन्द्रमाको बलवान् पापग्रह देखते हों तो उसकी माता शीघ्रही मरजाती है । जिसके जन्मलग्नमें बृहस्पति दूसरे स्थानमें शनैश्चर और तीसरे स्थानमें राहु हो उसकी माता नहीं जीती है ॥ ५-८ ॥

सिंहे भौमस्तुलां सौरिः कन्यायां वा सितो भवेत् । मिथुने च यदा राहुर्जननी तस्य नश्यति ॥ ९ ॥ चन्द्रः पापग्रहैर्युक्तश्चन्द्रो वा

पापमध्यगः। चन्द्रात्सप्तमगः पापस्तदा मातृवधो भवेत् ॥ १० ॥ एकादशे यदा क्रूरः पञ्चमे शुक्रशीतगू। प्रथमं कन्यका जाता माता तस्यास्तु कष्टगा ॥ ११ ॥ धने राहुर्बुधः शुक्रः सौरिः सूर्यौ यदा ग्रहाः। तदा मातुर्भवेन्मृत्युर्मृतोऽयं परिजायते ॥ १२ ॥

जिसके सिंहराशिमें मंगल, तुलामें शनैश्चर अथवा कन्यामें शुक्र और मिथुनमें राहु हो तो उसकी माता नहीं जीती है। जिसके चन्द्रमा पापग्रहोंकरके युक्त हो अथवा पापग्रहोंके बीचमें हो और चन्द्रमासे सातवें पापग्रह स्थित हो तो उसकी माता मरजाती है। जिसके ग्यारहवें क्रूरग्रह हो और पांचवें शुक्र चन्द्रमा हो तो प्रथम कन्या उत्पन्न होती है और उसकी माताको कष्ट होता है। जिसके दूसरे अथवा धनमें राहु, बुध, शुक्र, शनैश्चर और सूर्य होवे तो वह बालक मातासहित मरजाता है॥९-१२॥

नीचस्थानगते चन्द्रे तिष्ठेद्वै भार्गवात्मजः। पापासक्तो महाक्रोधी माता तस्य न जीवति ॥ १३ ॥ द्वादशे रिपुभावे च यदा पापग्रहो भवेत्। तदा मातुर्भयं विद्याच्चतुर्थे दशमे पितुः ॥ १४ ॥ त्रिसप्तगो दिवानाथो जन्मस्थश्च महीसुतः। तस्य माता न जीवेत वर्षमेकं पलद्वयम् ॥ १५ ॥ लग्ने च द्वादशे स्थाने यदि पापग्रहो भवेत्। तस्य माता भवेद्वन्ध्या पिता तस्य न जीवति ॥ १६ ॥ द्यूनाष्टमगते पापे क्रूरग्रहनिरीक्षिते। जनन्या सह मृत्युः स्याद्बालकस्य न संशयः ॥१७॥

जिसके नीचराशिमें चन्द्रमा शुक्र स्थित हो वह पापी और बडा क्रोधी होता है और उसकी माता नहीं जीती है। जिसके बारहवें छठे पापग्रह हों तो उसकी माताको और चौथे दशवें हो तौ उसके पिताको भय होता है। जिसके तीसरे सातवें सूर्य हो और जन्मलग्नमें मंगल हो तौ उसकी माता एकवर्ष बल्कि दो पलभी नहीं जीती है। जिसके लग्नमें बारहवें पापग्रह हो उसकी माता वंध्या होती है और उसका पिता नहीं जीता है। जिसके सातवें आठवें पापग्रह स्थित हो और क्रूरग्रहकी दृष्टि हो तो वह बालक मातासहित मरजाता है॥ १३-१७ ॥ इति सुखभावफलम् ॥

अथ सुतभावविचारः।

पञ्चमस्थाः शुभाः सर्वे पुत्रसन्तानकारकाः। क्रूराः सन्ततिमृत्यू च कुपुत्रं च धरासुतः ॥ १ ॥ बालस्य जन्मकाले तु पञ्चमो धरणीसुतः। अपुत्रश्च भवेद्बालो नारी चैव विशेषतः॥ २॥ अपुत्रं कुरुते

भानुः पुत्रमेकं निशाकरः । सशोकं पुत्रहीनं च पञ्चमो धरणीसुतः ॥३॥ उच्चो वा यदि वा नीचः पञ्चमः शिखिना स्थितः । हाहाकारं च कुरुते पुत्रशोकेन पीडितः ॥४॥ ऋतुरेतो अदृष्टो वा यदि चैको न पश्यति । अप्रसूतो भवेत्पुरुषः परिणयेद्द्वित्रिचतुःस्त्रियः ॥५॥

पंचमस्थानमें संपूर्ण शुभग्रह संतानकारक होते हैं और क्रूरग्रह संतानके मृत्युकारक होते हैं और मंगल कुपुत्रको देता है। जिस बालकके जन्मकालमें पांचवें मंगल स्थित हो तौ वह पुत्ररहित होता है और स्त्रीके यदि पंचम मंगल हो तो विशेष करके अपुत्रिणी होती है। सूर्य पंचम हो तो पुत्ररहित, चंद्रमा हो तो एक पुत्र होता है। पंचम मंगल हो तौ शोकयुक्त और पुत्रहीन होता है। जिसके उच्च अथवा नीच राशिका केतु पंचमभावमें हो वह पुत्रशोक करके पीडित होता है। यदि उस केतुको कोई ग्रह न देखता हो तो ऋतुका रेत बंद हो जाता है और दो तीन चार स्त्रियोंको विवाहनेपरभी प्रसूतिरहित मनुष्य होता है ॥ १–५ ॥

एकत्रिपञ्चपुत्रांश्च सूर्ये धीस्थे कुजे गुरौ । द्वि२त्रि३पञ्च५ च सप्तैव पुत्रीन्दौ ज्ञसितौ शनिः ॥ ६ ॥ पापः पञ्चमराशौ जातं जातं शिशुं विनाशयति । सप्तमराशौ पापा भार्यां बादरायणेनोक्तम् ॥ ७ ॥ एकः पुत्रो रवौ वाच्यश्चन्द्रे चैव सुताद्वयम् । भौमे पुत्रास्त्रयो वाच्या बुधे पुत्रीचतुष्टयम् ॥ ८ ॥ गुरौ गर्भे सुताः पञ्च षट् पुत्र्यो भृगुनन्दने । शनौ च गर्भपातः स्याद्राहौ गर्भो भवेन्न हि ॥९॥ सुतस्थाने द्विपापौ वा त्रिपापाश्चात्र संस्थिताः । तदा स्त्रीपुरुषौ वन्ध्यौ विज्ञेयौ सुतवीक्षिते ॥ १० ॥

पंचमस्थानमें स्थित सूर्य मंगल बृहस्पति क्रमसे एक तीन, पांच पुत्र देते हैं और चन्द्रमा, बुध, शुक्र शनि क्रमसे दो तीन पांच, सात पुत्री (कन्या) देते हैं। पंचमस्थानमें पापग्रह हों तो जो बालक उत्पन्न होजाता है उसको नष्ट कर देते हैं और सप्तम स्थानमें दो पापग्रह हों तो स्त्रीको विनाश कर देते हैं ऐसा बादरायणजीने कहा है। पंचमस्थानमें सूर्य होनेसे एक पुत्र, चन्द्रमासे दो कन्या, मंगलसे तीन पुत्र, बुधसे च्यार कन्या, बृहस्पतिसे पांच पुत्र, शुक्रसे छः कन्या कहना चाहिये। शनि पंचमस्थानमें हो तो गर्भपात करता है और राहु पंचम हो तो गर्भधारण ही नहीं होता है। सुतस्थानमें दो अथवा तीन पापग्रह स्थित हों अथवा सुतभावको देखते हों तो स्त्री पुरुष दोनों वंध्या होते हैं ॥ ६–१० ॥

ऋतुश्च कथितः शुक्रो रेतो भौमः प्रकीर्तितः। भौमः पश्यति यद्वर्षे तद्वर्षे गर्भसंस्थितिः॥ ११॥ ऋतू रेतश्च संपर्कौ जायते विषमा गतिः। करसंपुटमादाय वंध्या भवति निश्चितम्॥ १२ ॥ पुंराशौ लग्नपतिः सुताधिकं वीक्षते वाऽपि। सन्ततिबाधां कुरुते केन्द्रे पापान्विते चन्द्रे ॥ १३ ॥ लग्नात्पुत्रकलत्रभे शुभपतिः प्राप्तेऽथवाऽऽलोकिते चन्द्राद्वा यदि संपदस्तु हितयोर्ज्ञेयो यथा संभवः। पापेनोदयगे रवौ रविसुते मीनस्थिते दारहा पुत्रस्थानगतश्च पुत्रमरणं पुत्रो वने गच्छति ॥ १४ ॥ लग्ने द्वितीये यदि वा तृतीये विलग्ननाथे प्रथमः सुतः स्यात्। तुर्यस्थितेऽस्मिंश्च सुतो द्वितीयः पुत्री सुतो वेति पुरः प्रकल्प्यम् ॥ १५ ॥

शुक्रको ऋतु और मंगलको रेत कहा है। जिस वर्षमें भौम देखै उस वर्षमें गर्भकी स्थिति जाननी। ऋतुरेतके संगम करके विषमगति होनेपर करसंपुट ग्रहणकरके निश्चय वंध्या होती है। लग्नका स्वामी पुरुषराशिमें हो अथवा पंचमेशको देखता हो और चन्द्रमा पापग्रहयुक्त केन्द्र (१। ४। ७। १०) में स्थित हों तौ संततिको बाधा होती है। जिसके शुभराशिका स्वामी लग्नसे पांचवें सातवें स्थित होवै अथवा चन्द्रमासे पांचवें सातवें होवै तो वह संपदा और हितकरके युक्त होता है और जिसके पापग्रहसे युक्त सूर्य जन्मलग्नमें हो और शनैश्चर मीनराशिमें हो तो उसकी स्त्री मरजाती है और यदि पंचमस्थानमें स्थित होवै तो पुत्र मरजाते हैं तथा वनमें पुत्रकी उत्पत्ति होती है। जिसके लग्नका स्वामी लग्नमें या दूसरे या तीसरे भावमें स्थित होय तो उसके प्रथम पुत्र उत्पन्न होता है। क्रमसे कन्यापुत्र पुत्रकन्या कन्यापुत्र इत्यादि बारह भावमें रहते जानना ॥ ११-१५ ॥

धनस्थाने यदा क्रूरः क्रूरग्रहसमन्वितः। न पश्यति निजक्षेत्रमल्पपुत्रस्तदा भवेत् ॥ १६ ॥ सहज सहजाधीशो लग्ने वाऽथ धने भवेत्। जायते न तदा बालो यदि जातो न जीवति ॥१७॥ (यावत्संख्या इति काव्यं नवांशकस्थाने लिखितमस्ति पूर्वम्) ॥ झषधनुर्धरपञ्चमभावगे प्रसवसौख्यफलं न च दृश्यते। मृतप्रजः खलु पञ्चमगे गुरौ तदिह दृष्टिफलं शुभमश्नुते ॥ १८॥ लाभे सुते वा

शुक्रेन्दू सुते भौमोथवा क्रमात् । शुक्रेन्दू पश्यतः पुत्रं वर्षेऽस्मिन् सन्ततिस्तदा ॥१९॥ यत्र चैकादशे राहुः पञ्चमे च शिखी स्थितः । सुताननं न दृश्येत यदीन्द्रोऽपि च सेव्यते ॥ २० ॥

दूसरे भावमें क्रूर राशि हो और क्रूरग्रह उसमें स्थित हो और अपने क्षेत्रको न देखता होय तो वह थोडे पुत्रोंवाला होता है । जिसके तीसरे भावका स्वामी तीसरे लग्नमें अथवा दूसरे स्थानमें स्थित हो उसके बालक नहीं होता है, यदि उत्पन्न हो तो मरजाता है । जितनी संख्याका नवांश पंचमभावमें हो उतनेही संख्याकरके संतान उत्पन्न होती हैं । जिसके पंचमभावमें मीन अथवा धनुराशि होय उसको प्रसवसौख्यका फल नहीं दिखाई देता है अर्थात् उसके संतान उत्पत्ति नहीं होती है. यदि पंचमभावमें बृहस्पति हो तौ पुत्र उत्पन्न होकर मरजावे और जो बृहस्पति देखता होय तौ शुभ जानना । ग्यारहवें वा पांचवें शुक्र चन्द्रमा अथवा पांचवें मंगल क्रमसे होवें और शुक्र चन्द्रमा जिस वर्षमें पंचम भावको देखते होयँ उस वर्षमें सन्तान होती है । जिसके ग्यारहवें राहु पांचवें केतु हो तो उसके सन्तान नहीं होती है ॥ १६-२० ॥

इति सुतभावफलम् ॥

अथ रिपुभावविचारः ।

षष्ठे क्रूरा नरं कुर्युः शत्रुपक्षविवर्जितम् ।
सौम्याः षष्ठा महारोगान् षष्ठश्चन्द्रश्च मृत्युदः ॥ १ ॥

जिसके छठे भावमें क्रूरग्रह होवें वह शत्रुपक्षकरके रहित होता है और शुभग्रह स्थित होवैं तो महान् रोगको देते हैं और छठे चन्द्रमा मृत्युको देता है ॥ १ ॥

इति रिपुभावविचारः ॥

अथ जायाभावफलम् ।

कुभार्यां सप्तमे पापाः सौम्याः सर्वजनप्रियाम् । गुरुशुक्रौ शचीतुल्यां रूपलावण्यशालिनीम् ॥ १ ॥ षष्ठे च भवने भौमः सप्तमे सिंहिकासुतः । अष्टमे च यदा सौरिर्भार्या तस्य न जीवति ॥ २ ॥ जायाभावं सौरिशशी च राहुर्जायापतिः पश्यति सौख्यबाल्यम् । तस्यालये संभवतीह नारी श्यामा च गौरी बहुपुत्रिणी च ॥ ३ ॥

सातवें भावमें पापग्रह हों तौ कुभार्या देते हैं और शुभग्रह होवैं तो सर्वजनोंकी प्यारी ऐसी स्त्री देते हैं । बृहस्पति शुक्र सातवें स्थानमें हों तौ इन्द्रकी स्त्रीके समान रूपलावण्यमें प्रवीण स्त्रीको देते हैं । जिसके छठे भावमें मंगल, सातवें भावमें राहु

और आठवें भावमें शनैश्चर स्थित हो तौ उसकी स्त्री नहीं जीती है। जिसके सातवें स्थानमें शनि चन्द्रमा वा राहु हो और सप्तम भावका स्वामी जायाभावको देखता होवै तो बाल्यसुख होता है और उसकी स्त्री श्यामा गौरी और बहुपुत्रिणी होती है॥ १–३॥

लग्ने व्यये च पाताले जामित्रे चाष्टमे कुजः।
कन्या भर्तुर्विनाशाय भर्तुः कन्या विनश्यति ॥ ४ ॥

लग्नमें बारहवें आठवें चौथे सातवें मंगल हो तौ ऐसा योग कन्याके हो तो पतिको और पुरुषके हो तो स्त्रीको विनाश करता है ॥ ४ ॥

लग्ने पापग्रहे गौरी दुर्बलः शत्रुपीडितः। भवेदुर्वाच्यतायुक्तो भवेत् परवधूरतः ॥ ५ ॥ लग्नाद्व्यये वा रिपुमन्दिरे वा दिवाकरेन्दू भवतस्तदानीम् । स्यान्मानवस्यात्मज एक एव भार्यापि चैकेति वदन्ति सन्तः ॥६॥ गण्डान्तकाले च कलत्रभावे भृगोः सुते लग्नगतेऽर्कजातः। वन्ध्यापतिः स्यान्मनुजस्तदानीं शुभेक्षितं नो भवनं खलेन ॥ ७ ॥ व्ययालये वा मदनालये वा खलेषु बुद्ध्यालयगे हिमांशौ । कलत्रहीनो मनुजस्तनूजैर्विवर्जितः स्यादिति वेदितव्यम् ॥ ८ ॥

जिसके लग्नमें पापग्रह होवे उसकी स्त्री गौरीके समान होती है और वह मनुष्य दुर्बल शरीरवाला, शत्रुकरके पीडित, दुर्वचनोंकरके युक्त और परस्त्रीमें रत होता है। जिसके लग्नसे बारहवें वा छठे स्थानमें सूर्य चन्द्रमा स्थित हों तो उस मनुष्यके एक पुत्र और एकही स्त्री होती है। जिसका गण्डान्तसमयका जन्म शनैश्चर हो दूसरा अर्थ–सप्तमभावमें गण्डान्त लग्न होय और शुक्र सूर्य ये बैठे होयँ तो उस पुरुषकी स्त्री वन्ध्या होती है। शुभग्रह कोई न देखता होय और पापग्रहकी राशि होय तौ निश्चय ऐसा योग कहना चाहिये। जिसके बारहवें या सातवें पापग्रह बैठे होवें और पंचमभावमें चन्द्रमा होय तौ वह मनुष्य स्त्री पुत्रकरके विहीन होता है ॥ ५–८॥

संभूतिकाले च कलत्रभावे यमस्य भूमिं तनयस्य वर्गे। ताभ्यां प्रदृष्टे व्यभिचारिणी स्याद्भार्या स्वयं वै व्यभिचारकर्त्ता॥९॥शुक्रेन्दुपुत्रौ च कलत्रसंस्थौ कलत्रहीनं कुरुते नरं तौ । शुभेक्षितौ वा वयसो विरामे कामां च रामां लभते मनुष्यः ॥ १० ॥ चन्द्राद्विलग्नाच्च खलाः कलत्रे हन्युः कलत्रं च लयं गतौ तौ । चन्द्रार्कपुत्रौ च कलत्र-

संस्थौ पुनर्भवास्त्रीपरिलब्धिदौ स्तः ॥ ११ ॥ महीसुते सप्तमभावयाते कान्तावियुक्तः पुरुषस्तदा स्यात् । मन्देन दृष्टे म्रियतेऽचिरात्तदा सूर्येण दृष्टे बहुदुःखपीडितः ॥ १२ ॥ षष्ठे च भवने भौमः सप्तमे राहुसंभवः । अष्टमे च यदा सौरिस्तस्य भार्या न जीवति ॥ १३ ॥

जिसके जन्मसमय सप्तमभावमें शनि मंगलका षड्वर्ग होय और यही शनि मंगल देखते होंय तो उसकी स्त्री व्यभिचारिणी होती है और वह भी व्यभिचारी होता है। जिसके सप्तमभावमें शुक्र बुध बैठे होंय उसका विवाह नहीं होता है और जो शुभग्रहकी दृष्टि होय तौ बहुत दिनोंके बाद स्त्रीका लाभः होता है । जिसके जन्मलग्नसे अथवा चन्द्रमासे सातवें पापग्रह स्थित होय अथवा आठवें हो तो उसकी स्त्री मरजाती है और चन्द्रमा शनैश्चर सातवें स्थित होयँ तो पुनर्भवा स्त्री प्राप्त होती है। जिसके सप्तममें मंगल बैठा होय तो उसको स्त्रीसुख नहीं होता है और जो शनैश्चर देखता हो तो स्त्री मिलै परंतु थोडेही कालमें मरजावे। यदि शुभग्रहकी दृष्टि न होय और जो सूर्य देखता होवै तो बहुत दुःख करके पीडित जानना चाहिये। जिसके सातवें राहु छठे मंगल और आठवें शनैश्चर स्थित होवै उसकी स्त्री नहीं जीवे ॥९-१३॥

इति जायाभावफलम् ॥

अथायुर्भावविचारः ।

तत्रादावरिष्टभङ्गविचारः ।

पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् । आयुर्हीननराणां च लक्षणैः किं प्रयोजनम् ॥ १ ॥ खेटाः सर्वे महादुष्टा अष्टमस्थानमाश्रिताः॥२॥शशाङ्कस्तु विशेषेण जन्मकाले च मृत्युदः॥२॥कृष्णपक्षे दिवा जातः शुक्लपक्षे यदा निशि। तदा षष्ठाष्टमश्चन्द्रो मातृवत् परिपालकः ॥ ३ ॥ पञ्चमस्थो निशानाथस्त्रिकोणे च बृहस्पतिः। दशमे च महीसूनुः शतवर्षं स जीवति ॥ ४ ॥ शनैश्चरस्तुलाकुम्भमकरे यदि वा भवेत् । लग्ने षष्ठे तृतीये वा तदारिष्टं न जायते ॥५॥

विद्वान् जन प्रथम आयुर्दाय निश्चय करलेवै तब फलका विचार करै आयुर्हीन मनुष्योंके लक्षण कहनेसे कुछ प्रयोजन नहीं होताहै। संपूर्ण ग्रह अष्टमस्थानमें दुष्ट होते हैं और विशेष करके चन्द्रमा अष्टमस्थानमें मृत्युद्दायक होता है । कृष्णपक्षमें दिनका जन्म होय और शुक्लपक्षमें रात्रिका हो तो छठे आठवें स्थित चन्द्रमा माताके

समान उस बालकको पालता है। जिसके पांचवें चन्द्रमा, त्रिकोणमें बृहस्पति और दशवें मंगल हो तो वह सौ वर्ष जीता है। जिसके शनैश्चर तुला, कुंभ अथवा मकरराशिमें अथवा लग्न, छठे अथवा तीसरे हो तो उस बालकको अरिष्ट जानना १-५॥

राहुर्वृषे त्रिभिर्दृष्टे केतुदृष्टे चतुष्टये। वृषे च गुरुशुक्राभ्यां दीर्घकालं स जीवति ॥ ६ ॥ केन्द्रे शुभो यदैकोऽपि बली विश्वप्रकाशकः। सर्वे दोषाः क्षयं यान्ति दीर्घायुश्च भवेन्नरः ॥ ७ ॥ एकोऽपि केन्द्रे बुधजीवशुक्राः क्रूराः सहस्राणि विरुद्धयुक्ताः। तथापि सर्वाण्यपि यान्ति नाशं यथा मृगाः केसरिदर्शनेन ॥८॥ पाताले वाऽम्बरे लग्ने सुते धर्मे तथाऽऽयगे। बृहस्पतिस्तथा शुक्रो नाशयेद्दुरितं बहु ॥९॥ एकोऽपि केन्द्रे यदि ह्युच्चसंस्थः सर्वे ग्रहा भावगुणेन तुल्यम्। सर्वेऽप्यरिष्टं च विनाशयन्ति तमो यथा भास्करदर्शनेन ॥१०॥

जिसके वृषराशिमें राहुको तीन ग्रह देखते हों और केतुको चार ग्रह देखते हों और वृषमें बृहस्पति शुक्र हों तो वह बहुत कालतक जीता है। बलवान् विश्वप्रकाशक एक भी शुभग्रह यदि केन्द्रस्थान (१।४।७।१०) में स्थित हो तो संपूर्ण दोष नाश होजाते हैं और मनुष्य बडी उमरवाला होता है। बुध बृहस्पति शुक्र इनमेंसे एक भी केन्द्रस्थानमें स्थित हो और क्रूरग्रह हजारों अरिष्टोंकरके संयुक्त हों तो भी संपूर्ण अरिष्ट नाश हो जाते हैं जैसे सिंहके दर्शन करके मृग दूर हटजाते हैं। चौथे, दशवें, लग्न, पांचवें, नववें तथा ग्यारहवेंमें स्थित बृहस्पति तथा शुक्र बहुत अरिष्टोंको नाश करता है। अपने उच्च स्थानमें प्राप्त एक ग्रह भी यदि केन्द्रस्थानमें स्थित हो और सब ग्रह भाव गुणकरके समान हों तो संपूर्ण अरिष्ट नाश होजाते हैं जैसे सूर्यके उदयसे अंधकार ॥ ६-१० ॥

शुक्रो दशसहस्राणि बुधो दशशतानि च। लक्षमेकं तु दोषाणां गुरुर्लग्ने व्यपोहति ॥ ११ ॥ केन्द्रत्रिकोणगो जीवः शुक्रो वा चन्द्रनन्दनः। तस्य पुंसश्च दीर्घायुः स भवेद्राजवल्लभः ॥१२॥ गुरुर्धनुषि मीने वा तथा कर्कटकेऽपि वा। लग्नात्त्रिकोणे केन्द्रे वा तदारिष्टं न जायते ॥ १३ ॥ अजवृषकर्कटलग्ने रक्षति राहुः समग्रपीडाभ्यः। पृथ्वीपतिः प्रसन्नः कृतापराधं यथा पुरुषम् ॥ १४ ॥ राहुस्त्रिषष्ठलाभे

लग्नात् सौम्यैर्निरीक्षितः सद्यः । नाशयति सर्वदुरितं मारुत इव तूलसंघातम् ॥ १५ ॥

लग्नमें स्थित शुक्र दशहजार, बुध दशसौ और बृहस्पति एक लक्ष दोषोंको नाश करता है। जिसके केन्द्र (१ । ४ । ७ । १०) वा त्रिकोण स्थानमें बृहस्पति, शुक्र वा बुध स्थित हों तो वह पुरुष बडी उमरवाला और राजवल्लभ होता है । धनु, मीन अथवा कर्कराशिका बृहस्पति लग्नसे त्रिकोण (९ । ५) वा केन्द्रस्थानमें स्थित हो तो अरिष्ट नहीं होता है । मेष, वृष, कर्कराशिका राहु लग्नमें स्थित हो तो समग्र पीडाओंसे रक्षा करता है जैसे राजा प्रसन्न हुआ तो अपराधी पुरुषकोभी रक्षा करता है। शुभ ग्रहोंकरके देखाहुआ राहु लग्नसे तीसरे, छठे अथवा ग्यारहवें सर्व विघ्नोंको नाश करता है जैसे रुईको हवा ॥ ११-१५ ॥

विलग्नपो यत्र बलेन युक्तो लाभे तृतीये यदि कण्टके वा । सर्वाण्यरिष्टानि प्रयान्ति दूरं दीर्घायुरारोग्यतनुं करोति ॥ १६ ॥ एकोऽपि यदि केन्द्रस्थो भार्गवोऽथ गिरांपतिः । नवमे वा सुतस्थाने सर्वारिष्टं निवारयेत् ॥ १७ ॥ बुधभार्गवजीवानामेकतमः केन्द्रमाश्रितो बलवान् । क्रूरः सहायो यद्यपि सद्योऽरिष्टप्रशमनाय ॥ १८ ॥ स्वस्थानगोऽधिकबलः सुरराजमन्त्री केन्द्रोपगः प्रशमयेत्स्फुरदंशुजालः । एको बहूनि दुरितानि सुदुस्तराणि भक्त्या प्रयुक्त इव शूलधरे प्रणामः ॥१९॥ लग्नाधिपोऽतिबलवान् किल सौम्यदृष्टः केन्द्रस्थितैः शुभखगैरथ वीक्ष्यमाणः । मृत्युं विहाय विदधाति सुदीर्घमायुः संपूर्यते निजगृहं परया च लक्ष्म्या ॥ २० ॥

बलकरके युक्त लग्नका स्वामी ग्यारहवें तीसरे अथवा केन्द्रमें स्थित हो तो संपूर्ण अरिष्टोंको हटाकर दीर्घायु और आरोग्ययुक्त शरीर करता है। बृहस्पति शुक्र केन्द्र स्थानमें वा नववें पांचवें एक भी स्थित हो तो संपूर्ण अरिष्टोंको निवारण करता है । बलवान् होकर एकत्र बुध, शुक्र, बृहस्पति केन्द्रस्थानमें स्थित हों तो क्रूर ग्रहोंके सहायक होनेपर भी शीघ्रही अरिष्टोंको दूर करते हैं । बलवान् बृहस्पति एकही यदि स्वराशिमें प्राप्त होकर केन्द्रस्थानमें स्थित होय तो अनेक दुस्तर अरिष्टोंका नाश होजाता है, जैसे भक्ति करके शिवजीमें किया हुआ प्रणाम अनेक विघ्नोंका नाश करदेता है। लग्नका स्वामी बलवान् हो और बुधकी दृष्टि हो तथा शुभग्रह केन्द्रस्थानमें स्थित हो अथवा

वीक्ष्यमाण हो तो मृत्युको हटाकर दीर्घ आयुको देते हैं और वरको लक्ष्मीसे भरदेते हैं ॥ १६-२० ॥

लग्नादष्टमसंस्था गुरुबुधशुक्रा द्रेष्काणगश्चन्द्रः। मृत्युं प्राप्तमपि नरं परिरक्षत्ययुतबालम् ॥ २१ ॥ चन्द्रः संपूर्णतनुः सौम्यर्क्षगतोऽथवा शुभस्यान्ते। प्रकरोत्यरिष्टभङ्गं विशेषतः शुक्रसंदृष्टः ॥२२॥ रिपुगः शुभद्रेष्काणे स्थितः शशी सौम्याः खचराः सबलाः। कुर्वन्त्यरिष्टभङ्गं विशेषं यथा वसुधां चलुकः ॥ २३ ॥ सौम्यद्वयान्तर्गतः संपूर्णस्निग्धमण्डलश्चन्द्रः। भिनत्त्यशेषारिष्टान्भुजगारिर्भुजगलोकमिव ॥ २४ ॥ प्रस्फुरितकिरणजाले स्निग्धामलमण्डले बलोपेते। सुरमंत्रिणि केन्द्रगते सर्वारिष्टं क्षयं याति ॥ २५ ॥

लग्नसे अष्टमस्थानमें बृहस्पति, बुध, शुक्र, द्रेष्काणगत चन्द्रमा स्थित हो तो मृत्युको प्राप्तहुए भी बालककी रक्षा करता है। चन्द्रमा बलवान् होकर शुभग्रह बुधकी राशिमें स्थित हो अथवा शुभग्रहके अंतिमभावमें स्थित हो तो अरिष्टभंग करता है और शुक्रकरके दृष्ट हो तो विशेषकरके जानने। चन्द्रमा शुभ द्रेष्काणके छठे भावमें स्थित हो और सब शुभग्रह बलवान् हो तो विशेषकरके अरिष्टभंग करते हैं, जैसे यात्री भूमिको। पूर्णप्रकाशित बिंबवाला चन्द्रमा दो शुभग्रहोंके बीचमें स्थित होय तो सब अरिष्टोंको भंग करता है, जैसे गरुड नागलोकको। निर्मल आकाशको चन्द्रमाकी तरह यदि बृहस्पति केन्द्रस्थानमें होय तो संपूर्ण अरिष्ट नाश होते हैं ॥ २१-२५ ॥

सौम्यानां भवनगताः सौम्यांशकसम्भवद्रेष्काणस्थाः। गुरुचन्द्रकाव्यशशिजाः सर्वारिष्टस्य हन्तारः ॥ २६ ॥ चन्द्रोपाश्रितराशितपःकेन्द्रे शुभग्रहो वापि। प्रकरोत्यरिष्टभङ्गं पापानि यथा शिवस्मरणम् ॥ २७ ॥ पापा यदि शुभवर्गे सौम्यैर्दृष्टाः शुभांशवर्गस्थैः। निघ्नन्ति सदारिष्टं पतेर्विरक्ता यथा युवतिः ॥ २८ ॥ शीर्षोदयेषु राशिषु सर्वे गगनाधिवासिनोऽधिगताः। प्रतिहन्ति सर्वदुरितं यथा घृतं वाग्निसंयोगात् ॥ २९ ॥ तत्कालयुद्धविजयी शुभग्रहः शुभनिरीक्षितश्चापि। नाशयति कष्टनिवहं वात्या इव पादपं सकलम् ॥३०॥

बृहस्पति, चन्द्रमा, शुक्र, बुध ये शुभग्रहोंकी राशिमें शुभनवांश द्रेष्काणमें स्थित होवें तो संपूर्ण अरिष्टको नाश करते हैं। चन्द्रमा अथवा शुभग्रह नवम वा केन्द्र-

स्थानमें स्थित होतो अरिष्टभंग होजाता है, जैसे शिवके स्मरणसे पातक । पापग्रह यदि शुभग्रहों करके दृष्ट शुभवर्गमें अथवा शुभांशवर्गमें स्थित हों तो अरिष्टको नाश करते हैं, जैसे पतिको विरक्त स्त्री । संपूर्ण ग्रह शीर्षोदय राशियों (६ । ७ । ३ । ११ । ५ । ८) में स्थित हों तो सर्वविघ्नको नाश करते हैं, जैसे अग्निके संयोगसे घृत । तत्काल युद्धविजयी ग्रह शुभग्रहसे देखा हुआ कष्टको नाश करता है, जैसे वायु वृक्षको ॥ २६–३० ॥

गगनविभूषणसौम्यैर्दृष्टो नाशयति सर्वदुरितानि । संपूर्णमूर्तिरुडुपो दुर्नयनः खं यथा नाशम् ॥ ३१ ॥ उदये सप्तमुनीनां तथाऽगस्त्यः पुनरपि विलीयते । तदारिष्टं नवशीतिमिवापापैरवीर्यैश्च शुभैः सवीर्यैः ॥ ३२ ॥ शुभराशौ तनुभावपे निरीक्षिते व्योमचरैः । शुभाख्यैः संक्षीयतेऽरिष्टं मुखागतं हि ॥ ३३ ॥ मूर्तेस्तु राहुस्त्रिषडायवर्ती रिष्टं हरत्येव शुभैः प्रदिष्टः । शीर्षोदयस्थैर्विकृतिं न याति समस्तखेटैः खलु रिष्टभङ्गः ॥ ३४ ॥ तत्र व्यये लाभरिपुत्रिसंस्थः केतुस्तु हेतुर्निधनोपशान्त्यै । परस्परं भार्गवजीवसौम्यास्त्रिकोणगास्तेऽपि हरन्त्यरिष्टम् ॥ ३५ ॥

पूर्ण बलवान् चन्द्रमा संपूर्ण शुभ ग्रहोंकरके दृष्ट होय तो संपूर्ण विघ्नोंको नाश करता है । जिसका जन्म सप्तऋषियोंके उदयमें अथवा अगस्त्यमुनिके उदयकालमें हो तो उसके अरिष्ट दूर होजाते हैं. इसी प्रकार पापग्रह बलहीन और शुभग्रह बलवान् होवें तो भी अरिष्टभंग होजाते हैं. सम्पूर्ण शुभ ग्रहोंकरके देखा हुआ लग्नका स्वामी शुभ राशिमें स्थित होय तो मुखमें प्राप्त अरिष्टको भी नाश करदेता है । जो जन्मकालमें तीसरे छठे ग्यारहवें राहु बैठा होय और उसपर शुभग्रहोंकी दृष्टि होय और शीर्षोदयी राशिमें समस्त ग्रह बैठे होंय तो भी अरिष्टयोग भंग होजाता है । बारहवें, ग्यारहवें, छठे अथवा तीसरे स्थित केतु मृत्युको निवारता है और परस्पर त्रिकोणमें स्थित शुक्र बृहस्पति और बुधभी अरिष्टको नाश करते हैं ॥ ३१–३५ ॥

सन्ध्याभवा वैधृतिपातभद्रागण्डांतयुक्ता यदि जन्मकाले । भवंत्यरिष्टस्य विनाशनार्थं निरन्तरा दृश्यदले च सर्वे ॥ ३६ ॥ चतुष्टये श्रेष्ठबलाधिशाली शुभो नभोगोऽष्टमगो न कश्चित् । विंशन्मितायुः प्रकरोति नूनं दशान्वितं तच्छुभखेटदृष्टः ॥ ३७ ॥ निजात्रिभागे

स्वगृहे गुरुश्चेदायुर्गतिः स्यात्खलु विंशविंशत् । बृहस्पतिस्तुङ्गगतो विलग्ने भृगोः सुतः केन्द्रगतः शतायुः ॥ ३८ ॥ लग्ने स्वतुङ्गे बलशालिनीन्दौ सौम्याः स्वभस्थाः खलु षष्टिरायुः । मूलत्रिकोणेषु शुभेषु तुङ्गे लग्ने गुरावायुरशीतिरेव ॥ ३९ ॥ लग्नाष्टमारीन्दुयुता न चेत्स्युः क्रूराः स्वभस्था यदि खेचरौ द्वौ । बलान्वितावम्बरगौ भवेतां जातः शतायुः कथितो मुनीन्द्रैः ॥ ४० ॥

जिसका जन्म संध्याकाल अथवा वैधृतियोग और व्यतीपातयोगमें या भद्रामें या गंडान्तमें होता है और संपूर्ण ग्रह जिसके दृश्यभागमें होंय तो भी अरिष्टविनाश हो जाता है। शुभग्रह केन्द्रमें बली होकर बैठे और अष्टमभावमें कोई शुभग्रह न बैठे होंय तो बीसवर्षकी आयु होती है और शुभग्रहकरके दृष्ट होय तो तीस वर्षका आयुर्दाय होता है। बृहस्पति अपने द्रेष्काणमें और अपने घर (९। १२) में भी होंय तो पूर्ण आयुर्दाय होता है और कर्कका बृहस्पति लग्नमें, बैठा होय और शुक्र केन्द्रमें हो तो सौ वर्षका आयुर्दाय होता है। वृषराशिका चन्द्रमा लग्नमें हो और शुभग्रह अपनी २ राशिमें बैठे होंय तो साठवर्षका आयुर्दाय होता है और शुभग्रह अपने मूलत्रिकोणमें बैठे होंय और बृहस्पति बली होकर लग्नमें बैठे तो अस्सीवर्षका आयुर्दाय होता है। और जो चन्द्रमा लग्नमें छठे और आठवें न होय और क्रूरग्रह अपनी २ राशिमें होंय और दो ग्रह बलयुक्त दशमभावमें बैठे होंय तो सौ वर्षका आयुर्दाय मुनिजन कहते हैं ॥ ३६–४० ॥

शून्ये रन्ध्रे केन्द्रगैः सौम्यखेटैर्लग्ने जीवे नैधनेन्दूदयश्चेत् । नो संदृष्टाः पापखेटैस्तदा स्यादायुर्मानं सप्ततिर्वत्सराणाम् ॥ ४१ ॥ भानोरग्निभयं शशाङ्कमुदके भौमे मृतिश्चायुधैः सौम्ये कष्टज्वरं महान्तविषमे रामा च हस्ते गुरौ । शुक्रे वान्त्यक्षुधातृषा रविसुते मृत्युर्भवेत्सर्वदा सर्वे ते मरणं दिशन्ति सततं स्थाने स्थिते चाष्टमे ॥४२॥ दशमे पञ्चमे जीवो बुधश्चन्द्रश्च भार्गवः । शतंजीवी भवेज्जातो धनाढ्यो वेदपारगः ॥ ४३ ॥ नवमे पञ्चमे जीवो बुधो भवति सप्तमः । लग्ने भार्गवचन्द्रौ च शतंजीवी भवेन्नरः ॥ ४४ ॥

जो अष्टमभावमें कोई ग्रह न बैठे और सब शुभग्रह केन्द्रमें बैठे होंय और लग्नमें बृहस्पति बैठे, आठवें स्थानमें कर्कराशि होय और पापग्रह देखते नहीं होय तो सत्तर-

वर्षका आयुर्दाय होता है । सूर्यादिग्रह अष्टमस्थानमें स्थित क्रमसे इस प्रकार मरण करते हैं, यथा-जो अष्टमस्थानमें सूर्य स्थित होय तो अग्निकरके, चन्द्रमा स्थित हो तो जलकरके, मंगल हो तो हथियारकरके, बुध स्थित होय तो अत्यन्त विषमज्वरकरके, बृहस्पति होय तो विना मालूम रोगसे, शुक्र होय तो क्षुधा करके और शनैश्वर होय तो प्यासकरके मरण कहना चाहिये। दशवें पांचवें बृहस्पति, बुध, चन्द्रमा, शुक्र जिसके स्थित हों वह वेदपारग धनकरके युक्त सौ वर्ष जीनेवाला होता है । नववें पांचवें बृहस्पति, सातवें बुध, लग्नमें शुक्र चन्द्रमा होवैं तो मनुष्यकी सौ वर्षकी आयु होती है॥४१-४४॥

लघुजातकरीत्या गतिविचारः ।

सूर्यादिभिर्धनगैर्हुतवहसलिलायुधक्षुरामयजः। क्षुत्तृट्कृतश्च मृत्युः परदेशे नैधने चरभे ॥ ४५ ॥ यो वा बलवान्निधनं पश्यति तद्धातुकोपजो मृत्युः । लग्ने त्रिंशांशपतिर्द्वाविंशतिहायने मृत्युः ॥ ४६ ॥ विबुधपितृतिरश्चो नरकान् गुरुरिन्दुसितौ च । असृग्रवीज्ञयमौ रिपुरन्ध्रं त्रिंशपा नयन्ति विस्तारं निधनस्थाः ॥ ४७ ॥ षष्ठाष्टमकण्टकगो गुरुरुच्चे भाविमीनलग्ने वा । शेषैरबलैर्जन्मनि मरणे वा मोक्षगतिमाहुः ॥ ४८ ॥

सूर्यादिग्रह धनभावमें स्थित होय तो क्रमसे मरण करते हैं, यथा-सूर्य होय तो अग्निकरके, चन्द्रमा होय तो जलकरके, मंगल होय तो हथियारकरके, बुध होय तो अस्तुराकरके, बृहस्पति होय तो आमविकारसे, शुक्र होय तो भूंखसे और शनैश्चर होय तो प्यास करके मरण होता है । जिस मनुष्यके जन्मकालमें लग्नसे आठवें स्थानमें कोई ग्रह न स्थित हो तब उस अष्टमस्थानको बलवान् होकर जो ग्रह देखता होय उस ग्रहके कफ, वात, पित्तादिजनित धातुके कोपसे उस प्राणीका मरण होता है और लग्नमें त्रिंशांश लग्नका स्वामी स्थित होय तौ बाईस वर्षमें मरण कहना चाहिये । आठवें स्थानमें जो ग्रह स्थित होय उसी ग्रहके लोकको प्राणीका गमन होता है. अथवा छठे, आठवें इन दोनों स्थानोंमें जिस द्रेष्काणका उदय हो और इन दोनों द्रेष्काणके स्वामियोंमेंसे जो बलवान् होय उसी ग्रहके लोकको प्राणीका गमन कहना यथा-बृहस्पति होय तो देवलोकको, चन्द्रमा शुक्रमेंसे कोई हो तो पितृलोकको, मंगल सूर्य इनमेंसे कोई होय तो मनुष्यलोकको और बुध शनैश्चर होय तो नरकलोकको प्राणीका गमन होता है । जिसके जन्मकालमें छठे, आठवें वा केन्द्रमें उच्चराशिका बृहस्पति स्थित होय तो वह प्राणी मुक्तिको प्राप्त होता है और जो मीनलग्नसे जन्म हो और बृहस्पति लग्नमें बली होकर स्थित होय और संपूर्ण ग्रह निर्बल हों तो वह प्राणी मुक्तिको प्राप्त होता है ॥ ४५-४८ ॥

गुरुरुडुपतिशुक्रौ सूर्यभौमौ यमज्ञौ विबुधपितृतिरश्चो नारकीयांश्च कुर्युः । दिनकरशशिवीर्याधिष्ठितत्र्यंशनाथात्प्रवरसमनिकृष्टास्तुङ्गहासादिनूके ॥४९॥ स्थिरश्चरोद्वेगसमाह्वयश्च राशिर्यदा जन्मनि चाष्टमस्थः । स्वकीयदेशे विषयान्तरे वा आयुः प्रकुर्यान्मरणक्रमेण ॥ ५० ॥ आयुर्गृहं खेटविवर्जितं चेद्विलोकयेत् तद्बलवान् ग्रहेन्द्रः । तद्धेतुजातं प्रवदन्ति मृत्युं बहुप्रकारं बहवो बलिष्ठाः ॥ ५१ ॥ पित्तं कफः पित्तमथ त्रिदोषं श्लेष्मानिलो वाप्यनिलः क्रमेण । सूर्यादिकेभ्यो मरणस्य हेतुः प्रकल्पितः प्राक्तनजातकज्ञैः ॥ ५२ ॥

जिस मनुष्यके जन्मकालमें सूर्य और चन्द्रमा इन दोनोंमेंसे जो ग्रह बली जिस द्रेष्काणमें स्थित हो उस द्रेष्काणका स्वामी जो बृहस्पति होय तौ वह प्राणी देवलोकसे आया कहना और जो चन्द्रमा शुक्र इनमेंसे कोई हो तो पितृलोकसे आया कहना और जो सूर्य मंगल इनमेंसे कोई हो तो मनुष्यलोकसे आया कहना और शनैश्चर बुध होय तो नरक लोकसे आया हुआ प्राणी कहना चाहिये । जो पूर्वोक्त लोकसे आयेहुए प्राणियोंका ग्रह अपने उच्चस्थानमें स्थित हो तो उन प्राणियोंमें पूर्वोक्त लोकमें श्रेष्ठ जानना चाहिये और जो वही ग्रह अपने उच्चनीचके बीचमें स्थित हो तो उन प्राणियोंका हाल पूर्वजन्ममें मध्यम कहना और जो वही ग्रह अपने नीच स्थानमें स्थित हो तो उन प्राणियोंका पूर्वजन्ममें नीच हाल कहना चाहिये । जिसके अष्टम स्थानमें चरराशि होय वह प्राणी परदेशमें और स्थिर होय तो स्वदेशमें और द्विस्वभावराशि होय तो वह प्राणी रास्तेमें मरता है । जिस मनुष्यके जन्मकालमें लग्नसे आठवें स्थानमें कोई ग्रह न होय तो उस अष्टमस्थानको बलवान् होकर जो ग्रह देखता होय उस ग्रहके पूर्वोक्त कफ-वात-पित्तादिजनित धातुकोपसे उस प्राणीका मरण होता है और जो बली ग्रह भी बहुत देखते हों तो बहुप्रकार धातुके कोपसे उस जीवका मरण होता है । जो सूर्य मरणका हेतु होय तो पित्तकरके, चन्द्रमा होय तो कफकरके, मंगल होय तो पित्तकरके, बुध होय तो त्रिदोषकरके, गुरु होय तो कफकरके, शुक्र होय तो अग्निकरके तथा शनैश्चर होय तो भी अग्निकरके प्राणीका मरण होता है ॥ ४९-५२ ॥ इत्यरिष्टभंगप्रकरणम् ॥

अथ भाग्यभवनविचारः ।

विहाय सर्वं गणकैर्विचिन्त्यं भाग्यालयं केवलमत्र यत्नात् । आयुश्च माता च पिता च बन्धुर्भाग्यान्वितेनैव भवन्ति धन्याः ॥ १ ॥

यस्यास्ति भाग्यं स नरः कुलीनः स पण्डितः स श्रुतिमान् गुणज्ञः। स एव वक्ता स च दर्शनीयो भाग्यान्वितः सर्वगुणैरुपेतः ॥ २ ॥

ज्योतिर्विद्को बारहों भावोंके विचारको छोडके प्रथम भाग्यभावका विचार करना उचित है. जिसका भाग्योदय है उसके आयुर्दाय और माता पिता और बंधु ये सब धन्य हैं। जिसका भाग्योदय है वही पुरुष कुलीन, पंडित, श्रुतिमान्, गुणका जाननेवाला, वक्ता, दर्शनीय और सर्व गुणोंकरके युक्त होता है ॥ १ ॥ २ ॥

अथ भाग्योदयलक्षणम्।

द्वाविंशे रविणा च वर्षकथितं चन्द्रे चतुर्विंशतिर्ह्यष्टाविंशतिभूमिनन्दनमतं दातुर्बुधे च स्मृतम्। जीवे षोडश भृगोः पञ्चविंशति तथा षट्त्रिंश सौरी वदेत्कर्मेशात्खलु कर्म चैव कथितं लग्नाधिपौ चेत्स्मृतम् ॥ ३ ॥ भाग्ययोग्यान्तरे सौरिः स्थितो जन्म यथा भवेत्। लग्नपे तु विशेषेण यावज्जीवं समृद्धिमान् ॥ ४ ॥ मूर्तेश्चापि निशापतेश्च नवमं भाग्यालयं कीर्तितं तत्स्वस्वामियुतेक्षितं प्रकुरुते भाग्यं च देशोद्भवम्। चेदन्यैर्विषयान्तरेऽत्र शुभदाः स्वोच्चादिगाः सर्वदा कुर्युर्भाग्यमसाधवो न च बलाद्दुःखोपलब्धिं पराम् ॥ ५ ॥

नवमभावमें स्थित ग्रहके द्वारा भाग्योदय और दशमभावके स्वामीसे कर्म एवं लग्नाधिपकरके इस प्रकार क्रमसे जाने. यथा—सूर्यसे २२ वर्ष, चन्द्रमासे चौबीस २४, मंगलसे अट्ठाईस २८, बुधसे बत्तीस ३२, बृहस्पतिसे सोलह १६, शुक्रसे छब्बीस २६ और शनैश्चरसे छत्तीस ३६ वर्षपर कहना चाहिये। जिसके जन्मसमय भाग्ययोग्यान्तरमें शनैश्चर विशेषकरके लग्नका स्वामी स्थित हो तो वह मनुष्य जन्मपर्यन्त समृद्धिकरके युक्त होता है। लग्नसे या चन्द्रमासे जो नवमस्थान है वह भाग्यभाव हो उसके स्वामी अपने भावमें बैठे या देखै तौ मनुष्यका भाग्योदय अपनेही देशमें होता है और जो भाग्यभावको अपने स्वामी न देखै और शुभग्रह देखते होंय तो उसका भाग्योदय परदेशमें होना चाहिये और जो भाग्याधीश अपने उच्चादिराशिमें बली होकर बैठे या देखै तो उसका भाग्योदय सर्वदा रहता है और जो ग्रह निर्बल होय या पापग्रह देखते होंय तो बडे कष्टसे भाग्यका उदय होता है ॥ ३-५ ॥

भाग्येश्वरो भाग्यगतोऽस्ति किंवा स्वस्थानगः सारविराजमानः। भाग्याश्रितः कोऽस्ति विचार्य सर्वमत्यल्पमल्पं परिकल्पनीयम् ॥६॥ तनुत्रिसूनूपगतो ग्रहश्चेद्यो वाधिवीर्यो नवमं प्रपश्येत्। यस्य प्रसूतौ

स तु भाग्यशाली विलासशीलो बहुलार्थयुक्तः ॥ ७ ॥ चेद्भाग्यगामी खचरः स्वगेहे सौम्येक्षितो यस्य नरस्य सूतौ । भाग्याधिशाली स्वकुलावतंसो हंसो यथा मानसराजमानः ॥ ८ ॥ पूर्णेन्दुयुक्तौ रवि-भूमिपुत्रौ भाग्यस्थितौ सत्त्वसमन्वितौ च । वंशानुमानात्सचिवं नृपं वा कुर्वन्ति ते सौम्यदृशं विशेषात् ॥ ९ ॥ स्वोच्चोपगो भाग्यगृहे नभोगो नरस्य योगं कुरुते च लक्ष्म्या । सौम्येक्षितोऽसौ यदि भूमि-पालं दन्तावलोत्कृष्टविलासशीलम् ॥ १० ॥

भाग्यका स्वामी भाग्यभावमें होय अथवा केन्द्र त्रिकोणमें बली होकर बैठा होय तो उसका भाग्योदय होता है। अब उसे बली या निर्बल होनेसे अल्प अतिअल्प बलाबल ग्रहके होनेसे जानना । कोई ग्रह लग्नमें या तीसरे या पांचवें अत्यंत बली होकर नवमस्थानको देखे तो उसके भाग्यका उदय सुख और अनेक पदार्थ युक्त बडा धनी होता है। कोई ग्रह नवमस्थानमें बैठा होय और वह घर उसी ग्रहक होय अथवा कोई शुभग्रह उसको देखता हो तो वह बडा भाग्यशाली और अपने कुलका प्रकाश करनेवाला जैसे मानससरोवरमें हंसके तुल्य सुखभोग करनेवाला होता है। भाग्यस्थानमें पूर्णचन्द्रमाके साथ सूर्य मंगल बली होकर बैठे तो अपने वंशके अनुसार राजा व राजाका मन्त्री होता है और जो शुभग्रहकी दृष्टि होय तौ विशेषकरके फल होता है। जो भाग्यस्थानमें कोई शुभग्रह अपने उच्चराशिमें बैठा होय तो बहुत धनकी प्राप्ति करावै और जो शुभग्रह देखताभी होवै तो उसको हाथीकी सवारी मिलै और बडा सुखभोग करनेवाला होय ॥ ६-१० ॥ इति भाग्यभावः ॥

अथ दशमभावफलम् ।

समुदितमृषिवर्यैर्मानवानां प्रयत्नादिह हि दशमभावे सर्वकर्म प्रकामम् । गगनगपरिदृष्ट्या राशिखेटस्वभावैः सकलमपि विचिन्त्यं सत्त्वयोगात्सुधीभिः ॥ १ ॥ तनोः सकाशाद्दशमे शशाङ्के वृत्तिर्भवे-त्तस्य नरस्य नित्यम्। नानाकलाकौशलवाग्विलासैः सर्वोद्यमैः साहस-कर्मभिश्च ॥ २ ॥ तनोः शशांकाद्दशमे बलीयान् स्याज्जीवनं तस्य खगाख्यवृत्त्या । बलान्विताद्वर्गपतेस्तु यद्वा वृत्तिर्भवेत्तस्य खगस्य पाके ॥ ३ ॥ दिवामणिः कर्मणि चन्द्रतन्वोर्द्रव्याण्यनेकोद्यमवृत्ति-योगात्। सत्त्वाधिकत्वं च सदा सुरम्यं पुष्टत्वमङ्गे मनसः प्रसादः॥४॥

लग्नेन्दुतः कर्मणि चेन्महीजः स्यात्साहसाच्चौर्यनिषादवृत्तिः । नूनं नराणां विषयातिसक्तिर्दूरे निवासः सहसा कदाचित् ॥ ५ ॥

प्राचीन आचार्योंने दशमभावसे यत्नपूर्वक संपूर्ण कर्मोंका साधन उत्तम अधम कर्मोंका प्रकाश ग्रहोंकी दृष्टिसे और राशिके स्वभावसे और ग्रहोंके बलाबलसे संपूर्ण फलोंका निर्णय किया है । जन्मलग्नसे चन्द्रमा जिसके दशमभावमें बैठा होय वह पुरुष अनेक कारीगरीसे और वाग्विलाससे और अनेक उद्यम वा साहसकर्मसे धन पैदा करता है । लग्न या चन्द्रमासे दशमभावमें जो ग्रह बली होकर बैठे उसी ग्रहके अनुसार वृत्ति कहनी अथवा बली षड्वर्गके स्वामीसे उसकी दशामें वैसेही वृत्ति होनी चाहिये । चन्द्रमा वा लग्नसे दशमभावमें सूर्य बैठे तो उस पुरुषको अनेक वृत्ति और अनेक यत्नसे धनका लाभ होता है और जो वही सूर्य उच्चस्थानमें बली होकर बैठे तो सदा रम्य, शरीरसुख और मनकी प्रसन्नता सदैव बनी रहती है । लग्न या चन्द्रमासे दशमभावमें मंगल बैठा होय तो साहसकर्म, चोरी या निषादवृत्तिसे धनलाभ होता है और विषयासक्त, घरसे दूर निवास और साहसकर्मका करनेवाला होता है ॥ १–५ ॥

लग्नेन्दुभ्यां कर्मगो रौहिणेयः कुर्याद्द्रव्यं नायकत्वं बहूनाम् । शिल्पेऽभ्यासं साहसं सर्वकार्यै विद्वद्वृत्त्या जीवनं मानवानाम् ॥६॥ विलग्नतः शीतमयूखरश्मितो माने मघोनः सचिवो यदि स्यात् । नानाधनाभ्यागमनानि पुंसां विचित्रवृत्त्या नृपगौरवं च ॥७॥ होरायाश्च निशाकराद्भृगुसुतो मेषूरणे संस्थितो नानाशास्त्रकलाकलापविलसद्वृत्त्या दिशेज्जीवनम् । दाने साधुनि वै यथा विनयतां कामं धनाभ्यागमं नानामानवनायकादिविरलं विस्तीर्णशीलं यशः॥८॥ होरायाश्च सुधाकराद्रविसुतः शैलूषमध्यस्थितो वृत्तिं हीनतरां नरस्य कुरुते कार्श्यं शरीरे सदा । खेदं वादभयं च धान्यधनयोर्हानिं स्वबुच्चैर्मनश्चित्तोद्वेगसमुद्भवेन चपलं शीलं च नो निर्मलम् ॥ ९ ॥ जीवो द्विजात्माकरदेवधर्मैः शुक्रो महिष्यादिकरौप्यरत्नैः । शनैश्चरो नीचतरप्रकारैः कुर्यान्नराणां खलु कर्मवृत्तिम् ॥ १० ॥

लग्न और चन्द्रमासे जो दशमभावमें बुध होय तो बहुत जनोंका स्वामी, कारीगरीके कार्यमें निपुण, साहसी, लिखनेपढनेसे जीविका करता है । लग्न या चन्द्रमासे

दशमभावमें जो बृहस्पति होय तो अनेक प्रकारसे धनप्राप्ति करै, मंत्री विचित्र-वृत्तिवाला और राजगौरवकरके युक्त होता है । लग्न या चन्द्रमासे जिसके शुक्र दशमभावमें बैठा होय तो अनेक शास्त्रोंके पढनेसे और अनेक चतुराईसे धनकी प्राप्ति करै. दानमें साधुमति, उत्तम शीलस्वभाव, सर्वत्र प्रतिष्ठा व मान पानेवाला और विशाल यशवाला होता है । लग्न या चन्द्रमासे जिसके दशमभावमें शनि स्थित होय तो नीच-वृत्तिसे जीविका करनेवाला, शरीरमें रोग, सज्जनोंसे विवाद, धनधान्यहीन, चित्तमें उद्वेग, चपल शील स्वभाव और मलीन होता है । सूर्य चन्द्रमा लग्न इन तीनोंसे जो दशम-भावके स्वामी हैं उनमेंसे जो बली है वह जिस ग्रहके नवांशमें बैठा होय तो उसीके स्वभावतुल्य वृत्ति कहनी चाहिये. यथा बृहस्पति होय तो ब्राह्मणसे या उत्तमधर्म-साधन देवार्चन इत्यादिसे धनका लाभ होता है. जो शुक्र हो तो महिषी आदि वा चांदी या रत्नसे धनका आगम जानिये, शनि होय तो नीचकर्म करनेसे धन मिलै । सूर्य होय तो श्रेष्ठ औषधिसे ऊर्णावस्त्रोंसे जीविका होती है । चन्द्रमा होय तो स्त्री या जलसे या खेतीसे धन मिलता है । मंगल होय तो साहससे या स्वर्णादिधातुसे या शस्त्रसे जीविका होती है, बुध होय तो काव्यरचना या बुद्धिबलसे धन मिलै ॥९-१०॥

कर्मस्वामी ग्रहो यस्य नवांशे परिवर्तते । तत्तुल्यकर्मणा वृत्तिं निर्दिशन्ति मनीषिणः ॥ ११ ॥ मित्रारिगेहोपगतैर्नभोगैस्ततस्ततोऽर्थः परिकल्पनीयः । तुङ्गे पतङ्गे स्वगृहे त्रिकोणे स्यादर्थसिद्धिर्निजबाहुवीर्यात् ॥ १२ ॥ बुधभार्गवजीवार्कियुक्तो राहुश्चतुष्टये । कुरुते कमलारोग्यपुत्रमानादिकं फलम् ॥ १३ ॥ कर्मस्थाने निजक्षेत्रे भौमशुक्रबुधैर्युतः । यदि राहुर्भवेत्तस्य क्षणे वृद्धिः क्षणे क्षयः ॥ १४ ॥ पाताले चाम्बरे पापो द्वादशे च यदा स्थितः । पितरं मातरं हन्ति देशाद् देशान्तरं व्रजेत् ॥ १५ ॥

दशमभावका स्वामी जिसके नवांशमें बैठा होय उसीके तुल्य कर्मोंसे पंडितजन जीविकाको कहते हैं । मित्रगेहमें या शत्रुगेहमें जो ग्रह स्थित होते हैं वैसाही मित्र या शत्रुसे धनका लाभ कराते हैं. जो सूर्य अपने उच्चमें या स्वस्थानमें या मूलत्रि-कोणमें बैठा होय तो अपने बाहुबलसे अर्थकी सिद्धि होती है । जिसके बुध शुक्र बृहस्पति शनैश्चरकरके युक्त राहु केन्द्रस्थानमें स्थित होय तो वह पुरुष आरोग्यवान् पुत्रवान् आदि सिद्धियुक्त होता है । जिसके दशमस्थानमें अपनी राशिका मंगल शुक्र बुधकरके युक्त हो यदि राहुभी तहां स्थित हो तो उसकी क्षणमें वृद्धि और क्षणहीमें क्षय कहना चाहिये । जिसके पाताल (अष्टम) में दशवें बारहवें

पापग्रह स्थित होवें तो उसके मातापिताको मारनेवाले और देशसे भ्रमण करानेवाले होते हैं ॥ ११-१५ ॥

चापे सूर्यः शनिः कुम्भे मेषे भवति चन्द्रमाः । मकरे च यदा शुक्रो याति नाशं पितुर्धनम् ॥ १६ ॥ सप्तमे भवने भानुर्मध्यस्थो भूमिनन्दनः । राहुश्चान्ते च तस्यैव पिता कष्टेन जीवति ॥ १७ ॥ कन्यायां मिथुने राहुः केन्द्रे षष्ठे व्यये भवेत् । त्रिकोणे च तदा जातो दाता भोक्ता निरामयः ॥ १८ ॥ सूर्यः पापेन संयुक्तः सूर्यश्च पापमध्यगः । सूर्यात्सप्तमगः पापस्तदा पितृवधो भवेत् ॥ १९ ॥ दशमस्थो यदा भौमः शत्रुक्षेत्रस्थितो यदि । म्रियते तस्य बालस्य पिता शीघ्रं न संशयः ॥ २० ॥

जिसके धनुमें सूर्य, कुंभमें शनैश्चर, मेषमें चन्द्रमा और मकरमें शुक्र होय तो वह पिताके धनका नाश करनेवाला होता है । जिसके सातवें सूर्य, दशवें मंगल और बारहवें राहु हो तो उसका पिता कष्टसे जीता है । जिसके राहु कन्या या मिथुनराशिमें प्राप्त होकर केन्द्रमें, छठे, बारहवें अथवा त्रिकोणमें स्थित होय तो वह दाता, भोक्ता और निरामय होता है । जिसके सूर्य पापग्रहकरके युक्त होय अथवा पापग्रहोंके बीचमें स्थित होय और सूर्यसे सातवें पापग्रह हों तो उसके पिताकी मृत्यु होती है । जिसके दशमस्थानमें मंगल शत्रुक्षेत्रमें स्थित हो उसका पिता शीघ्र ही मरता है ॥ १६-२० ॥

लग्ने जीवो धने मन्दो रविर्भौमस्तदा बुधः । विवाहसमये तस्य बालस्य म्रियते पिता ॥ २१ ॥ भ्रातृस्थाने यदा जीवो लाभस्थाने यदा शशी । स लोके गृहमध्यस्थो जायते कुलदीपकः ॥ २२ ॥ सिंहे लग्ने यदा भौमः पञ्चमे च निशाकरः । व्ययस्थाने यदा राहुः स जातः कुलदीपकः ॥ २३ ॥

जिसके लग्नमें बृहस्पति, धनमें शनैश्चर, सूर्य मंगल तथा बुध स्थित हों तो उसके विवाहसमय पिता मरजाता है । जिसके तीसरे बृहस्पति, ग्यारहवें चन्द्रमा स्थित होय तो वह अपने घरमें कुलका प्रकाश करनेवाला होता है । जिसके सिंहलग्नमें मंगल पांचवें चन्द्रमा और बारहवें राहु होय तो वह कुलदीपक होता है ॥ २१-२३ ॥

एकः पापो यदा लग्ने पापश्चैको रसातले। जायते च द्विनाली स्यात्स जातः कुलदीपकः ॥ २४ ॥ लग्ने वा सप्तमे भौमः पञ्चमे च दिवाकरः। व्ययस्थाने यदा राहुर्विख्यातः स न संशयः ॥ २५ ॥ केन्द्रे शुभे यदैकोऽपि बली विश्वप्रकाशकः। सर्वदोषाः क्षयं यान्ति दीर्घायुश्च भवेन्नरः ॥ २६ ॥

एक पापग्रह लग्नमें और एक पापग्रह आठवें होय तो भी वह कुलदीपक होता है। जिसके लग्न या सातवें मंगल होय, पांचवें चन्द्रमा और बारहवें राहु होय तो वह निश्चय प्रसिद्ध मनुष्य होता है। जिसके केन्द्रमें यदि एकभी शुभग्रह बलवान् विश्वप्रकाशक स्थित होय तो संपूर्ण दोष (अरिष्ट) नाश होजाते हैं और वह बडी उमरवाला होता है ॥ २४–२६ ॥ इति दशमभावः ॥

अथ एकादशभावः।

लाभस्थाने ग्रहाः सर्वे राज्यलाभफलप्रदाः। गजाश्वपतिमीप्सां च सौम्याः कुर्वन्ति निश्चितम् ॥ १ ॥ सूर्येण युक्तः स्वविलोकितो वा लाभालये तस्य गणोऽत्र चेत्स्यात्। भूपालतश्चौरकुलात्कलेर्वा चतुष्पदादेर्बहुधा धनाप्तिः ॥ २ ॥ चन्द्रेण युक्तं च विलोकितं वा लाभालयं चन्द्रगणाश्रितं चेत्। जलाशयस्त्रीगजवाजिवृद्धिः पूर्णे भवेत्क्षीणतरे विलोमात् ॥ ३ ॥ लाभालयं मङ्गलयुक्तदृष्टं प्रकृष्टभूषामणिहेमलब्धिः। विचित्रयात्राबहुसाहसी स्यान्नानाकलाकोमलबुद्धियोगैः ॥ ४ ॥

ग्यारहवें स्थानमें संपूर्ण ग्रह राज्यलाभदायक होते हैं। शुभग्रह हाथी घोडेका स्वामी और ईप्सावान् पुरुषको करते हैं। जो लाभभावमें सूर्य बैठे होयँ या लाभभावको देखते होयँ या षड्वर्ग लाभभावको देखते होयँ या षड्वर्ग लाभभावमें होय तो राजासे या चोरोंसे या कलहसे या चौपाये जीवोंसे धनका लाभ होय। जो लाभभावमें चन्द्रमा बैठा होय या दृष्टि होय षड्वर्ग चन्द्रमाका होय तो जलाशयसे उत्पन्न धन या स्त्रीपक्षके धनका लाभ होय, हाथी घोडा सवारीका लाभ होय जो पूर्णचन्द्रमा होय और जो क्षीणचन्द्रमा होय तो विपरीत फल अर्थात् इन चीजोंकी हानि जाने। यदि लाभभाव मंगल करके दृष्ट या युक्त होय तो उत्तम रत्न सुवर्णके आभूषणोंका लाभ करावे और साहसकर्म देशाटन और बुद्धिका प्रकाश कला शीलमें होय ॥ १–४ ॥

लाभे सौम्यगणाश्रिते सति युते सौम्ये च सद्वीक्षिते नानाकाव्य-कलाकलापविधिना शिल्पेन लिप्या सुखम् । युक्तिर्द्रव्यमया भवेद्धनचयः सत्साहसैरुद्यमैः सख्यं चापि वणिग्जनैर्बहुतरं क्लीबैर्नृणां कीर्तितम् ॥ ५ ॥ यज्ञक्रियासाधुजनानुयातो राजाश्रितोत्कृष्टकृपो नरः स्यात् । द्रव्येण हेमप्रचुरेण युक्तो लाभे गुरौ वर्गनिरीक्षणं चेत् ॥ ६ ॥ लाभालये भार्गववर्गयाते युक्तेक्षिते वा यदि भार्गवेण । वेश्याजनैर्वापि गमागमैर्वा सद्रोप्यमुक्ताप्रचुराऽस्य लब्धिः ॥ ७ ॥ लाभवेश्मनिरीक्षितियुक्ते तद्गुणेन सहिते सति पुंसाम् । नीललोहमहिषीगजलाभो ग्रामवृन्दपुरगौरवमिश्रम् ॥ ८ ॥ युक्तेक्षिते लाभगृहे सुखाख्ये वर्गे शुभानां समवस्थिते च । लाभो नराणां बहुधाथवाऽस्मिन् सर्वैर्ग्रहैर्युक्तनिरीक्ष्यमाणे ॥ ९ ॥

लाभ भावमें बुध बैठा हो अथवा देखता होय और शुभग्रहभी देखते होंय तो अनेक काव्योंकी रचनासे या कारीगरीसे या लिखनेसे सुख होय और धनका संचय साहससे अथवा अनेक उद्यमोंसे तथा वणिक् जनोंकी मित्रता करके या क्लीब जनोंकरके धनलाभ होय । लाभभावमें बृहस्पति बैठा होय या देखता होय या षड्वर्ग होय तो यज्ञकर्मसे साधुजनोंके संगसे या राजासे बहुत धन, सोना, चांदी और बहुत विशेष धनका हमेशा लाभ होता है। लाभभावमें शुक्र बैठे होयँ या दृष्टि होय या षड्वर्ग होय तो वेश्याजनोंसे या परदेश जाने आनेसे धन मोती आदिक बहुत लाभ होता है। शनैश्चर लाभभावमें बैठे या देखते होयँ या षड्वर्ग होय तो नीलके व्यापारसे या लोहसे अथवा भैंस हाथीके व्यापारसे लाभ होता है और बहुत ग्रामोंसे लाभ धनकी वृद्धि हमेशा रहै । सब ग्रह जो लाभभावको देखते होंय और लाभस्थानसे वा चतुर्थस्थानमें शुभग्रहोंकी युति या दृष्टि या षड्वर्ग होय तो निरन्तर लाभ हुआ करै ॥ ५-९ ॥ इति लाभभावः ॥

अथ व्ययभावः ।

कुशीलं च तथा काणं पापिनं दुःखिनं नरम् ।
महाव्ययं महादुष्टं व्ययभावादयो ग्रहाः ॥ १ ॥
व्ययालये क्षीणकरः कलानां सूर्योऽथवा द्वावपि तत्र संस्थौ ।
द्रव्यं हरेद्भूमिपतिस्तु तस्य व्ययालये बाहुजदृष्टियुक्ते ॥ २ ॥

पूर्णेन्दुसौम्येज्यासिता व्ययस्थाः कुर्वन्ति संस्थां धनसञ्चयस्य। प्रान्त्यस्थिते सूर्यसुते कुजेन युक्तेक्षिते वित्तविनाशनं स्यात्॥३॥

बारहवें भावमें कोई ग्रह स्थित हो तो वह कुशील, काना, पापी, दुःखी, बड़ा खर्चीला और दुष्ट होवै। व्ययभावमें क्षीणचन्द्रमा अथवा सूर्य या दोनों बैठे होयँ तो उसका धन राजा हरै और जो मंगलकी दृष्टि होय तौ भी राजा धन हरता है। जो पूर्ण चन्द्रमा, बृहस्पति, बुध, शुक्र ये बारहवें भावमें बैठे होंय तो उसका धन शुभ कार्योंमें खर्च होय, जो बारहवें शनि बैठे या मंगलभी बैठा होय तो धनका नाश करै॥ १-३ ॥ इति व्ययभावः॥

अथाग्रे शेषाः श्लोका लिख्यन्ते--

उच्चाभिलाषिग्रहयोगा जन्मकाले पतन्ति च। स नरो भूपपूज्यः स्याद्वंशस्य नृपतिर्भवेत् ॥ १ ॥ रवौ मीने शशी मेषे भौमे धनुष्युदाहृतम्। सिंहे बुधे गुरौ मिथुने शुक्रः कुंभे तथैव च ॥ २ ॥ कन्ये शनिः प्रकुर्वीत ह्युच्चाभिलाषी प्रकीर्त्तितः ॥ ३ ॥

जिसके जन्मसमय सम्पूर्ण ग्रह उच्चाभिलाषी राशियोंमें होकर बैठे वह मनुष्य राजपूज्य और अपने वंशका राजा होता है। सूर्य मीनराशिमें उच्चाभिलाषी होता है, चन्द्रमा मेषमें, मंगल धनमें, बुध सिंहमें, बृहस्पति मिथुनमें, शुक्र, कुंभमें, शनैश्चर कन्याराशिमें उच्चाभिलाषी कहा है ॥ १-३ ॥

अथ सबलनिर्बलग्रहपरिज्ञानम्।

उदितः स्वगृहस्थश्च मित्रगेहे स्थितोऽपि च। मित्रवर्गेण दृष्टश्च स ग्रहः सबलः स्मृतः ॥ १ ॥ स्वामिना बलिना दृष्टः सबलैश्च शुभैर्ग्रहैः। न दृष्टो न युतः पापैः स लग्नः सबलः स्मृतः ॥ २ ॥

जो ग्रह उदित हो अथवा अपने घरमें हो या मित्रके घरमें स्थित हो या मित्रवर्ग करके देखा गया हो वह ग्रह बलवान् जानना। जो भाव अपने बलवान् स्वामीके पूर्णदृष्टिसे देखाजाता हो और बलवान् शुभग्रहभी देखते हों तथा पापग्रह करके न युक्त और न दृष्ट हो वह भाव बलवान् कहना चाहिये॥ १ ॥ २ ॥

अथ सर्वग्रहाणां दृष्टिः।

ज्ञार्केन्दुशुक्रास्त्रिदशं त्रिकोणं तुर्योऽष्टमद्यूनमथांशवृद्ध्या। पश्यन्ति तुर्याष्टमसप्तमस्थं दश त्रिकोणं च गुरुः क्रमेण ॥१॥ त्रिकोणं

चतुरस्रं च सप्तमं त्रिदशं शनिः । अस्तं त्रिखं त्रिकोणं च चतुरस्रं क्रमात्कुजः ॥ २ ॥ विषमस्तं चतुरस्रं त्रिकोणं तदा पश्यति । वक्रदृष्टिं विजानीयाज्ज्योतिःशास्त्रविशारदः ॥ ३ ॥ आये व्यये न पश्यन्ति न पश्यन्ति द्वितीयके । मूर्तौ ग्रहा न पश्यन्ति षष्टिजात्यन्धको ग्रहः ॥ ४ ॥

बुध, सूर्य, चन्द्रमा और शुक्र अपने स्थानसे तीसरे दशवें नववें पांचवें चौथे आठवें सातवें स्थानको अंशवृद्धि करके देखते हैं अर्थात् तीसरे दशवें स्थानको एक चरणकरके, नववें पांचवें दो चरणकरके, चौथे आठवें तीन चरणकरके और सातवें चारों चरण अर्थात् पूर्ण दृष्टिसे देखते हैं और इसी क्रमसे बृहस्पति अपने स्थानसे चौथे, आठवें, सातवें, दशवें, तीसरे और नववें पांचवें, स्थानको देखता है। शनैश्चर अपने स्थानसे एक चरणकरके नववें पांचवें, दो चरणकरके, चौथे आठवें तीन चरणकरके, सातवें और पूर्ण दृष्टिकरके तीसरे दशवें स्थानको देखता है। मंगल एक चरणकरके सातवें, दो चरणकरके तीसरे दशवें, तीन चरणकरके नववें पांचवें और पूर्ण दृष्टि करके चौथे आठवें स्थानको देखता है। विषम सातवीं चौथी आठवीं नववीं पांचवीं दृष्टिको ज्योतिषशास्त्रके निपुण जनोंने वक्रदृष्टि कहा है। ग्यारहवें, बारहवें दूसरे लग्न छठे स्थानको ग्रह नहीं देखते हैं ये अन्धक ग्रह जानना चाहिये ॥ १-४ ॥

इति सर्वग्रहाणां दृष्टिः ॥

अथ जन्मपत्रिकानामानि ।

तिथिवारं च नक्षत्रं नामाक्षरसमान्वितम् । वेदेन हरते भागं शेषं नाम तदुच्यते ॥ १ ॥ व्योमा द्योमा च मूर्द्धा च पद्मा चैव चतुर्थकम् । जन्मपत्री यदा नाम यो जानाति स पण्डितः ॥ २ ॥ व्योमा च पितृहानिः स्याद् द्योमा मातृक्षयंकरी । मूर्द्धा ह्यायुष्करी ज्ञेया पद्मा बलप्रदायिनी ॥ ३ ॥

जन्मसमयकी तिथि और वार नक्षत्र और नामके अक्षर इन सबको एकत्र करके चारसे भाग लेय जो शेष रहे उससे जन्मपत्री नाम जाने। एक शेषसे व्योमा, दोसे द्योमा, तीसरे मूर्द्धा और चार अर्थात् शून्य० शेषसे पद्मा इन जन्मपत्रीके नामोंको जो जानता है वह पंडित है। व्योमा होय तो पिताकी हानि और द्योमासे माताका नाश होवै, मूर्द्धा होवै तो आयुर्दाय बढावे और पद्मा होवै तो बल देनेवाली जन्मपत्री कहै ॥ १-३ ॥ इति जन्मपत्रीनामानि ॥

अथ जन्मसमये शब्दज्ञानम् ।

शब्दो मेषे वृषे सिंहे मकरे च तथा तुले ।
अर्द्धशब्दो घटे कन्ये शेषाः शब्दविवर्जिताः ॥ १ ॥

जिस बालकके जन्मसमय मेष, वृष, सिंह, मकर तथा तुला लग्न होय अर्थात् इन लग्नोंमेंसे किसी लग्नमें होय तो वह पैदा होते ही रोता है और कुंभ तथा कन्या लग्न होय तो थोडा रोता है और शेष लग्न अर्थात् मिथुन, कर्क, वृश्चिक, धनु, मीन इनमेंसे कोई हो तो शब्दरहित अर्थात् बालक नहीं रोता है ॥ १ ॥ इति शब्दज्ञानम् ।

अथ नाल-ज्ञानम् ।

वामे सिंहे वृषे लग्ने वृश्चिके नालवेष्टितः ।
नृलग्ने दक्षिणे पार्श्वे स्त्रीलग्ने वामपार्श्वगः ॥ १ ॥

सिंह ५, वृष २, वृश्चिक ८ इनमें जन्म होय तो वामतरफ नाल लपटा जानै और पुरुषलग्नमें दक्षिणपार्श्वमें तथा स्त्रीसंज्ञक लग्नमें वामपार्श्वमें नाल कहना चाहिये । मेष-लग्न पुरुष, वृष स्त्री, मिथुन पुरुष इत्यादि ॥ १ ॥ इति नालज्ञानम् ।

लग्नतो जन्मादिज्ञानम् ।

शीर्षोदये विलग्ने मूर्द्धाप्रसवोऽन्यथोदये चरणौ । उभयोदये च हस्तौ शुभदृष्टः शोभनेऽन्यथा कष्टः ॥ १ ॥ सूर्यश्चतुष्पदस्थः शेषा द्विशरीरसंस्थिता बलिनः । केशैर्वेष्टितदेहौ यमलौ खलु सम्प्रसूयेते ॥ २ ॥ क्रूरग्रहसंधिगते शशिनि वृषे भौमसौरिसंदृष्टे । मूकः सौम्यै-र्दृष्टो वाचं कालान्तरे वदति ॥ ३ ॥ दक्षिणाङ्गे ग्रहाःसर्वे दीप्ता अस्त-मितेक्षणाः । तस्य त्रिंशत्तमे वर्षे गजो द्वारेऽवतिष्ठति ॥ ४ ॥ चतुः-सागरगे चन्द्रे कोणे चैव दिवाकरे । अपि दासकुले जातः सोऽपि राजा भविष्यति ॥ ५ ॥ त्रिभिःस्वस्थैर्भवेन्मंत्री त्रिभिरुच्चैर्नराधिपः । त्रिभिर्नीचैर्भवेद्दासस्त्रिभिरस्तङ्गतैर्जडः ॥ ६ ॥

जिस के जन्मसमय शीर्षोदय मिथुन, सिंह, कन्या, तुला, वृश्चिक, कुंभ राशि लग्नमें होय तो उसको शिरकी तरफ पैदा हुआ कहे, अन्यथा पैरकी तरफसे जाने और मीन होय तो हाथकी तरफसे होना जाने । लग्नको शुभग्रह देखते होयँ तो पैदा होनेसे माताको कष्ट नहीं होता है और जो पापग्रह देखते होंय तो कष्ट कहना चाहिये सूर्य चतुष्पदराशिमें हो और शेष ग्रह मनुष्यराशिमें हों परंतु बलवान् होयँ तो एक

जेरसे लपटेहुए दो बालक पैदा होते हैं। जिसके क्रूरग्रह संधिमें अर्थात् नवम नवांशमें स्थित हों, चन्द्रमा वृषमें हो मंगल शनैश्चरकी दृष्टि होय तो वह बालक गूंगा होता है यदि शुभग्रह देखते हांय तो बहुत दिनोंके बाद बोलता है। जिसके जन्मपत्रके दाक्षिणांगमें दीप्त, अस्त सम्पूर्ण ग्रह स्थित हों तो तीस वर्षपर उसके द्वारमें हाथी बँधता है। चतुःसागरमें चन्द्रमा कोण ९। ५ में सूर्य जिसके स्थित हांय तो नीचकुलमें भी उत्पन्न हुआ राजा होता है। जिसके तीन ग्रह अपनी राशिमें स्थित हों वह मन्त्री होता है और तीन उच्चमें हों तो राजा होता है और तीन ग्रह नीचराशिमें हों तो दास होता है और तीन ग्रह अस्तको प्राप्त हों तो वह जड होता है ॥ १-६ ॥

अथ नवग्रहाणां पुरुषाकारचक्रम् ।

तत्रादौ सूर्यचक्रम् ।

लिखित्वा नरचक्रं च यत्र सूर्यो व्यवस्थितः । तन्नक्षत्रादिकं कृत्वा त्रयं दद्याच्च मस्तके ॥ १ ॥ वदने च त्रयं दद्यादेकैकं स्कन्धयोर्द्वयोः । बाहुद्वये तथैकैकं पाणौ चैकैकमेव च ॥ २ ॥ ऋक्षाणि हृदये पंच नाभौ स्यादेकमेव हि । ऋक्षं गुह्ये भवेदेकमेकैकं जानुनोर्द्वयोः ॥ ३ ॥ नक्षत्राणि षडन्यानि दद्यात्पादद्वये बुधः । पादस्थिते च नक्षत्रे निर्द्धनोऽल्पायुरेव च ॥ ४ ॥ विदेशगमनो जातो गुह्ये स्यात् पारदारिकः । अल्पतोषी भवेन्नाभौ हृदये चेश्वरस्तथा ॥ १-५ ॥

नरचक्र लिखके जिस नक्षत्रका सूर्य हो उस सहित तीन ३ नक्षत्र मस्तकपर धरै। मुखमें तीन ३ और दोनों स्कंधोंमें एक एक और दोनों भुजाओंमें एक एक तथा दोनों हाथोंमें भी एकही एक धरै और पैरोंमें एक एक धरै, पांच ५ नक्षत्र हृदयमें और तोंदीमें एक गुदामें एक दोनों गांठियोंमें भी एकही एक रक्खे। दोनों चरणोंमें छः नक्षत्र धरै। इस तरह सूर्यनक्षत्रसे जन्मके नक्षत्रतक गिन जावे। जो चरणोंमें जन्मका नक्षत्र पडै तो दरिद्र और थोडी आयुवाला हो। गाठियोंमें पडै तो विदेश गमन हो, गुदामें हो तो परस्त्रीगामी हो, तोंदीमें हो तो थोडेहीमें प्रसन्न हो, हृदयमें पडै तो समर्थ होता है ॥ १-५ ॥

तस्करः पाणियुग्मे च बाहौ स्थानच्युतो भवेत् । स्कन्धे गजस्कन्धगामी मुखे मिष्टान्नभोजनम् ॥ ६ ॥ मस्तकस्थे च नक्षत्रे पट्टबन्धो भवेन्नरः । सूयनक्षत्रतो जन्मनक्षत्रमिति गण्यते ॥ ७ ॥ शतवर्षाणि जीवेत शिरोजातो न संशयः । मुखेनाशीतिवर्षाणि स्कन्धाभ्यां च तथैव च ॥ ८ ॥ हस्ताभ्यां बाहुयुग्मेन जीवेत सप्तसप्ततिः ।

हृदये अष्टषष्टिश्च नाभौ चापि तथैव च ॥ ९ ॥ गुह्ये च षष्टिवर्षाणि चाष्टौ वर्षाणि जानुनि। पादयोः षट् च वर्षाणि रविचक्रे क्रमेण च १०

पाणिमें पडै तो चोर हो, बाहोंमें हो तो स्थान-च्युत होवै, स्कंधमें हो तो हाथीके कंधेमें चढनेवाला हो, मुखमें हो तो मीठा अन्न भोजन करनेवाला होता है। मस्तकमें पडे तो पट्टबंधी होता हैं। सूर्यके नक्षत्रसे जन्मके नक्षत्रतक गिनकर जाने। सूर्यचक्रमें जन्मका नक्षत्र मस्तकमें पडै तो सौ वर्ष जीवे, मुखमें पडे तो अस्सी वर्ष और स्कंधोंमें भी अस्सी ही वर्षकी उमर जाने। हाथोंमें अथवा दोनों बाहोंमें पडै तो सत्तर वर्ष, हृदयमें तथा नाभिमें पडै तो अडसठ वर्षकी आयु होवे। गुदामें पडै तो साठ वर्ष, जंघाओंमें आठ वर्ष और पैरोंमें पडे तो छः वर्ष जीवै। इस प्रकार सूर्यचक्रसे आयुर्दाय विचार करना चाहिये ॥ ६-१० ॥ इति सूर्यचक्रम् ॥

अथ चन्द्रचक्रम्।

पूर्णिमायां तु ऋक्षं यह तदादौ त्रीणि मस्तके। मुखे त्रीणि भुजे षट्कं हृदि त्रीण्युदरे त्रयम् ॥ १ ॥ गुह्ये त्रीणि पदे षट्कं न्यसेच्चन्द्रस्य सर्वदा। यावत्स्वजन्मनक्षत्रं गणनीयमिति क्रमात् ॥ २ ॥ अर्थसिद्धिर्न वृत्तश्रीः कुशलश्चाद्भुतं शुभम्। मार्गमृत्युं श्रियं क्षेममिति चन्द्रफलं वदेत् ॥ ३ ॥

निकट पूर्णिमाको जो नक्षत्र होय उस सहित तीन नक्षत्र शिरमें स्थापित करै फिर मुखमें तीन, भुजामें छः हृदयमें तीन और उदर (पेट) में तीन रक्खै। गुदामें तीन और पैरोंमें छः नक्षत्र धरे। जिस स्थानमें जन्मनक्षत्र होय तहां तक गिन जावे। अर्थसिद्धि, लक्ष्मी, कुशल, अद्भुतशुभ, मार्गमें मृत्यु, श्री, क्षेम यह फल क्रमसे पूर्वोक्त स्थानोंमें जाने. यथा शिरमें पडै तो अर्थसिद्धि, मुखमें जन्मनक्षत्र पडै तो लक्ष्मीवान् होय इत्यादि ॥ १-३ ॥ इति चन्द्रचक्रम् ॥

अथ भौमचक्रम्।

यस्मिन्नृक्षे भवेद्भौमस्तदादौ त्रीणि मस्तके। मुखे त्रीणि त्रयं नेत्रे कण्ठे द्वे च चतुष्करे ॥ १ ॥ पश्चोदरे त्रीणि गुह्ये पादे चत्वारि दापयेत्। जन्मऋक्षं स्थितं यत्र फलं तत्र वदेत्पुमान् ॥ २ ॥ मुखे रोगं सुखं नेत्रे शिरो राज्यं रुजा करे। कण्ठे रोगी धनी वक्षे गुह्ये भोगी पदे भ्रमः ॥ ३ ॥

जिस नक्षत्रपर मंगल हो उसको आदि देकर तीन नक्षत्र मस्तकमें धरे । मुखमें तीन ३, नेत्रोंमें तीन ३, कंठमें दो २, हाथोंमें चार ४, उदरमें पांच ५, गुदामें तीन ३, और पैरोंमें चार ४ नक्षत्र स्थापित करै जिस जगह जन्म नक्षत्र पडै तिसका फल कहै । मुखमें पडै तो रोग, नेत्रमें सुख, शिरमें पडै तो राज्य, हाथोंमें रोग, कंठमें पडै तो रोगी, छातीमें पडै तो धनी, गुदामें पडै तो भोगी और पैरोंमें जन्मनक्षत्र पडै तो परदेशमें भ्रमण करनेवाला होता है ॥ १-३ ॥ इति भौमचक्रम् ॥

अथ बुधचक्रम् ।

यस्मिन्नृक्षे भवेत्सौम्यस्तदादौ मस्तके चतुः । मुखे त्रीणि चतुर्वामे करे दक्षिणके चतुः ॥ १ ॥ हृदि पञ्चैकं गुह्यैकं त्रीणि द्वे पदे विन्यसेत् । जन्मऋक्षं स्थितं यत्र फलं तत्र वदेत् पुमान् ॥ २ ॥ मुखेष्टभुक्शिरो राज्यं कष्टं वामकरे तथा । वक्षे याम्यकरे सौख्यं गुह्ये रोगी पदे भ्रमः ॥ ३ ॥

बुध जिस नक्षत्रमें हो तिसको आदि देकर शिरमें चार, मुखमें तीन, बायें हाथमें चार, दाहिने हाथमें चार, हृदयमें छः, गुदामें चार और पैरोंमें दो नक्षत्र स्थापित कर जन्मनक्षत्र जहाँ पडै तिसका फल चिंतन करना । मुखमें जन्मनक्षत्र पडै तो श्रेष्ठ पदार्थोंका भोग करनेवाला, शिरमें राज्य, वामहाथमें कष्ट, दाहिने हाथमें सौख्य, गुदामें रोगी और पैरोंमें पडै तो भ्रमण करनेवाला होवै ॥ १-३ ॥ इति बुधचक्रम् ॥

अथ गुरुचक्रम् ।

शीर्षे चत्वारि राज्यं युगपरिगणितं स्कन्धयुग्मे च लक्ष्मी-
रेकं कण्ठे विभूतिर्मदनपरिमितं वक्षसि प्रीतिलाभम् ।
षड्भिः पीडांघ्रियुग्मे जलधिपरिमितं वामहस्ते च मृत्यु-
र्दृग्युग्मे त्रीणि कुर्यान्नृपतिसमसुखं वाक्पतेश्चक्रमेतत् ॥ १ ॥

बृहस्पति जिस नक्षत्रमें हो तिसको आदि देके मस्तकमें चार राज्यको देनेवाले हैं, फिर चार दोनों स्कंधोंमें लक्ष्मीके देनेवाले हैं, कंठमें एक ऐश्वर्यका देनेवाला है फिर हृदयमें पांच प्रीतिके देनेवाले हैं, दोनों चरणोंमें छः पीडाको देनेवाले हैं, फिर चार ४ बायें हाथमें मृत्युको देनेवाले हैं, दोनों नेत्रोंमें तीन राजाकी बराबर सुख देनेवाले हैं ॥ १ ॥ इति गुरुचक्रम् ॥

अथ भृगुचक्रम्।

यस्मिन्नृक्षे भवेच्छुक्रस्तदादौ च चतुः शिरे। कण्ठे च हृदये पञ्च त्रि गुह्ये पञ्च जङ्घयोः॥ १॥ त्रीणि द्वे च पदे दद्यात्फलं जन्मर्क्षं यावतः। शिरो राज्यं धनं कण्ठे हृदये सौख्यमेव च॥ २॥ शत्रुभीतिर्भवेद्गुह्ये जङ्घायां मिष्टभोजनम्। पादे च सुखसंप्राप्तिः शुक्रचक्रे क्रमेण च॥ ३॥

जिस नक्षत्रमें शुक्र होय तिसको आदि देकर चार नक्षत्र शिरमें स्थापित करै. कंठमें पांच, हृदयमें तीन, मुखमें दो, बाहोंमें सात, गुदामें तीन, जंघाओंमें तीन, पादोंमें दो इस प्रकार जन्मनक्षत्रतक गणना करै. शिरमें पडे तो राज्य, कंठमें धनवान्, हृदयमें सौख्य,गुदामें शत्रुभय और जंघाओंमें पडै तो मीठा अन्न भोजन करनेवाला,पादमें सुखप्राप्ति होवै इस क्रमसे शुक्रचक्र जानना॥ १-३॥ इति शुक्रचक्रम्॥

अथ शनिचक्रम्।

शनिचक्रं नराकारं लिखित्वा सौरिभादितः। नामऋक्षं भवेद्यत्र ज्ञेयं तत्र शुभाशुभम्॥ १॥ नक्षत्रमेकं च शिरोविभागे तथा मुखे त्रीणि युगं च गुह्ये। नेत्रे च नक्षत्रयुगं हृदिस्थं भूपञ्चकं वामकरे चतुष्कम्॥ २॥ वामे च पादे त्रितयं च भानां भानां त्रयं दक्षिणपादसंस्थम्। चत्वारि ऋक्षाणि च दक्षिणेतरे पाणौ प्रणीतं मुनिनारदेन॥ ३॥ रोगो लाभो हानिरातिश्च सौख्यं बन्धः पीडा सत्प्रयाणं च लाभः। मान्दे चक्रे मार्गगे कल्पनीयं तद्वैलोम्याच्छीघ्रगे स्यात्फलानि॥ ४॥

जिस नक्षत्रमें शनैश्वर स्थित हो उसको आदि देकर नराकार चक्र लिखे। जहां नामका नक्षत्र पडे उसका शुभाशुभ फल कहै। एक नक्षत्र शिरमें स्थापित करै और तीन मुखमें और चार नक्षत्र गुदामें, दो नेत्रोंमें, हृदयमें तीन, बायें हाथमें चार स्थापित करै। बायें चरणमें तीन और दक्षिणचरणमें तीन और दाहिने हाथमें चार स्थापित करै। यह चक्र इस प्रकार नारदमुनिने कहा है। जो शनिनक्षत्र शिरमें पडे तौ वह पुरुष रोगी रहे और जो मुखमें पडे तो लाभ होय, गुदामें पडे तो हानि होय, नेत्रमें पडे तो धनकी प्राप्ति होय और जो हृदयमें पडै तो सुखी होय और जो बायें हाथमें पडै तो बंधन होय और जो बायें चरणमें पडै तो पीडा होय और जो दक्षिण चरणमें पडै तो श्रेष्ठ यात्रा होय और दक्षिण हस्तमें पडै तो लाभ होय॥ १-४॥

अथापरः प्रकारः ।

यस्मिन्भ्च्छनिश्चराति वक्रगतं तदृक्षं चत्वारि दक्षिणकरेऽङ्घ्रियुगे च षट्कम् । चत्वारि वामकरणेऽप्युदरे च पञ्च मूर्ध्नि त्रयं नयनयोर्द्वितयं गुदे च ॥ १ ॥ रोगो लाभस्तदा द्रव्यं लाभो बन्धनमेव च । पूजा च जनसौभाग्यमल्पमृत्युः क्रमात्फलम् ॥ २ ॥

जिस नक्षत्रमें शनैश्चर हो उस नक्षत्रसे उलटे चार दाहिने हाथमें, दोनों चरणोंमें छः, चार नक्षत्र वामकरणमें, पेटमें पांच, मस्तकमें तीन, नयनों वा गुदामें दो दो स्थापित करै तौ स्पष्टचक्र होता है । रोग, लाभ, धन, लाभ, बंधन, पूजा, सौभाग्य, अल्पमृत्यु क्रमसे पूर्वोक्त स्थानोंमें फल विचारना चाहिये अर्थात् दाहिने हाथोंमें पडै तो रोग और चरणोंमें पडे तो लाभ इत्यादि ॥ १ ॥ २ ॥ इति शनिचक्रम् ॥

अथ राहुचक्रम् ।

यस्मिन्नृक्षे भवेद्राहुस्तदादौ सप्त पादयोः । दक्षिणे च भुजे पञ्च शिरसि त्रीणि दापयेत् ॥ १ ॥ द्वे ऋक्षे हृदये न्यस्य मुखे चैकं नियोजयेत् । पञ्च ऋक्षं करे ज्ञेयं ऋक्षमेकं च नाभिगम् ॥ २ ॥ तत्रैव त्रीणि गुह्ये च राहुचक्रं विधीयते । धनहानिर्भवेत्पादे संतापं दक्षिणे करे । शीर्षे शत्रुभयं विद्याद्धृदये दुर्जनप्रियम् ॥ ३ ॥ मुखे दुर्जनसंहारं मृत्युर्वामे करे भवेत् । नाभिस्थं सर्वनाशाय गुह्ये प्राणविनाशनम् ॥ ४ ॥

जिस नक्षत्रमें राहु होय तिसको आदि देकर सात नक्षत्र पावोंमें स्थापित कर दक्षिणभुजामें पांच ५, शिरमें तीन ३ धरै । दो नक्षत्र हृदयमें, मुखमें एक, पांच नक्षत्र वामहाथमें और एक १ तोंदीमें रक्खै । गुदामें तीन नक्षत्र स्थापित कर राहुचक्र बनावे. पावोंमें जन्मनक्षत्र पडै तो धनहानि होवै. दक्षिणभुजामें पडै तो संताप हो. मस्तकमें पड़ै तो शत्रुभय हो और हृदयमें पडै तो दुर्जनप्रिय होवे । मुखमें पडै तो दुर्जनोंका नाश और बायें हाथमें पडै तो मृत्यु हो, तोंदीमें पडै तो सर्वनाश हो और गुदामें जन्मनक्षत्र पडै तो प्राणोंको नाश करै ॥ १-४ ॥ इति राहुचक्रम् ॥

अथ केतुचक्रम् ।

शीर्षे पञ्च द्वे मुखे पञ्च कर्णे वक्षे च द्वौ वेदऋक्षं च हस्ते ।
अंघ्रौ पंच बस्ति चत्वारि ज्ञेयं केतोश्चक्रं प्रोदितं बुद्धिमद्भिः ॥ १ ॥

मुखे भयं मूर्ध्नि जयं करोति कर्णे भयं पाणियुगे च सौख्यम्।
पादे सुखं वक्षसि शोकमेव गुह्ये भ्रमं दुःखविकारहेतुः ॥ २ ॥

जिस नक्षत्रमें केतु होय उस सहित पांच नक्षत्र मस्तकमें स्थापित करै. मुखमें दो २, कर्णमें पांच ५, हृदयमें दो २, हाथमें चार ४, अंघ्रिमें पांच ५, बस्तिमें चार नक्षत्र धरै। इस प्रकार बुद्धिमान् जन केतुचक्र कहते हैं। मुखमें जन्म नक्षत्र पडै तो भय होवै, मस्तकमें जय, कर्णमें भय, दोनों हाथोंमें सौख्य, पादमें सुख, हृदयमें शोक और गुदामें जन्मनक्षत्र पडै तो भय और दुःखविकारका हेतु जानना ॥१॥२॥

इति पुरुषाकारनवग्रहचक्रम् ॥

अथ नवप्रकारकग्रहफलम्।

दीप्तः १ स्वस्थो२ मुदितः३ शान्तः ४ शक्तः ५ प्रपीडितो ६ दीनः ७।
विकलः ८ खलश्च ९ कथितो नवप्रकारो ग्रहो हरिणा ॥ १ ॥
दीप्तस्तुङ्गगतः खगो निजगृहे स्वस्थो हिते हर्षितः
शान्तः शोभनवर्गगश्च खचरः शक्तः स्फुरद्रश्मिभाक्।
लुप्तः स्याद्विकलः स्वनीचगृहगो दीनः खलः पापयुक्
खेटो यः परिपीडितश्च खचरैः स प्रोच्यते पीडितः ॥ २ ॥

दीप्त १, स्वस्थ २, मुदित ३, शांत ४, शक्त, पीडित ६, दीन ७, विकल ८ और खल ९ ये अवस्था नवप्रकारसे ग्रहोंकी कही गई हैं। जो ग्रह अपने उच्चराशिमें बैठा है उसकी अवस्था दीप्ता है और जो ग्रह अपने घरमें बैठा है उसकी अवस्था स्वस्था है अर्थात् सावधान है और जो मित्रके घरमें हैं वे हर्षित हैं और जो शुभग्रहके षड्वर्गमें हों उनकी शांत अवस्था जानिये और जो उदयको प्राप्त है अर्थात् अस्त नहीं है वह शक्तावस्थामें है और जो अपने नीचराशिमें है अथवा सूर्यके किरणोंमें अस्त होगया है वह दीन है अर्थात् दुःखित है और जो पापग्रहके साथ बैठा है वह खल है और जो पापग्रहोंसे पीडित है वह पीडितावस्थामें है ॥ १॥ २॥

अथ अवस्थाफलम्।

दीप्ते प्रतापादतितापितारिर्गलन्मदालंकृतकुञ्जरेशः। नरो भवेत्त-
न्निलये सलीलं पद्मालयालङ्कुरुते विलासम् ॥ ३ ॥ स्वस्थे महद्वाहन-
धान्यरत्नविशालशालाबहुलेन युक्तः। सेनापतिः स्यान्मनुजो महोजा
वैरिव्रजावाप्तजयाधिशाली ॥ ४॥ हर्षिते भवति कामिनीजनोऽत्यंत-

भूषणमाणिव्रजवित्तः । धर्मकर्मकरणैकमानसो मानसोद्भवचयो हत-शत्रुः ॥ ५ ॥ शान्तेऽतिशान्तो हि महीपतीनां मन्त्री स्वतन्त्रो बहु-मित्रपुत्रः । शास्त्राधिकारी सुतरां नरः स्यात्परोपकारी सुकृतैक-चित्तः ॥ ६ ॥ शक्तेऽतिशक्तः पुरुषो विशेषात्सुगन्धमाल्याभिरुचिः शुचिश्च । विख्यातकीर्तिः सुजनः प्रसन्नो जनोपकर्ताऽरिजनप्रहर्ता॥७॥

जो ग्रह दीप्तावस्थामें है उसका फल बडा श्रेष्ठ और बहुत प्रतापयुक्त, हाथियोंके समूह उसके साथ चलते हैं, धनी पुरुष और शत्रुजनोंका जीतनेवाला और विख्यात कीर्तिवाला होता है और उसके घर लक्ष्मी निरन्तर निवास करती है। जिसके जन्मकालमें ग्रह स्वस्थावस्थामें है वह पुरुष बहुत वाहनोंसे सुख पानेवाला और बडे उत्तम स्थानमें निवास करनेवाला और धन धान्ययुक्त और बहुत सेनाका स्वामी और शत्रुजनोंका विजय करनेवाला होता है । जिसका ग्रह हर्षितावस्थामें होता है वह मनुष्य स्त्रीजनोंसे बहुत सुख भोग विलास करनेवाला, रत्नादिभूषणका धारण करनेवाला, बडा धनवान्, उत्तम कीर्ति करनेवाला, धर्ममें नियुक्त और शत्रुकरके हीन होता है। जिसका ग्रह शान्तावस्थामें बैठा है वह अधिक शांतियुक्त, राजाओंका मंत्री, स्वतंत्र, बहुत मित्र पुत्रोंसमेत सुखी प्रसन्नचित्त शास्त्रोंका पढनेवाला, निरन्तर विद्याका अभ्यास करनेवाला और परोपकारी तथा सावधान चित्तवाला होता है । जिसका ग्रह शक्तावस्थामें बैठा हो वह विशेषकर सब कार्योंके करनेमें समर्थ होता है और सुंगधमाल्यादिकोंमें अभिरुचि रखनेवाला, पवित्र आत्मा, विख्यातकीर्ति, सुजनोंमें प्रसन्न होनेवाला तथा जनोंका उपकार करनेवाला वा शत्रुजनोंका मारनेवाला होता है ॥ ३-७ ॥

हतबलो विकले मलिनः सदा रिपुकुलप्रबलत्वगलन्मतिः । खल-सखः स्थलसंचरतो नरः कृशतरः परकार्यगतादरः ॥ ८ ॥ दीनेति दीनोपचयेन तप्तः संप्राप्तभूमीपतिशत्रुभीतिः । संत्यक्तनीतिः खलु हीनकान्तिः स्वजातिवैरं हि नरः प्रयाति ॥ ९ ॥ खलाभिधाने हि खलैः कलिः स्यात्कान्तातिचिन्तापरितप्तचित्तः । विदेशयानं धन-हीनतान्तःकोऽपि भवेल्लुब्धमतिप्रकाशः ॥ १० ॥ पीडिते भवति पीडितः सदा व्याधिभिर्व्यसनतोऽपि नितान्तम् । याति संचलनतां निजस्थलाद्व्याकुलत्वमपि बन्धुचिन्तया ॥ ११ ॥

जिसका ग्रह विकलावस्थामें बैठा होय वह निर्बल, मलिन, सदा शत्रुजनोंसे पीडित निर्बुद्धि, नीचोंका संग करनेवाला, परदेशमें वसनेवाला व बहुत दुर्बल और पराये कार्यका करनेवाला होता है। जिसका ग्रह दीनावस्थामें बैठा हो वह दीन और राजासे पीडित वा शत्रुओंसे भयभीत, नीतिरहित, हीनकांति होकर अपने जनोंसे वैरका करनेवाला होता है। जिसका ग्रह खलावस्थामें बैठा हो वह खलोंसे लडाई करनेवाला, स्त्रीसे दुःखी, चिंतासे व्याकुल, द्रव्यकी इच्छा करताहुवा परदेशमें भ्रमण करनेवाला, धनहीन होकर क्रोध करताहुवा निर्बुद्धिवाला होता है। जिसका ग्रह पीडितावस्थामें बैठा हो वह सदा व्याधियोंसे पीडित होताहुआ निर्वस्त्र होकर परदेशको जाता है और अपने बंधुओंकी चिंतासे व्याकुल आत्मा होता है॥ ८-११॥

इति दीप्तादिनवावस्थाफलम्॥

अथ गजचक्रम्।

येन विज्ञानमात्रेण यात्रा युद्धे जयो भवेत्॥ १॥ गजाकारं लिखेच्चक्रं सर्वावयवसंयुतम्। अष्टाविंशतिऋक्षाणि देयानि सृष्टिमार्गतः॥ २॥ मुखे शुण्डाग्रे नेत्रे च कर्णशीर्षांघ्रिपुच्छके। द्विकं द्विकं च दातव्यं पृष्ठोदरे चतुश्चतुः॥ ३॥ द्विरदव्ययभान्यादौ वदनाद्गण्यते बुधैः। यत्र ऋक्षे स्थितः सौरिर्ज्ञेयं तत्र शुभाशुभम्॥ ४॥

अब मातंगनायकके चक्रको कहता हूं जिसके विचारकरके यात्रा और युद्धमें जय प्राप्ति होती है। संपूर्ण अंगोंकरके संयुक्त हाथीके आकारका चक्र लिखे। फिर सृष्टि मार्गकरके अट्ठाईस नक्षत्र स्थापित करे। मुखमें, शुंडाग्रमें, आंखोंमें, कानमें, मस्तकमें, अंघ्रि (चरण) में और पूछमें दो दो नक्षत्र स्थापित करे, पीठ और पेटमें चार चार। पंडितजन अश्विनी आदि प्रथम बारह नक्षत्र मुखसे गणना करे, जहां जिस नक्षत्रमें शनैश्चर स्थित हो उसका शुभाशुभ फल कहे॥ १-४॥

मुखे शुण्डाग्रे नेत्रे च सौरिभं मस्तकोदरे। युद्धकाले गते यस्य जयस्तस्य न संशयः॥ ५॥ पृष्ठे पादे च पुच्छे च कर्णसंस्थे शनैश्चरे। मृत्युर्भङ्गो रणे तस्य ऐरावतसमो यदि॥ ६॥ एतेषां दुष्टभङ्गानां तत्कालः संस्थितः शनिः। तत्काले पट्टबन्धोऽपि वर्जनीयः प्रयत्नतः॥ ७॥ पृथिव्या भूषणं मेरुः शर्वर्या भूषणं शशी। नराणां भूषणं विद्या सैन्यानां भूषणं गजः॥ ८॥

मुखमें, शूंडके अगले भागमें, नेत्रमें, मस्तकमें तथा पेटमें यदि शनैश्चरका नक्षत्र पडैगा ऐसे समय युद्धमें उसकी जय होती है और पीठमें, पैरोंमें, पुच्छमें अथवा कानमें शनैश्चरका नक्षत्र स्थित होवे तो ऐरावतके समान होनेपर भी उसकी मृत्यु और रणमें भंग होवे । ये दुष्टभंगस्थान शनैश्चर स्थितिके मनुष्य पट्टबंध होनेपर भी शीघ्रही यत्न करके यात्रादिमें वर्जित करै । पृथ्वीका आभूषण सुमेरु पर्वत है, रात्रिका आभूषण चन्द्रमा है, मनुष्योंका आभूषण विद्या है, इसी प्रकार सेनाका आभूषण हाथी है ॥ ९–८ ॥ इति गजचक्रम् ॥

अथ अश्वचक्रम् ।

अश्वाकारं लिखेच्चक्रमश्वधिष्ण्यादितारकाः । वदनात्सृष्टिगा देया अष्टाविंशतिसंख्यया ॥ १ ॥ मुखाक्षिकर्णशीर्षेषु पुच्छांघ्री युग्मसंख्यया । पञ्चपञ्चोदरे पृष्ठे सौरिर्यत्र फलं ततः ॥ २ ॥ मुखाक्षिकर्णशीर्षस्थो यदा सौरिस्तुरङ्गमे । तदाऽरिर्भङ्गमायाति रणे शत्रुर्वशं गतः ॥ ३ ॥ कर्णांघ्रिपृष्ठे पुच्छस्थे अश्वाङ्गेष्वर्कनन्दने । विभ्रमं भङ्गहानिं च कुरुतेऽसौ महाहवे ॥ ४ ॥ एतत्स्थानस्थितः सौरिः सदा काले हयस्य च । पट्टबन्धे गमे युद्धे वर्जयेत्तं हयं नृपः ॥ ५ ॥ देशान्तरास्थितः सौरी रिपवः सन्ति शङ्किताः । तुरङ्गा यस्य भूपस्य विचरन्ति महीतले ॥ ६ ॥

अश्वाकार चक्र लिखकर अश्विनी आदि अट्ठाईस नक्षत्र सृष्टिमार्गकरके स्थापित करै । मुख, नेत्र, कर्ण, मस्तक, पूंछ, अंघ्रि इनमें दो दो नक्षत्र धरै । उदर और पीठमें पांच पांच स्थापित करै, फिर जहां शनैश्चर स्थित हो तिसका फल कहै । मुखमें नेत्रमें कर्णमें मस्तकमें यदि शनैश्चर अश्वचक्रमें स्थित हो तो युद्धमें शत्रुका भंग होकर शत्रु वशमें आजावे और कर्णमें अंघ्रिमें पीठमें पूंछमें शनैश्चर हो तो युद्धमें विभ्रम भंग हानि करे । अश्वचक्रमें इन स्थानोंमें स्थित शनैश्चर पट्टबंधमें यात्रामें युद्धमें वर्जित करना चाहिये । तुरंगचक्रमें अन्यत्र शनैश्चर जिस राजाके स्थित हो उसके शत्रुजन शंकासहित पृथ्वीपर विचरते हैं ॥ १–६ ॥ इत्यश्वचक्रम् ॥

अथ शतपदचक्रम् ।

चक्रं शतपदं वक्ष्ये ऋक्षांशाक्षरसंभवम् । नामादिवर्णतो ज्ञेयमृक्षराश्यंशकं तथा ॥ १ ॥ तिर्यगूर्ध्वगता रेखा रुद्रसंख्या लिखेद्बुधः ।

अ	ब	क	ह	ड	मो	मे	मु	मौ	ग
इ	वि	कि	हि	डि	टो	टे	टु	टी	ट
उ	वु	कु	हु	डू	पो	षे	षु	प	प
ए	वे	के	हे	डे	रो	रे	रु	रा	र
ओ	वो	को	हो	डो	तो	ते	तू	ती	त
ल	लि	लू	ले	लो	वो	जो	भो	यो	नो
च	चि	चू	चे	चो	मे	जे	भ	ये	ने
द	दि	दू	दे	दो	शु	जु	भु	यु	नु
श	शि	शू	शे	शो	मि	[illegible]	भि	यि	यु
ग	गि	गू	गे	गो	प	ज	भ	य	न

जायते कोष्ठकं तत्र शतमेकं न संशयः ॥ २ ॥ न्यस्यावकहडादीनि रुद्रादिविदिशः क्रमात् । पञ्चपञ्च क्रमेणैव विंशद्वर्णान्प्रयोजयेत् ॥ ३ ॥ पञ्चस्वरसमायोग एकैकं पञ्चधा कुरु । कुर्यात्कुपुमृदुस्थानि त्रीणि त्रीण्यक्षराणि च ॥ ४ ॥ कुघङव भवेत्स्तंभो रौद्रईशानगोचरे । पुषणठ भवेत्स्तंभो हस्तमाग्नेयसंज्ञके ॥ ५ ॥ भधफढ भवेत्पूर्वं दुघडज उत्तरातले । एवं स्तम्भचतुष्कं च ज्ञातव्यं स्वरवेदिभिः ॥ ६ ॥ धिष्ण्यानि कृत्तिकादीनि प्रत्येकं चतुरक्षरैः । साभिजित्पञ्चशस्तस्य शतकं द्वादशाधिकम् ॥ ७ ॥ यदृक्षांशककोष्ठस्थः क्रूरः सौम्योऽपि वा ग्रहः । यतस्तद्वर्जयेन्नित्यं पुंसो नामाद्यमक्षरम् ॥ ८ ॥

शतपदचक्र बनानेका क्रम चक्रसे स्पष्ट समझ लेना, फिर नामके अक्षरसे वेध विचारना ॥ १-८ ॥

सौम्यैर्विद्धे शुभं ज्ञेयमशुभं पापखेचरैः ।
मिश्रैर्मिश्रफलं तत्र निर्वेधेन शुभाशुभम् ॥ ९ ॥
यदुक्तं सर्वतोभद्रं ग्रहोपग्रहवेधतः ।
शुभाशुभफलं सर्वं तदिहापि विचिन्तयेत् ॥ १० ॥

शुभग्रहसे नामादि अक्षरका वेध होय तो शुभ जानना और पापग्रहोंके वेधसे अशुभ और मिश्र अर्थात् शुभग्रह और पापग्रह दोनोंका वेध होय तो मिश्रफल जानना. यदि वेध न होय तो शुभाशुभफल चिंतन करना जैसा सर्वतोभद्रचक्रमें उपग्रहके वेधसे शुभाशुभ फल कहा है, वैसाही इस चक्रमें भी वेधका फल विचार करना ॥ ९ ॥ १० ॥ इति शतपदचक्रम् ॥

अथ सूर्यकालानलचक्रम् ।

सूर्यकालानलं चक्रं स्वरशास्त्रोदितं महत् । तदहं विशदं वक्ष्ये चमत्कृतिकरं परम् ॥ १ ॥ त्रिशूलकाग्राः सरलाश्च तिस्रः कीलोर्ध्व-रेखाः परिकल्पनीयाः । रेखात्रयं मध्यगतं च तत्र द्वे द्वे च कोणोपरिगे विधेये॥२॥त्रिशूलकोणान्तरगान्यरेखा तदग्रयोः शृङ्गयुगं विधेयम् । मध्यं त्रिशूलस्य च दण्डमूलात्सव्येन भान्यर्कभतोऽभिजिच्च ॥ ३ ॥

सूर्यकालानलचक्र जो स्वरशास्त्रमें कहा है उसको हम कहते हैं बडा चमत्कारी फलका देनेवाला है । तीन रेखा खडी खींचे तिनमें एकएक रेखामें एकएक त्रिशूल बनावे और तीन रेखा उत्तरसे दक्षिण तरफ आडी बनावे और दो दो रेखा उन कोणोंमें बनावे । त्रिशूल और कोणोंके बीचमें शृंग बनावे, दहिने बायें तरफ मध्य त्रिशूलके दंडके नीचे जिस नक्षत्रपर सूर्य होय उस नक्षत्रको वहां स्थापित करै, वाममार्गसे अभिजितसहित अट्ठाईसों नक्षत्र स्थापित करै ॥ १-३ ॥

स्वनामभं यत्र गतं च तत्र प्रकल्पनीयं सदसत्फलं हि । तत्तस्य ऋक्षत्रितये क्रमेण चिन्ता वधश्च प्रतिबन्धनानि ॥ ४ ॥ शृङ्गद्वये रुक् च भवेच्च भङ्गः शूलेषु मृत्युं परिकल्पयन्ति । शेषेषु धिष्ण्येषु जयश्च लाभोऽभीष्टार्थसिद्धिर्विविधा नराणाम् ॥ ५ ॥

अपने नामका नक्षत्र जहांपर पडै तिसका शुभाशुभ फल जान ले । नीचेके तीनों नक्षत्रोंका फल चिंता वध और बंधन होता है । दोनों शृंगके नक्षत्रोंका फल रोग है और भंग है और जो त्रिशूलके ऊपर नव नक्षत्र हैं तिनका फल मृत्यु है और जो छः नक्षत्र मध्यके हैं उनका फल जय, लाभ और अभीष्टसिद्धि है ॥ ४ ॥ ५ ॥

श्रीसूर्यकालानलचक्रमेतद्द्वन्द्वे च वादे च रणे प्रयाणे । प्रयत्नपूर्वं परिचिन्तनीयं पुरातनानां वचनं प्रमाणम् ॥ ६ ॥ रवेर्वेधे मनस्तापो द्रव्यहानिश्च भूसुते । रोगपीडाकरो मन्दो राहुः केतुश्च मृत्युदः॥७॥ गुरोर्वेधे भवेल्लाभो रत्नलाभश्च भार्गवे । स्त्रीलाभश्चन्द्रवेधे च सुखं स्याद्बुधवेधतः ॥ ८ ॥ जन्मराशेश्च वेधेन फलमेतत्प्रकीर्तितम् ॥९

यह सूर्यकालानलचक्र रोगमें, विवादमें, संग्राममें और यात्रामें विचारने योग्य है । सूर्यके वेधसे मनको ताप हो, मंगलसे द्रव्यकी हानि हो, शनैश्चरके वेधसे रोग और पीडा हो, राहु केतुके वेधसे मृत्यु हो । बृहस्पतिके वेधसे लाभ, शुक्रके

वेधसे रत्नका लाभ, चन्द्रमाके वेधसे स्त्रीलाभ और बुधके वेधसे सुख होता है। जन्म राशिके वेधसे यह फल कहागया है ॥ ६-९॥ इति सूर्यकालानलचक्रम् ॥

चन्द्रकालानलचक्रम्।

चन्द्रकालानलं चक्रं व्योमाकारं लिखेद्बुधः। चतुर्दिक्षु त्रिशूलानि मध्ये त्र्यस्राणि कारयेत् ॥ १ ॥ पूर्वं त्रिशूलमध्यस्थं दिवसर्क्षं समालिखेत्। त्रिशूले च बहिर्मध्ये मध्ये बाहिस्त्रिशूलके ॥ २ ॥ नामर्क्षं च स्थितं यत्र ज्ञेयं तत्र शुभाशुभम् ॥ ३॥ त्रिशूले च भवेन्मृत्युर्मध्यमं बहिरष्टके। आयुः प्रजा जयो लाभश्चन्द्रगर्भे न संशयः॥४॥

चन्द्रकालानलचक्र व्योमाकार बनाकर चारों दिशाओंमें त्रिशूल लिखे और मध्यवर्ती दोनों रेखा कोणमें लिखे आग्नेयसे वायव्यतक और नैऋत्यसे ईशानतक। पूर्वको त्रिशूलके मध्यमें दिनका नक्षत्र अर्थात् चन्द्रमाका नक्षत्र स्थापित करै फिर त्रिशूलके बाहर मध्य बाहर और मध्य त्रिशूलके अट्ठाईसों नक्षत्र क्रमसे रखदे। अपने नामका नक्षत्र जहांपर पडे तो उसका शुभाशुभ फल जानलेवे। त्रिशूलमें जो नक्षत्र पडे तो मृत्यु होय और बाहरके आठ नक्षत्र है उनका फल मध्यम है और जो संपुटके भीतरके नक्षत्र हैं उनका फल आयु प्रजा जय और लाभ जानना ॥ १-४ ॥

इति चन्द्रकालानलचक्रम् ॥

अथ यमदंष्ट्राचक्रम्।

नवोर्ध्वगानि धिष्ण्यानि नव तिर्यग्गतानि च। अधोगतानि धिष्ण्यानि नव चैव विनिर्दिशेत् ॥ १ ॥ चतुर्नाडीकृतो वेधो जन्मनक्षत्रयोगतः। सर्पाकारं च वक्रं च कालचक्रं प्रजायते॥२॥ त्रीणि मध्यगतर्क्षाणि तानि कालमुखानि च। कोणस्थिते चन्द्रधिष्ण्ये तच्च दंष्ट्राद्वयं मतम् ॥ ३ ॥ दिनर्क्षमादितः कृत्वा नामर्क्षं यत्र संस्थितम् मुखदंष्ट्रागते मृत्युः शुभमन्यत्र संस्थिते ॥ ४ ॥ ज्वरे च दुष्टदंष्ट्रे च विवादे विग्रहे रणे। कालदंष्ट्रास्थगं नाम यस्य तस्य महद्भयम् ॥५॥

जन्मनक्षत्रसे नवनक्षत्र ऊपर और नव तिरछा और नव नक्षत्र नीचे स्थापित करै। मध्यके चार नाडीकृत वेध विचारै और सर्पके आकारका चक्र यमदंष्ट्रा बनता है मध्यके तीन नक्षत्रोंको कालमुख और कोणमें स्थित २४ नक्षत्रोंको यमदंष्ट्रासंज्ञक जानना। दिनके नक्षत्रको आदि लेकर नामका नक्षत्र जहां स्थित हो तहां तक गणना करै ज्वरमें, मुखमें अथवा दंष्ट्रामें नामनक्षत्र पडे तो मृत्यु होवै और अन्यत्र शुभ जानना।

दुष्टजीवोंके काटनेमें, विवादमें, लडाईमें तथा युद्धमें यमदंष्ट्राचक्रविषे यदि नामनक्षत्र, मुखमें अथवा दंष्ट्रामें पडजाय तो महाभय होता है ॥ १–९ ॥ इति यमदंष्ट्राचक्रम् ॥

अथ त्रिनाडीचक्रम् ।

राहुके अंतर्गत बुधदशामें मित्र बंधु तथा धनका समागम, बुद्धि धनका लाभ और किंचित् कष्टभी होता है ॥ १ ॥

राहुमध्ये केतुफलम् ।

ज्वराग्निरिपुशस्त्रं वा मृत्युः प्राप्नोति सर्वदा ।
राहोरन्तर्गते केतौ नास्त्यत्र संशयः क्वचित् ॥ १ ॥

राहुके अंतर्गत केतुदशामें ज्वर होय, अग्नि, शत्रु, शस्त्रभय हो तथा मृत्यु हो, कृष्णवस्तु दान और महामृत्युंजय जपसे शांति करना ॥ १ ॥

राहुमध्ये शुक्रफलम् ।

सुहृत्तापोऽजितेन्द्रियः स्त्रीलाभो वित्तसंचयः ।
कलहो बान्धवैः सार्द्धं राहोरन्तर्गते सिते ॥ १ ॥

राहुके अंतर्गत शुक्रदशामें मित्रोंको कष्ट, परस्त्रीसे भोग, स्त्रीप्राप्ति, धनलाभ और बांधवोंके साथ कलह होता है ॥ १ ॥

राहुमध्ये रविफलम् ।

शस्त्ररोगभयं घोरमर्थनाशं नृपाद्भयम् ।
अग्निचोरभयं चात्र दैत्यस्यान्तर्गते रवौ ॥ १ ॥

राहुके अंतर्गत सूर्यदशामें शस्त्ररोगसे भय, अर्थनाश, राजासे भय तथा अग्नि चोरभय होता है ॥ १ ॥

राहुमध्ये चन्द्रफलम् ।

स्त्रीलाभं कलहं चैव वित्तनाशमनिर्वृतिः ।
बान्धवैः सह संक्लेशो राहोर्मध्ये यदा शशी ॥ १ ॥

राहुके अंतर्गत चन्द्रमामें स्त्रीका लाभ होय, कलह उत्पन्न होय, द्रव्यका नाश, आजीविका और बांधवोंकरके क्लेश होवै ॥ १ ॥

राहुमध्ये भौमफलम् ।

रिपुशस्त्राग्निचोराणां भयमाप्नोति सर्वदा ।
स्वर्भान्वन्तर्गते भौमे निश्चितं नात्र संशयः ॥ १ ॥

राहुके अंतर्गत भौमदशामें सर्वदा शत्रुभय, शस्त्रभय, अग्निभय होता है, दानसे कष्टशांति होय ॥ १ ॥ इति राहोरन्तर्दशा समाप्ता ॥

अथ गुरुमहादशान्तर्दशाफलम् ।

नृपप्रसादं धनधान्यपुत्रकलत्रमित्राप्तिसुरत्नलाभम् ।
नीरोगतां शत्रुजयं च सौख्यं गुरोर्दशा वाञ्छितमातनोति ॥

बृहस्पतिकी महादशामें राजाकी प्रसन्नता हो, धनधान्य पुत्र कलत्र मित्रादि तथा धनका लाभ होता है, शरीरमें नीरोगता हो, शत्रुसे जय प्राप्ति हो, सौख्य मिले तथा मनोवांछित पदार्थका लाभ होता है ॥ १ ॥

गुरुमध्ये गुरुफलम्।

जीऽयमाने सुतो बुद्धिर्धनधर्मार्थगौरवम्।
हेम्नश्चाम्बरलाभश्च वर्णेभ्यो ह्यतिसञ्चयम् ॥ १ ॥

बृहस्पतिके अंतर्गत बृहस्पतिदशामें शरीरमें नीरोगता, सुतप्राप्ति, बुद्धिलाभ, धन धर्मार्थगौरवका लाभ, सुवर्ण और वस्त्रलाभ और कुटुंबीजनोंका संगम होता है ॥ १ ॥

गुरुमध्ये शनिफलम्।

वेश्यास्त्रीमद्यशून्यैश्च भूषितः सुखवर्जितः।
विलुप्तधर्मवस्त्रोऽसौ सौरिर्गुर्वनुगो यदा ॥ १ ॥

गुरुके अंतर्गत शनिदशामें वेश्यास्त्रियोंसे रति, तहां द्रव्यकी हानि, मद्यपानमें रत, सर्वशून्य, सुखकरके रहित, पापबुद्धि, धर्म और वस्त्रसे रहित होता है ॥ १ ॥

गुरुमध्ये बुधफलम्।

स्वस्थो मित्रयुतो भोगी गुरुदेवाग्निभक्तिकः।
सुकृताचरणे सक्तो जीवस्यान्तर्गते बुधे ॥ १ ॥

गुरुके अंतर्गत बुधदशामें मनुष्य अपने स्थानमें प्राप्त, मित्रयुक्त, भोगको भोगनेवाला, गुरु देवता तथा अग्निको पूजनेवाला, अच्छे आचरणमें तत्पर होता है ॥ १ ॥

गुरुमध्ये केतुफलम्।

पुत्रबन्धुक्षतो योगी युक्तः स्वस्थानवर्जितः।
परिभ्रमति सर्वत्र केतावन्तर्गते गुरोः ॥ १ ॥

बृहस्पतिके अंतर्गत केतुदशामें पुत्र बंधुका असुख, स्थानभ्रष्ट और देशान्तरमें भ्रमण होता है ॥ काला दान देवे तो कष्टशांति होवे ॥ १ ॥

गुरुमध्ये शुक्रफलम्।

कलहं शत्रुवैरं च वित्तं मानसचिन्तनम्[1]।
स्त्रीभ्यो विघातमाप्नोति जीवस्यान्तर्गते सिते ॥ १ ॥

बृहस्पतिके अंतर्गत शुक्रदशामें कलह, शत्रुओंसे वैर, धन और मानसी चिन्ता, जीविकासे रहित, स्त्रीकरके अभिघात यह सब फल प्राप्त होते हैं ॥ १ ॥

---

१ मानसनिर्वृतिः इति च पाठः।

गुरुमध्ये सूर्यफलम् ।

शत्रूणां संक्षयं सौख्यं नृपपूजा च लभ्यते ।
प्रचण्डसाहसाङ्कैश्च जीवस्यान्तर्गते रवौ ॥ १ ॥

बृहस्पतिके अंतर्गत सूर्यदशामें शत्रुओंसे जयप्राप्ति, शत्रुओंका क्षय, सौख्यप्राप्ति, राजासे सत्कार, लाभ और अधिक प्रतापसे युक्त होता है ॥ १ ॥

गुरुमध्ये चन्द्रफलम् ।

बहुस्त्रीरिपुभोगश्च रिपुर्भोगविवर्जितः ।
नृपतुल्यो भवेन्नित्यं चन्द्रे गुर्वन्तरां गते ॥ १ ॥

बृहस्पतिके अंतर्गत चन्द्रदशामें बहुत स्त्री तथा शत्रुओंसे भोग, शत्रुजन भी मित्रता माने और राजाके समान अधिकार प्राप्ति यह सब फल होता है ॥ १ ॥

गुरुमध्ये भौमफलम् ।

तीक्ष्णशौर्यरिपुं जित्वा धनं कीर्तिं च मानुषे ।
सुखसौभाग्यमारोग्यं गुरोरन्तर्गते कुजे ॥ १ ॥

बृहस्पतिके अंतर्गत भौमदशामें तीक्ष्ण शत्रुको जीते, धन कीर्तिकी प्राप्ति हो, सुख सौभाग्य आरोग्यता प्राप्त होवै ॥ १ ॥

गुरुमध्ये राहुफलम् ।

बन्धूद्वेगं रुजश्चैव कलहं मरणाद्भयम् ।
स्वस्थानच्युतिमाप्नोति राहावन्तर्गते गुरोः ॥ १ ॥

बृहस्पतिके अंतर्गत राहुदशामें भ्राताको कष्ट, रोग, कलह, मरणभय और अपना स्थान भ्रष्ट होता है । काला दान देवे तो शांति होय ॥ १ ॥ इति गु० फ० ॥

अथ शनिमहादशान्तर्दशाफलम् ।

मिथ्यापवादवधबन्धनिराश्रयं च
मित्रातिवैरधनधान्यकलत्रशोकम् ।
आशानिराशकृतनिष्फलसर्वशून्यं
कुर्याच्छनैश्चरदशा सततं नराणाम् ॥ १ ॥

शनैश्चरकी दशामें झूंठा कलंक लगे, बंधुओंका नाश, आश्रयरहित, मित्रजनोंसे शत्रुता, धनधान्य तथा कलत्रशोक, निराशता और कार्य शून्य होवै ॥ १ ॥

शनिमध्ये शनिफलम् ।

शनैश्चराद्देहपीडा पुत्रदारैश्च विग्रहः ।
स्त्रीकृते बुद्धिनाशश्च विदेशगमनं भवेत् ॥ १ ॥

शनैश्चरकी दशाके अंतर्गत शनैश्चरकी दशामें शरीरपीडा, पुत्र और स्त्री आदिकोंसे लडाई, स्त्रीके कारण बुद्धिनाश और परदेशगमन हो ॥ १ ॥

शनिमध्ये बुधफलम्।

सौभाग्यं सौख्यविजयं बोधसंस्थानमानतः।
सुहृद्वित्तप्रदं सौख्यं सौरस्यान्तगते बुधे॥ १ ॥

शनैश्चरके अंतर्गत बुधदशामें सौभाग्य हो, सौख्य हो, जय हो, स्थान मानकी प्राप्ति हो, मित्रसे धनलाभ हो, सुख हो ॥ १ ॥

शनिमध्ये केतुफलम्।

रक्तपित्तकृता पीडा वित्तवित्तानुसङ्ग्रहः।
दुःस्वप्नं बन्धनं चैव केतावन्तर्गते शनेः॥ १ ॥

शनिके अंतर्गत केतुदशामें रक्तपित्तविकारसे शरीरमें पीडा, धनसंग्रह करनेपर भी धनकी हानि, दुष्टस्वप्नदर्शन और बंधन होवै ॥ १ ॥

शनिमध्ये शुक्रफलम्।

सुहृद्बन्धुवशीयुक्तं भार्यावित्तं जयान्वितम्।
सुखसौभाग्यवात्सल्यं सौरस्यान्तगते सिते॥ १ ॥

शनिके अंतर्गत शुक्रदशामें मित्रका सुख, बंधुके साथ प्रीति, स्त्रीसे सुख, जय, सुख, सौभाग्य और दयाकरके युक्त होवै ॥ १ ॥

शनिमध्ये रविफलम्।

पुत्रदारधनभ्रंशं करोति समयं महत्।
सौरस्यान्तर्गते भानौ जीवितस्यापि संशयः॥ १ ॥

शनैश्चरके अंतर्गत सूर्यदशामें पुत्र, स्त्री, धनका नाश, दुस्तर समय और जीवनमें भी संशय होवै ॥ १ ॥

शनिमध्ये चन्द्रफलम्।

मरणं स्त्रीवियोगश्च बन्धूद्वेगोऽसुखं शृणु।
क्रुद्धमारुरुजो रोगं विधावन्तर्गते शनेः॥ १ ॥

शनैश्चरके अंतर्गत चन्द्रदशामें मरणतुल्य कष्ट, स्त्रीका वियोग, भाइयोंको कष्ट, अधिक क्रोध और शरीरमें रोग होवै ॥ १ ॥

शनिमध्ये भौमफलम्।

देशभ्रंशं तथा दुःखं कुरुते व्याधिभ्रंशताम्।
अन्तर्दशायां सौरस्य कुजः प्राणमहाभयम्॥ १ ॥

शनिके अंतर्गत मंगलदशामें देशभ्रंश, दुःख, व्याधि, पीडा, प्राणका भय यह फल जानना ॥ १ ॥

शनिमध्ये राहुफलम् ।

श्वभ्रपाताङ्गभेदश्च ज्वरातीसारपीडनम् ।
शत्रुभङ्गोऽर्थनाशश्च राहावन्तर्गते शनेः ॥ १ ॥

शनिके अंतर्गत राहुदशामें गड्ढे आदिमें गिरनेसे शरीरविषे पीडा, ज्वर, अतीसाररोग हो, शत्रुसे भंग, धननाश हो ॥ १ ॥

शनिमध्ये गुरुफलम् ।

देवद्विजार्चनं सौख्यं बहुभृत्यगुणैर्युतम् ।
स्थानप्राप्तिं गुरोः कुर्यात्सौरस्यान्तर्गता दशा ॥ १ ॥

शनिके अंतर्गत बृहस्पतिकी दशामें देवता, ब्राह्मणका पूजन, सौख्य, बहुत नौकर और गुणोंकरके युक्त और स्थानकी प्राप्ति होवै, पीतवस्तुके व्यापारमें लाभ हो ॥१॥
इति शनिमहादशान्तर्दशाफलम् ॥

अथ बुधमहादशान्तर्दशाफलम् ।

व्याङ्गनावदनपङ्कजषट्पदस्य
लीलाविलासवरभोगसमन्वितस्य ।
नानाप्रकारविभवागमकोशवृद्धिं
कुर्यात् पुनर्बुधदशाऽभिमतार्थसिद्धिम् ॥ १ ॥

बुधकी दशामें मनुष्यको सुंदरास्त्रियोंके लीलाविलास और उत्तम भोगकरके संयुक्त अनेक प्रकारसे विभवका आगम, कोशकी वृद्धि और अर्थसिद्धि होती है ॥ १ ॥

बुधमध्ये बुधफलम् ।

बुद्धिर्धर्मसमायोगो मित्रबन्धुसमागमः ।
प्राप्तिर्ज्ञानस्य विपुला देहपीडा प्रकोपना ॥ १ ॥

बुधके अंतर्गत बुधदशामें बुद्धिधर्मका संयोग, मित्रबंधुका समागम हो, अधिक उत्तम ज्ञानकी प्राप्ति हो और कभी देहमें पीडाका प्रकोप भी होवे ॥ १ ॥

बुधमध्ये केतुफलम् ।

दुःखशोकाकुलं नित्यं शरीरे क्लेशसंयुतम् ।
भवत्यन्तर्दशायां हि केतुर्यदि बुधस्य च ॥ १ ॥

बुधके अंतर्गत केतुदशामें सदा दुःखशोककी अधिकता होय, शरीरमें क्लेश होय, चौपायों और अग्निसे भय होय ॥ १ ॥

बुधमध्ये शुक्रफलम्।

गुरुवस्त्राणि लभ्यन्ते धनधर्मप्रियं तथा।
वस्त्रालङ्करणैर्युक्तं बुधस्यान्तर्गते सिते ॥ १ ॥

बुधके अंतर्गत शुक्रदशामें राजाकी प्रसन्नता हो, वस्त्रप्राप्ति हो, धन और धर्ममें प्रिय, वस्त्र अलंकारकरके युक्त हो और भोगकी प्राप्ति हो ॥ १ ॥

बुधमध्ये सूर्यफलम्।

स्वर्णादिकं भवेत्प्राप्तं यशः प्राप्नोति सर्वतः।
जायास्वस्त्रीभवोद्वेगो बुधस्यान्तर्गते रवौ ॥ १ ॥

बुधके अंतर्गत सूर्यदशामें स्वर्णादिककी प्राप्ति, सर्वत्र यशकी प्राप्ति हो और स्त्रीको कष्ट हो ॥ १ ॥

बुधमध्ये चन्द्रफलम्।

कुष्ठगण्डविकाराश्च क्षयरोगभगन्दरौ।
गजादिवाहनैर्भीतिर्बुधस्यान्तर्गते विधौ ॥ १ ॥

बुधके अंतर्गत चन्द्रमाकी दशामें कुष्ठरोग, गंडविकार, क्षयरोग, भगंदर हो और हाथी आदि वाहनोंसे भय हो, श्वेत वस्त्र दान देना ॥ १ ॥

बुधमध्ये भौमफलम्।

शिरोरोगैः कण्ठरोगैर्नानाक्लेशविमर्दनम्।
चौरभङ्गभयं चाथ बुधस्यान्तर्गते कुजे ॥ १ ॥

बुधके अंतर्गत मंगलकी दशामें शिरोरोग हो, गलेमें रोग हो, अनेक प्रकारका क्लेश हो और चौरभय हो ॥ १ ॥

बुधमध्ये राहुफलम्।

अकस्माच्छत्रुनिर्घातमकस्मादर्थनाशनम्।
संपर्कादग्निदाहं च राहौ सौम्यान्तरं गते ॥ १ ॥

बुधके अंतर्गत राहुदशामें अकस्मात् शत्रुसे भय, अकस्मात् धनहानि और संपर्कसे अग्निदाह यह फल होता है ॥ १ ॥

बुधमध्ये गुरुफलम्।

व्याधिशत्रुभयैर्मुक्तो ब्रह्मिष्ठो नृपवल्लभः।
पूतात्मा धार्मिकश्चैव बुधस्यान्तर्गते गुरौ ॥ १ ॥

बुधके अंतर्गत बृहस्पतिदशामें व्याधि और शत्रुभय करके रहित, ब्राह्मणका भक्त राजाका प्रिय, पवित्र और धर्मवान् मनुष्य होता है ॥ १ ॥

बुधमध्ये शनिफलम् ।

धर्मार्थभोगी गम्भीरः क्लीबो मित्रार्थलुब्धकः ।
सर्वकार्येष्वनुत्साहो बुधे सौरो यदाऽनुगः ॥ १ ॥

बुधके अंतर्गत शनिदशामें मनुष्य धर्म अर्थका भोगनेवाला, गंभीर स्वभाववाला, क्लीब, मित्रके धनका लालच करनेवाला और संपूर्ण कार्योंविषे उत्साहरहित होता है ॥ १ ॥ इति बुधमहादशान्तर्दशाफलम् ।

अथ केतुमहादशान्तर्दशाफलम् ।

विषादकर्त्री धनधान्यहर्त्री सर्वापदां मूलमनर्थदात्री ।
भयङ्करी रोगविपद्विधात्री केतोर्दशा स्यात्किल जीवहर्त्री ॥ १ ॥

केतुकी दशा मनुष्योंको विषाद करनेवाली, धनधान्यको हरनेवाली, संपूर्ण आपदा और अनर्थको देनेवाली, भयकारक, रोग विपत्तिको देनेवाली तथा प्राणको भी हरनेवाली कही है ॥ १ ॥

केतुमध्ये केतुफलम् ।

केतौ कन्यापुत्रधननाशरोगाग्निविग्रहाः ।
भयं राजकुलाद्दुष्टस्त्रीभिः सह कलिर्भवेत् ॥ १ ॥

केतुके अंतर्गत केतुदशामें कन्या, पुत्र और धनका नाश, रोग, अग्निभय, लडाई, झगडा, राजकुलसे भय और दुष्टस्त्रीके साथ कलह होवै ॥ १ ॥

केतुमध्ये शुक्रफलम् ।

केतोरन्तर्गते शुक्रे प्रियया च कलिर्भवेत् ।
अग्निदाहं ज्वरं तीव्रं स्त्रीत्यागं कन्यकाजनिः ॥ १ ॥

केतुके अंतर्गत शुक्रदशामें स्त्रीसे कलह, अग्निदाह, ताप और स्त्रीका वियोग और कन्याका जन्म हो ॥ १ ॥

केतुमध्ये रविफलम् ।

केतोरन्तर्गते सूर्ये राजभङ्गोऽरिविग्रहः ।
अग्निदाहो ज्वरस्तीव्रो विदेशगमनं भवेत् ॥ १ ॥

केतुके अंतर्गत सूर्यदशामें राज्यका भंग, शत्रुसे विग्रह, अग्निदाह, ताप और विदेशगमन होता है ॥ १ ॥

केतुमध्ये चन्द्रफलम्।

अर्थलाभोऽर्थहानिश्च सुखं दुःखं तथैव च।
स्त्रीलाभो धनहानिश्च केतोर्मध्ये यदा शशी ॥ १ ॥

केतुके अंतर्गत चन्द्रमाकी दशामें अर्थलाभ और अर्थकी हानिभी हो, सुख तथा दुःख हो, स्त्रीका लाभ और धनहानि हो अर्थात् शुभाशुभ फल हो ॥ १

केतुमध्ये भौमफलम्।

गोत्रजैः सह संवादश्चोराणां च भयं तथा।
शरीरपीडां प्राप्नोति केतोरन्तर्गते कुजे ॥ १ ॥

केतुके अंतर्गत मंगलदशामें अपने गोत्रीजनोंके साथ विवाद, चोरभय और शरीरमें पीडा हो ॥ १ ॥

केतुमध्ये राहुफलम्।

चोरैश्च शत्रुभिर्वापि देहभङ्गः प्रजायते।
दुर्जनैः सह संवादो राहुः केतोर्यदाऽनुगः ॥ १ ॥

केतुके अंतर्गत राहुदशामें चोरों तथा शत्रुओंकरके देहका भंग और दुष्ट मनुष्योंके साथ विवाद हो ॥ १ ॥

केतुमध्ये गुरुफलम्।

दुर्जनैः सह संयोगो राजमान्यः सहाथवा।
भूलाभो जन्म पुत्रस्य केतोरन्तर्गते गुरौ ॥ १ ॥

केतुके अंतर्गत बृहस्पतिकी दशामें दुष्टजनोंके साथ मित्रता अर्थात् दुष्टजन मित्रता मानै, राजासे मान्य हो, पृथ्वीलाभ हो और पुत्रका जन्म हो ॥ १ ॥

केतुमध्ये शनिफलम्।

वातपित्तभवा पीडा स्वजनैः सह विग्रहः।
विदेशगमनं चापि केतोरन्तर्गते शनौ ॥ १ ॥

केतुके अंतर्गत शनिदशामें वातपित्तविकारसे उत्पन्न पीडा हो, अपने जनोंके साथ विग्रह हो और विदेशमें गमन होता है ॥ १ ॥

केतुमध्ये बुधफलम्।

सुहृद्बन्धुसमायोगो बुद्धिबोधं धनागमम्।
न किंचित्क्लेशमाप्नोति केतोरन्तर्गते बुधे ॥ १ ॥

केतुके अंतर्गत बुधदशामें मित्र और बंधुका आगमन हो, बुद्धिलाभ हो, धनका लाभ हो और कुछभी क्लेश न प्राप्त होवै ॥ १ ॥ इति केतुमहादशांतर्दशाफलम् ॥

अथ शुक्रमहादशान्तर्दशाफलम् ।

मित्रोपचारमशुभप्रमदाविलासं
श्वेतातपत्रनृपपूजितदेशलाभम् ।
हस्त्यश्वयानपरिपूर्णमनोरथाँश्च
शौक्री दशा सृजति निश्चलराज्यलक्ष्मीम् ॥ १ ॥

शुक्रकी महा दशामें मित्रोपचार, स्त्रीभोग विलास, चँवर छत्र आदिसे संयुक्त, राजासे पूजित, देशलाभकरके युक्त, हाथी, घोडे, सवारी आदिसे परिपूर्ण मनोरथ और अचलराज्य और लक्ष्मीको प्राप्त होता है ॥ १ ॥

शुक्रमध्ये शुक्रफलम् ।

शौक्रे स्त्रीसङ्गमो लाभो धर्मकामार्थसंयुतः ।
कौशल्यं च महाकीर्तिर्निधिलाभश्च जायते ॥ १ ॥

शुक्रकी दशाके अंतर्गत शुक्रदशामें स्त्रीसंगम, लाभ, धर्म, अर्थ, कामकरके संयुक्त, प्रवीणता और निधिलाभसे परिपूर्ण होता है ॥ १ ॥

शुक्रमध्ये रविफलम् ।

मण्डोदरक्षयरोगैर्नृपबन्धादिकैतवैः ।
उपपातो भवेन्नूनं शुक्रस्यान्तर्गते रवौ ॥ १ ॥

शुक्रके अंतर्गत सूर्यदशामें गंड, उदर, तथा क्षय रोग हो, राजासे बंधन आदि भय प्राप्त हो और अनेक प्रकारका उत्पात होता है ॥ १ ॥

शुक्रमध्ये चन्द्रफलम् ।

नखास्थिजशिरोरोगैः कामलाद्यामयैर्दशाम् ।
शरीरे क्लेशमाप्नोति शुक्रमध्ये यदा शशी ॥ १ ॥

शुक्रके अंतर्गत चन्द्रमाकी दशामें नख, अस्थिज, शिरःपीडा आदि रोग, कामलादि आमय, शरीरमें क्लेश होता है ॥ १ ॥

शुक्रमध्ये भौमफलम् ।

वातपित्तक्षयो रोगो मदोत्साहोऽन्यसंशयः ।
भूयः स्याद्भूमिलाभश्च शुक्रस्यान्तर्गते कुजे ॥ १ ॥

शुक्रके अंतर्गत भौमदशामें वातापित्तक्षयरोग हो, मद हो तथा उत्साह हो, अन्य संशय हो और अधिक भूमिका लाभ हो ॥ १ ॥

शुक्रमध्ये राहुफलम्।

अन्त्यजैः सह संक्लेशो बन्धूद्वेगः सुहृद्वधः।
अकस्माद्भयमाप्नोति राहौ शुक्रान्तरं गते ॥ १ ॥

शुक्रकी दशाके अंतर्गत राहुदशामें नीचजनोंकरके सहसा क्लेश प्राप्त हो, बंधु-उद्वेग हो, मित्रवध हो और अकस्मात् भयप्राप्ति हो ॥ १ ॥

शुक्रमध्ये गुरुफलम्।

धान्यरत्नसमृद्धिं च भूमिपुत्रसुखावहः।
श्रियं प्रभुत्वमाप्नोति जीवः शुक्रदशां गतः ॥ १ ॥

शुक्रके अंतर्गत बृहस्पतिकी दशामें धान्यरत्नादिकी वृद्धि हो, भूमि, पुत्रका लाभ, अधिक सुख हो, लक्ष्मी और प्रतापकी प्राप्ति हो ॥ १ ॥

शुक्रमध्ये शनिफलम्।

वृद्धस्त्रीभिः सह क्रीडा पुत्रनाशो विपत्पदम्।
शत्रुनाशः सुखप्राप्तिः सौरः शुक्रदशां गतः ॥ १ ॥

शुक्रके अंतर्गत शनिकी दशामें वृद्धस्त्रीके साथ क्रीडा रति हो, पुत्रनाश हो, विपत् हो, शत्रुका नाश हो और सुखकी प्राप्ति हो ॥ १ ॥

शुक्रमध्ये बुधफलम्।

धनागमश्च सौख्यं च मनोरथयशःश्रियः।
नृपवल्लभता शौर्यं शुक्रस्यान्तर्गते बुधे ॥ १ ॥

शुक्रके अंतर्गत बुधकी दशामें धनका लाभ हो, सुख हो, मनोरथकी सिद्धि हो, यश और लक्ष्मीकी प्राप्ति और राजासे प्रीति हो ॥ १ ॥

शुक्रमध्ये केतुफलम्।

कलहो बान्धवैः सार्द्धं रिपुनाशोऽरिविग्रहः।
चलाचलं समग्रं च केतौ शुक्रान्तरं गते ॥ १ ॥

शुक्रके मध्य केतुदशामें बांधवोंके साथ कलह, शत्रुनाश तथा शत्रुओंसे विग्रह चलाचलफल होवै ॥ १ ॥ इति विंशोत्तरीदशान्तर्दशाफलम् ॥

अथाष्टोत्तरीदशान्तर्दशाफलम्।

तत्रादौ सूर्यदशाफलम्।

रवेर्दशायामतितीक्ष्णभोज्यं प्राप्नोति मानोपचयं महान्तम्।
धनानि चामीकरसंप्रशान्तं संजायते बन्धुसुखं शुभं च ॥ १ ॥

सूर्यकी महादशामें तीक्ष्णभोजनकी प्राप्ति हो, मानकी अधिकता हो, धन चवँर छत्रादिका सुख हो और बंधुसुख होवै ॥ १ ॥

सूर्यमध्ये सूर्यफलम् ।

बन्धूनां स्वान्तरे मानो बन्धूनां मरणं भवेत् ।
रवेर्मध्ये रवौ प्राप्ते सर्वमेव फलं वदेत् ॥ १ ॥

सूर्यके अंतर्गत सूर्यदशामें बांधवोंके अंतरमें मान प्राप्ति हो तथा बांधवोंका मरण भी हो ॥ १ ॥

सूर्यमध्ये चन्द्रफलम् ।

शत्रुनाशोऽर्थलाभश्च चिन्तानाशः सुखागमः ।
सूर्यस्यान्तर्गते चन्द्रे व्याधिनाशश्च जायते ॥ १ ॥

सूर्यके अंतर्गत चन्द्रमाकी दशामें शत्रुका नाश, द्रव्यका लाभ, चिन्ताका नाश, सुखका आगम और व्याधियोंका नाश होता है ॥ १ ॥

सूर्यमध्ये भौमफलम् ।

प्रवालमुक्ताहेमादि धनं प्राप्नोति भूपतेः ।
रवेरन्तर्गते भौमे विभूतिः सुखमद्भुतम् ॥ १ ॥

सूर्यके अंतर्गत मंगलकी दशामें राजासे प्रवाल, मुक्ता, सुवर्णादि धनकी प्राप्ति हो, विभव हो और अद्भुत सुख प्राप्त होता है ॥ १ ॥

सूर्यमध्ये बुधफलम् ।

ग्रहवातव्याधिहानिर्द्रव्यनाशः कुलक्षयः ।
अविश्वासो भवेल्लोके रवेरन्तर्गते बुधे ॥ १ ॥

सूर्यके अंतर्गत बुधदशामें ग्रहपीडा हो, वातव्याधि हो, हानि हो, द्रव्यका नाश हो, कुलका क्षय हो और संसारमें अविश्वास होता है ॥ १ ॥

सूर्यमध्ये शनिफलम् ।

महादुःखानि जायन्ते पुत्रमित्रविनाशनम् ।
रवेरन्तर्गते मन्दे शत्रुतश्च भयं भवेत् ॥ १ ॥

सूर्यके अंतर्गत शनिकी दशामें महादुःख हो, पुत्रमित्रका विनाश हो और शत्रुसे भय होता है ॥ १ ॥

सूर्यमध्ये गुरुफलम् ।

विपद्रोगविनाशश्च लक्ष्मीमेधासुखानि च ।
रवेरन्तर्गते जीवे शत्रुमङ्गलमुत्सवः ॥ १ ॥

सूर्यके अंतर्गत बृहस्पतिकी दशामें, विपत् और रोग, लक्ष्मीका लाभ और सुख होता है तथा शत्रुका नाश, मंगलकार्य और उत्सव होता है ॥ १ ॥

रविमध्ये राहुफलम् ।

शोको भङ्गो महाभीतिर्विपत्तिरशुभं नृणाम् ।
रवेरन्तर्गते राहौ सर्वत्रामङ्गलक्रिया ॥ १ ॥

सूर्यके अंतर्गत राहु दशामें शोक, भंग, अधिकभय, विपत्ति और अशुभ और सर्वत्र अमंगल कार्य होवैं ॥ १ ॥

रविमध्ये शुक्रफलम् ।

गात्रपीडा भयं त्रासो ज्वरातीसारशूलके ।
द्रव्यादिहानिं प्राप्नोति रवेरन्तर्गते सिते ॥ १ ॥

सूर्यके अंतर्गत शुक्रदशामें, शरीरपीडा, भय, त्रास, ज्वर, अतीसार तथा शूलरोग और द्रव्यादिकी हानि होती है ॥ १ ॥ इति रविदशाफलम् ॥

अथ चन्द्रमहादशान्तर्दशाफलम् ।

नित्यं विभूषामणिवस्त्रलाभं मिष्टान्नपानं प्रमदानुरागम् ।
चान्द्री दशा साधु फलं नराणां लभेत पूजां नृपतेः सदैव ॥ १ ॥

चन्द्रमाकी दशामें सदा विभूषण, मणि तथा वस्त्रका लाभ, मिष्टान्नपान, स्त्रीजनोंमें अनुराग, शुभफल और राजासे सदा पूजालाभ होता है ॥ १ ॥

चन्द्रमध्ये चन्द्रफलम् ।

चन्द्रे स्वान्तर्गते सौख्यं सर्वत्र विजयो भवेत् ।
स्वपक्षवैरं कन्यानां जन्म निद्रारतिर्भवेत् ॥ १ ॥

चन्द्रमाके अंतर्गत चन्द्रमाकी दशामें सौख्य, सर्वत्र विजय, अपने जनोंसे वैर, कन्याका जन्म और निद्रामें रति होवै ॥ १ ॥

चन्द्रमध्ये भौमफलम् ।

शस्त्ररोगभयैर्युक्तो वह्निचोरधनक्षयः
विधोरन्तर्गते भौमे मनोदुःखं भवेन्नृणाम् ॥ १ ॥

चन्द्रमाके अंतर्गत मंगलकी दशामें शस्त्रभय तथा रोगभयसे युक्त, वह्निभय, चोर-भय और धनका नाश और मानसदुःख होता है ॥ १ ॥

चन्द्रमध्ये बुधफलम् ।

सर्वत्र लभते लाभं गजाश्वैर्गोधनादिकम् ।
जायते कन्यकालाभश्चन्द्रस्यान्तर्गते बुधे ॥ १ ॥

चन्द्रमाके अंतर्गत बुधकी दशामें हाथी, घोडे, गोधनादिकरके सर्वत्र लाभ हो, कन्याका जन्म हो ॥ १ ॥

चन्द्रमध्ये शनिफलम् ।

बन्धुवैरं स्थानहानिः शोको वा कलहो विपत् ।
विधोरन्तर्गते मन्दे संदिग्धो भवति ध्रुवम् ॥ १ ॥

चन्द्रमाके अंतर्गत शनिदशामें बांधववैर हो, स्थानहानि हो, शोक, कलह अथवा विपत् हो और जीवकाका संशय हो ॥ १ ॥

चन्द्रमध्ये गुरुफलम् ।

धर्मवित्तसुखानि स्युर्वसनाभरणादिकम् ।
विजयो राजसम्मानो विधोरन्तर्गते गुरौ ॥ १ ॥

चन्द्रमाके अंतर्गत बृहस्पतिकी दशामें धर्म धन सुख हो, वस्त्र आभरणादिक सुख, विजयप्राप्ति और राजसम्मान होता है ॥ १ ॥

चन्द्रमध्ये राहुफलम् ।

बन्धुनाशः स्थानभ्रंशः शत्रोर्बहुभयं तथा ।
न कुत्रापि सुखं राहौ विधोरन्तर्गते सति ॥ १ ॥

चन्द्रमाके अंतर्गत राहुदशामें भाईका कष्ट, स्थानका भंग, शत्रुसे भय और कहीं भी न सुख प्राप्त होता है ॥ १ ॥

चन्द्रमध्ये शुक्रफलम् ।

कन्याजन्मसुखप्राप्तिः स्त्रीसङ्गो विजयः सुखम् ।
मुक्ताहेममणिप्राप्तिश्चन्द्रस्यान्तर्गते सिते ॥ १ ॥

चन्द्रमाके अंतर्गत शुक्रदशामें कन्याका जन्म, सुखकी प्राप्ति, स्त्रीका संग, विजय सुख मुक्ता सुवर्ण आदिकी प्राप्ति हो ॥ १ ॥

चन्द्रमध्ये रविफलम् ।

भूपाश्रयसुखं राज्यं रिपुरोगक्षयो भवेत् ।
ऐश्वर्यसौख्यमतुलं चन्द्रस्यान्तर्गते रवौ ॥ १ ॥

चन्द्रमाके अंतर्गत सूर्यकी दशामें राजाके आश्रयसे सुख राज्यप्राप्ति हो, शत्रु और रोगका क्षय हो, ऐश्वर्य और अधिकतर सौख्य होता है ॥ १ ॥ इति च० फ० ॥

अथ भौममहादशान्तर्दशाफलम् ।

शस्त्राभिघातवधबन्धनरेन्द्रपीडा
चिन्ताग्रहो विकलरुक्च गृहाश्रमेषु ।

चौराग्निभीतिधननाशयशःप्रणाशं
कुर्याद्विघातभयमत्र दशा कुजस्य ॥ १ ॥

मंगलकी दशामें शस्त्रसे अभिघात, राजासे वध, बंधन पीडा, मानसी चिंता, लड़ाई-झगडा, विकलता, घरमें रोग, चौर अग्निभय, यशका तथा धनका नाश और घात इत्यादि अशुभ फल होता है ॥ १ ॥

भौममध्ये भौमफलम् ।

भौमे शत्रुविमर्दः स्यात्कलहो बन्धुभिर्नृणाम् ।
स्वान्तरे बहुपीडा स्याद्वृद्धस्त्रीगणिकारतिः ॥ १ ॥

मंगलके अंतर्गत मंगलकी दशामें शत्रुसे पीडा, बांधवोंकरके कलह और बहुत पीडा, वृद्ध स्त्री अथवा वेश्याके साथ रति हो ॥ १ ॥

भौममध्ये बुधफलम् ।

महीपालाग्निचौरेभ्यो भयं पीडा ज्वरादिभिः ।
भूमिजान्तर्गते सौम्ये कलहो दुर्जनादिभिः ॥ १ ॥

मंगलके अंतर्गत बुधकी दशामें राजासे अग्निसे और चोरसे भय, ज्वरादिरोग करके पीडा और दुष्टजनोंके साथ कलह होता है ॥ १ ॥

भौममध्ये शनिफलम् ।

महादुःखानि जायन्ते जलभीतिर्भृशं भवेत् ।
भौमस्यान्तर्गते मन्दे राजपीडाभयं नृणाम् ॥ १ ॥

मंगलके अंतर्गत शनिदशामें महादुःख, जलसे भय, राजासे पीडा और भय मनुष्योंको होता है ॥ १ ॥

भौममध्ये गुरुफलम् ।

पुण्यतीर्थादिगमनं देवब्राह्मणपूजनम् ।
भौमस्यान्तर्गते जीवे लभते वित्तमुत्कटम् ॥ १ ॥

मंगलके अंतर्गत बृहस्पतिकी दशामें पुण्यप्राप्ति हो, तीर्थकी यात्रा हो, देवता ब्राह्मणके पूजनमें भक्ति हो और अधिक धनका लाभ हो ॥ १ ॥

भौममध्ये राहुफलम् ।

शस्त्राग्निनृपचोराणां भीतिर्मृत्युर्नृपाद्भयम् ।
भौमस्यान्तर्गते राहौ मनोदुःखं प्रवर्तते ॥ १ ॥

मंगलके अंतर्गत राहुदशामें शस्त्रसे, अग्निसे, राजासे तथा चोरसे भय, मृत्यु तथा राजासे भय और मानस दुःख होता है ॥ १ ॥

भौममध्ये शुक्रफलम्।

शत्रुभीतिर्महाक्लेशो धर्महानिः सुखं व्ययः।
भौमस्यान्तर्गते शुक्रे भयं भूपात्स्वबन्धनम् ॥ १ ॥

मंगलके अंतर्गत शुक्रकी दशामें शत्रुसे भय, बडा क्लेश, धर्महानि, सुखका नाश, राजासे भय और अपना बंधन होता है ॥ १ ॥

भौममध्ये रविफलम्।

सम्मतो नृपतेर्भूरि प्रचण्डैः सह सङ्गतिः।
मङ्गलान्तर्गते भानौ भवेत्कुस्त्रीसमागमः ॥ १ ॥

मंगलके अंतर्गत रविदशामें राजासे अधिक संमति, प्रचंडजनोंके साथ संगति और कुत्सित स्त्रीसे भोग विलास होता है ॥ १ ॥

भौममध्ये चन्द्रफलम्।

बहुवित्तं सुहृत्सौख्यं मुक्ताहेममणिश्रियम्।
भौमस्यान्तर्गते चन्द्रे प्राप्नोति परमं पदम् ॥ १ ॥

मंगलके अंतर्गत चन्द्रमाकी दशामें बहुत धन और मित्रका सुख हो, मुक्ता, हेम तथा मणि श्रीकी प्राप्ति हो और मनुष्य परमपदको प्राप्त होता है ॥१॥ इति भौ० फ०।

अथ बुधमहादशान्तर्दशाफलम्।

प्राप्नोति सौम्यस्य दशाविपाके शुभे शुभानि प्रियमित्रसङ्गम्।
सुवर्णहेमाम्बरपूर्णलाभं विद्यार्थलाभं मनसः प्रमोदम् ॥ १ ॥

बलवान् बुधकी दशामें शुभफल, प्रियमित्रका संग, सुवर्ण, हेम, वस्त्र, विद्या और अर्थका लाभ और मनमें प्रमोद होता है ॥ १ ॥

बुधमध्ये बुधफलम्।

स्वदशान्तर्गते सौम्ये बुद्धिवृद्धिः समागमः।
शरीरे युवतेः सौख्यं नानावित्तं सुखं यशः ॥ १ ॥

बुधके अन्तर्गत बुधकी दशामें बुद्धिकी वृद्धि होती है, शरीरमें सुख, स्त्रीसुख, अनेक प्रकारसे धनका लाभ, सुख और यश होता है ॥ १ ॥

बुधमध्ये शनिफलम्।

मित्रार्थसाधकः सिद्धो गुणधर्मार्थसाधकः।
सर्वकार्योद्यमी भास्वान् बुधस्यान्तर्गते शनौ ॥ १ ॥

बुधके अंतर्गत शनिकी दशामें मित्रार्थ साधक, सिद्ध और गुण धर्मार्थका साधक सर्व कार्योंका करनेवाला होता है ॥ १ ॥

बुधमध्ये गुरुफलम्।

रिपुरोगभयैस्त्यक्तो धर्मज्ञो नृपवल्लभः।
हेमादिजनशोभाढ्यो बुधस्यान्तर्गते गुरौ॥ १॥

बुधके अन्तर्गत बृहस्पतिकी दशामें रिपु रोग और भयकरके रहित, धर्मका जाननेवाला, राजाका प्यारा, हेमादि पदार्थोंकरके शोभायमान होता है॥ १॥

बुधमध्ये राहुफलम्।

अकस्माद्बन्धुभेदो वाप्यकस्माद्व्रजतो नृपात्।
भयं वा ह्यर्थनाशो वा राहौ सौम्यान्तरे सति॥ १॥

बुधके अन्तर्गत राहुकी दशामें अकस्मात् बन्धुभय और राजाका कोप हो, भय और अर्थका नाश होता है॥ १॥

बुधमध्ये शुक्रफलम्।

गुरुदेवद्विजार्चासु दानधर्मपरो भवेत्।
वस्त्रालङ्काररत्नस्य लाभो ज्ञस्यान्तरे सिते॥ १॥

बुधके अन्तर्गत शुक्रकी दशामें गुरु, देवता और ब्राह्मणका पूजनेवाला, दानधर्ममें परायण और वस्त्र अलंकार रत्न आदिका लाभ होता है॥ १॥

बुधमध्ये रविफलम्।

सुवर्णहयमाणिक्यं विजयं लभते सुखम्।
राज्यं श्रियं बलं तेजो बुधस्यान्तर्गते रवौ॥ १॥

बुधके अन्तर्गत सूर्यकी दशामें सुवर्ण, घोड़ा, माणिक्य, विजय और सुखका लाभ, राज्य, लक्ष्मी, बल और तेज प्राप्त होता है॥ १॥

बुधमध्ये चन्द्रफलम्।

आचारवान् बहुधनो गजाश्वादिसुखान्वयः।
बुधस्यान्तर्गते चन्द्रे पर्यङ्कच्छत्रसंपदः॥ १॥

बुधके अन्तर्गत चन्द्रमाकी दशामें आचारवान्, बहुत धन हाथी घोडा आदि सुखको प्राप्त, शय्या छत्र और संपदासे सुशोभित होता है॥ १॥

बुधमध्ये भौमफलम्।

शिरोगुदरुजापीडा वह्निचौरनृपाद्भयम्।
बुधस्यान्तर्गते भौमे बन्धुपुत्रादिपीडनम्॥ १॥

बुधके अन्तर्गत मंगलकी दशामें शिर-गुदारोगसे पीडा, अग्नि चौर और राजासे भय और बन्धु पुत्रादि पीडा होती है॥ १॥ इति बुधदशान्तर्दशाफलम्॥

अथ शनिमहादशान्तर्दशाफलम्।

प्राप्नोति सौरस्य दशाविपाके दुर्गादिसीमागिरिरक्षणं च।
सुधान्यजीर्णाम्बरभूमिलाभं संयुज्यतेऽश्वैर्महिषादिभिश्च ॥ १ ॥

शनैश्चरकी दशामें दुर्गादिसीमा और पहाडोंकी रक्षा करनेवाला, सुन्दर धान्य, पुराना वस्त्र, भूमिलाभ और महिष आदिकरके संयुक्त होता है ॥ १ ॥

शनिमध्ये शनिफलम्।

बन्धुदारसुतार्थानां नाशो वा पीडनं भवेत्।
विदेशगमनं दुःखं सौरे स्वान्तरसंस्थिते ॥ १ ॥

शनिके अन्तर्गत शनिकी दशामें बन्धु स्त्री सुत और अर्थका नाश अथवा पीडा विदेशका गमन और दुःख होता है ॥ १ ॥

शनिमध्ये गुरुफलम्।

देवद्विजार्चनं सौख्यं धनवृद्धिगुणोदयः।
स्थानाप्तिः कामनाप्तिश्च शनेरन्तर्गते गुरौ ॥ १ ॥

शनिके अन्तर्गत बृहस्पतिकी दशामें देवता ब्राह्मणका पूजन, सौख्य, धनकी वृद्धि, गुणका उदय, स्थानप्राप्ति और कामनाप्राप्ति होती है ॥ १ ॥

शनिमध्ये राहुफलम्।

वातरोगः कुक्षिपीडा देशान्तरगतिर्भवेत्।
बुधद्वेषः सुखाभावो राहौ शनिदशां गते ॥ १ ॥

शनिके अंतर्गत राहुकी दशामें वातरोग, कुक्षिपीडा, देशान्तरका गमन, बुधद्वेष और सुखका अभाव होता है ॥ १ ॥

शनिमध्ये शुक्रफलम्।

बन्धुमित्रकलत्रार्थसुखसम्पत्समागमः।
सौहार्दं नृपतेर्लक्ष्मीः शनेरन्तर्गते सिते ॥ १ ॥

शनिके अंतर्गत शुक्रकी दशामें बन्धुका, मित्रका, स्त्रीका, धनका, सुखका और संपत्तिका समागम, राजासे मित्रता और लक्ष्मीका लाभ होता है ॥ १ ॥

शनिमध्ये रविफलम्।

पत्नीसुतधनार्थानां भीतिर्जीवितसंशयः।
शनेरन्तर्गते भानौ सर्वत्राशुभदर्शनम् ॥ १ ॥

शनिके अंतर्गत सूर्यकी दशामें स्त्री सुत धन अर्थका भय, जीवनमें संशय और सर्वत्र अशुभही फल होता है ॥ १ ॥

शनिमध्ये चन्द्रफलम्।

स्त्रीलाभं विजयं सौख्यं महिषीगोधनादिकम्।
लभते कन्यकाजन्म शनेरन्तर्गते विधौ॥ १॥

शनिके अंतर्गत चन्द्रमाकी दशामें स्त्रीलाभ, विजय, सौख्य, महिषी और गोधनादिलाभ और कन्याका जन्म होता है॥ १॥

शनिमध्ये भौमफलम्।

बन्धुस्त्रीसुतनाशो वा विद्युत्पातभवं भयम्।
महाव्याधिररिष्टं वा शनेरन्तर्गते कुजे॥ १॥

शनिके अंतर्गत मंगलकी दशामें बंधु स्त्री और पुत्रका नाश, विद्युत्पातसे भय, महाव्याधि और अरिष्ट फल होता है॥ १॥

शनिमध्ये बुधफलम्।

सौख्यं सौभाग्यमारोग्यं यशःसन्तोषवृद्धयः।
सुहृत्स्थानादिलाभः स्याच्छनेरन्तर्गते बुधे॥ १॥

शनिके अंतर्गत बुधकी दशामें सौख्य, सौभाग्य, आरोग्य, यश और संतोषकी वृद्धि होती है और मित्रस्थानादिलाभ होता है॥ १॥ इति शनिदशान्तर्दशाफलम्॥

अथ गुरुमहादशान्तर्दशाफलम्।

गुरोर्दशायां लभतेऽतिसौख्यं गुणोदयं बुद्धयवबोधनाग्रम्।
स्त्रीवित्तलाभं गतिकान्तिभोगान्महात्मचेष्टाफलमुत्तमायाम्॥ १॥

बृहस्पतिकी उत्तम दशामें सौख्यका लाभ, गुणका उदय, बुद्धिकी प्रबलता हो, स्त्रीका तथा धनका लाभ, गति कांति भोगोंकरके युक्त, सुंदर चेष्टा फल होता है॥ १॥

गुरुमध्ये गुरुफलम्।

स्वदशान्तर्गते जीवे धर्मार्थं हयलब्धयः।
लाभो हेमस्थावराणां राजपूजा गुणोदयम्॥ १॥

बृहस्पतिकी स्वदशान्तरमें धर्म अर्थ घोडोंका लाभ, हेम, स्थावर राजपूजाका लाभ तथा गुणका प्रकाश होता है॥ १॥

गुरुमध्ये राहुफलम्।

अन्त्यजैः सह संप्रीतिर्वातपित्तभयावहम्।
गुरोरन्तर्गते राहौ सर्वकार्यविनाशनम्॥ १॥

बृहस्पतिके अंतर्गत राहुकी दशामें नीचजनोंके साथ मित्रता, वातपित्तविकारसे भय और सर्वकार्यका विनाश होता है॥ १॥

गुरुमध्ये शुक्रफलम् ।

रिपुभीतिर्वित्तनाशो बन्धनं कलहो गदः ।
स्त्रीवियोगमवाप्नोति जीवस्यान्तर्गते सिते ॥ १ ॥

बृहस्पतिके अंतर्गत शुक्रकी दशामें शत्रुसे भय, धनका नाश, बंधन, कलह, रोग और स्त्रीका वियोग होता है ॥ १ ॥

गुरुमध्ये रविफलम् ।

नृपतुल्यक्रियायुक्तो व्याधिरोगविवर्जितः ।
बहुस्त्रीसुखसन्तोषो गुरोरन्तर्गते रवौ ॥ १ ॥

बृहस्पतिके अंतर्गत सूर्यकी दशामें राजाके समान क्रियाकरके युक्त, रोगकरके रहित, बहुत स्त्रीका सुख और संतोष होता है ॥ १ ॥

गुरुमध्ये चन्द्रफलम् ।

शत्रुहानिः सुखं पुण्यं शरीरे पुष्टिरुत्तमा ।
स्वजनैः सह संवासो गुरोरन्तर्गते विधौ ॥ १ ॥

बृहस्पतिके अंतर्गत चंद्रमाकी दशामें शत्रुका नाश, सुख, पुण्य, शरीरमें उत्तम, पुष्टता और स्वजनोंकरके सहित वास होता है ॥ १ ॥

गुरुमध्ये भौमफलम् ।

धनं कीर्तिः शत्रुहानिर्बन्धुकीर्तिसुखान्वितः ।
नीरोगः सुभगः श्रीमान् गुरोरन्तर्गते कुजे ॥ १ ॥

बृहस्पतिके अंतर्गत मंगलकी दशामें धन कीर्तिका लाभ, शत्रुका नाश, बन्धुकी कीर्तिसे सुखकरके युक्त, रोगरहित और सुभग होता है ॥ १ ॥

गुरुमध्ये बुधफलम् ।

सुखदुःखसमः श्रीमान् गुरुदेवाग्निपूजकः ।
गुरोरन्तर्गते सौम्ये शत्रुर्मित्रसमो भवेत् ॥ १ ॥

बृहस्पतिके अंतर्गत बुधकी दशामें समान दुःख सुख, श्रीमान्, गुरु देवता और अग्निका पूजनेवाला और मित्र समान शत्रुवाला होता है ॥ १ ॥

गुरुमध्ये शनिफलम् ।

वारस्त्रीसङ्गमं दुःखं कुवृत्तिर्धर्मनाशनम् ।
कामलोभौ नीचसख्यं गुरोरन्तर्गते शनौ ॥ १ ॥

बृहस्पतिके अंतर्गत शनिकी दशामें वेश्या स्त्रीके संगमकरके दुःख, कुत्सित जीविकावाला, धर्मका नाश, कामी, लोभी और नीचजनोंसे मित्रतावाला होता है ॥ १ ॥

इति गुरुमहादशान्तर्दशाफलम् ॥

अथ राहुमहादशान्तर्दशाफलम्।

धर्मव्ययः कामरतेर्विनाशः स्त्रीपुत्रमित्रादिविदेशयानम्।
मतिभ्रमं स्यात्कलिकुष्ठरोगभयं भवेद्राहुदशागमे सति॥ १॥

राहुकी दशामें धर्मकी हानि, कामरतिका विनाश, स्त्री पुत्र मित्रादिकी पीडा, विदेशगमन, मतिभ्रम कलह और कुष्ठरोगका भय होता है॥ १॥

राहुमध्ये राहुफलम्।

भयं स्वान्तर्गते राहौ रोगार्तः पापपीडितः।
स्त्रीपुत्रमित्रनाशो वा कलहो वा स्वबन्धुभिः॥ १॥

राहुके अंतर्गत राहुदशामें भय रोग तथा पापसे पीडित, स्त्रीपुत्रमित्रको कष्ट, अपने जनोंकरके कलह होता है॥ १॥

राहुमध्ये शुक्रफलम्।

सौहार्दं विप्रभूपाभ्यां स्त्रीसङ्गाद् वित्तसञ्चयः।
कलहे विजयः ख्यातो राहोरन्तर्गते सिते॥ १॥

राहुके अन्तर्गत शुक्रकी दशामें ब्राह्मण और राजासे मित्रता, स्त्रीके संसर्गसे धनका संचय और लडाईमें विजय होती है॥ १॥

राहुमध्ये रविफलम्।

रिपुरोगभयं घोरं द्रव्यनाशो महद्भयम्।
अग्निचोरभयं चैव राहोरन्तर्गते रवौ॥ १॥

राहुके अन्तर्गत सूर्यकी दशामें शत्रु-रोगका घोरभय, द्रव्यका नाश, महाभय अग्नि तथा चौरभय होता है॥ १॥

राहुमध्ये चन्द्रफलम्।

रिपुव्याधिर्महाभीतिर्बन्धुवित्तविनाशनम्।
कलहो बन्धुविद्वेषो राहोरन्तर्गते विधौ॥ १॥

राहुके अन्तर्गत चन्द्रमाकी दशामें शत्रु, व्याधि, महाभय, बन्धु तथा धनका नाश, कलह, बन्धुविद्वेष होता है॥ १॥

राहुमध्ये भौमफलम्।

विषशस्त्राग्निचौरेभ्यो महाभीतिः पुनः पुनः।
राहोरन्तर्गते भौमे वित्तस्त्रीबन्धुनाशनम्॥ १॥

राहुके अन्तर्गत मंगलकी दशामें विष, शस्त्र, अग्नि, चौरकरके वारंवार महाभय तथा धन स्त्री और बन्धुका नाश होता है॥ १॥

राहुमध्ये बुधफलम्।

बन्धुमित्रकलत्रादिवित्तभृत्यसुखान्वितः।
न कुत्रापि भयं तस्य राहोरन्तर्गते बुधे ॥ १ ॥

राहुके अन्तर्गत बुधकी दशामें बन्धु:मित्र कलत्रादि धन तथा भृत्य सुखकरके युक्त और कहीं भी भय नहीं होता है ॥ १ ॥

राहुमध्ये शनिफलम्।

वातपित्तभवा रोगाः कलहो बान्धवैः सह।
देशत्यागो धनभ्रंशो राहोरन्तर्गते शनौ ॥ १ ॥

राहुके अन्तर्गत शनिकी दशामें वात-पित्तविकारसे उत्पन्न रोग, बांधवोंके साथ कलह, देशका त्याग, धनका नाश होता है ॥ १ ॥

राहुमध्ये गुरुफलम्।

नीरोगः स्वगणैर्युक्तो देवद्विजरतो भवेत्।
राहोरन्तर्गते जीवे धर्मतीर्थरतो भवेत् ॥ १ ॥

राहुके अन्तर्गत बृहस्पतिकी दशामें रोगरहित अपने जनोंकरके संयुक्त, देवता ब्राह्मणकी भक्तिमें रत, धर्म और तीर्थमें रत होता है ॥ १ ॥ इति राहुमहादशान्तर्दशाफलम्॥

अथ शुक्रमहादशान्तर्दशाफलम्।

शौर्यं गीतिरतिप्रमोदविभवो द्रव्यान्नपानाम्बुद-
स्त्रीरत्नं मतिमन्महोपकरणैरर्थाश्च नानाविधाः।
स्वाध्यायौषधमन्त्रशिल्पकरणैरर्थस्य सिद्धिर्भवेत्
सौख्यं नेत्रविकारभोजनरुचिः ख्यातिः प्रतापोन्नतिः ॥ १ ॥

शुक्रकी दशामें पराक्रमप्राप्ति हो, गीतमें रति हो, प्रमोद विभव द्रव्य अन्नपानादिसे परिपूर्ण सुंदर स्त्रीप्राप्ति, बुद्धिकी अधिकता, उपकारी, अनेक प्रकारके धनकरके युक्त तथा स्वाध्याय, औषधि, मंत्र, शिल्प विद्याकरके अर्थकी सिद्धि हो, सौख्य हो नेत्रपीडा हो, भोजनमें रुचि हो, ख्याति और प्रतापकी उन्नति हो ॥ १ ॥

शुक्रमध्ये शुक्रफलम्।

लाभः स्वान्तरगे शुक्रे स्त्रीसङ्गो धर्मजं सुखम्।
अभिलाषार्थयुक्तश्च कीर्तिकौशल्ययुग्भवेत् ॥ १ ॥

शुक्रके अन्तर्गत शुक्रकी दशामें लाभ, स्त्रीसंग, धर्मसे सुख, अभिलाषा और अर्थ, कीर्ति और कौशल्य करके युक्त होता है ॥ १ ॥

शुक्रमध्ये रविफलम्।

नेत्रगण्डभवै रोगैः पीड्यते नृपबान्धवैः।
उत्पातश्च महद्दुःखं शुक्रस्यान्तर्गते रवौ॥ १॥

शुक्रके अंतर्गत सूर्यकी दशामें नेत्र-गंडरोग, राजा और बांधवसे पीडा, उत्पात और बहुत दुःख होता है॥ १॥

शुक्रमध्ये चन्द्रफलम्।

उद्वेगोऽकुशलं हानिरश्वादीनां धनक्षयः।
बहुक्लेशं मनोदुःखं शुक्रस्यान्तर्गते विधौ॥ १॥

शुक्रके अंतर्गत चन्द्रमाकी दशामें उद्वेग, अकुशल, हानि, घोडा आदि धनका क्षय हो तथा बहुत क्लेश और मानस दुःख होता है॥ १॥

शुक्रमध्ये भौमफलम्।

नखोदराशिरोव्याधिः कलहो बन्धुसंक्षयः।
दौर्बल्यं च शरीरस्य कुजे शुक्रदशां गते॥ १॥

शुक्रके अंतर्गत मंगलकी दशामें नख, पेट, शिरमें व्याधि हो, कलह हो, बंधुका कष्ट हो और शरीरमें दुर्बलता होती है॥ १॥

शुक्रमध्ये बुधफलम्।

धनं धान्यं सुखं लाभो मानो धर्मो यशः सुखम्।
महाजनेन सौहार्दं शुक्रस्यान्तर्गते बुधे॥ १॥

शुक्रके अंतर्गत बुधकी दशामें धन धान्य सुखका लाभ, मान, धर्म, यश और सुखप्राप्ति हो और महाजनोंसे मित्रता हो॥ १॥

शुक्रमध्ये शनिफलम्।

वृद्धस्त्रीगमनं पीडा पुत्रनाशो विपत्पदम्।
शत्रुनाशः सुहृत्प्राप्तिः सौरे शुक्रदशां गते॥ १॥

शुक्रके अंतर्गत शनिकी दशामें वृद्धास्त्रीसे भोग, पीडा, पुत्रनाश, विपत्ति, शत्रुका नाश, मित्रकी प्राप्ति होती है॥ १॥

शुक्रमध्ये गुरुफलम्।

धनधान्यसमृद्धिश्च धर्मशीलसुखानि च।
स्त्रीसुखं कीर्तिमाप्नोति गुरौ शुक्रदशां गते॥ १॥

शुक्रके अंतर्गत बृहस्पतिकी दशामें धनधान्यकी वृद्धि, धर्म, शील और सुखकरके युक्त, स्त्रीसुख और कीर्तिकी प्राप्ति होती है॥ १॥

शुक्रमध्ये राहुफलम् ।

विदेशगमनं बन्धुद्वेषो दुर्जनसंगमः ।
स्ववंशनाशमाप्नोति राहौ शुक्रदशां गते ॥ १ ॥

शुक्रके अंतर्गत राहुकी दशामें विदेशमें गमन, बंधुद्वेष, दुष्टजनोंके साथ और अपने वंशका नाश होता है ॥ १ ॥ इत्यष्टोत्तरीदशाफलं समाप्तम् ॥

अथ सर्वग्रहदशाफलविचारः ।

क्रूरग्रहदशायां च क्रूरस्यान्तर्दशा यदि । शत्रुयोगे भवेन्मृत्युर्मित्रयोगे न संशयः ॥ १ ॥ मङ्गलस्य दशायां च शनेरन्तर्दशा यदि । म्रियते च चिरंजीवी का कथा स्वल्पजीविनः ॥ २ ॥ क्रूरराशिस्थितः पापः षष्ठे वा निधनेऽपि वा । सितेन रविणा दृष्टः स्वपाके मृत्युदो ग्रहः ॥ ३ ॥ लग्नस्याधिपतेः शत्रुर्लग्नस्यान्तर्दशां गतः । करोत्यकस्मान्मरणं सत्याचार्येण भाषितम् ॥ ४ ॥ प्रवेशे बलवान् खेटः शुभैर्वा स निरीक्षितः । सौम्याधिमित्रवर्गस्थोऽरिष्टभङ्गो भवेत्तदा ॥ ५ ॥

जिसके क्रूरग्रहकी दशामें जब क्रूरका अंतर आता है तब उसका शत्रुयोग करके अथवा मित्रयोगकरके मृत्यु होती है। मंगलकी दशामें जब शनैश्चरका अंतर आता है तब चिरंजीवी मनुष्यकी भी मृत्यु होती है स्वल्पजीवी मनुष्यके लिये क्या कहे ? क्रूरराशिमें स्थित पापग्रह छठे अथवा आठवें स्थित हो और सूर्य अथवा शुक्रकरके दृष्ट हो तो वह अपनी दशामें मृत्युको देता है। लग्नके स्वामीके शत्रुका अंतर जब लग्नकी दशामें होता है तब अकस्मात् मरण करता है. यह सत्याचार्यका वचन है। राशिप्रवेशमें बलवान् ग्रह स्थित हो और शुभग्रहोंकी शुभदृष्टिसे देखाजाता हो तथा बुध अपने अधिमित्रके वर्गमें स्थित हो तो संपूर्ण अरिष्टभंग होजाता है ॥ १-५ ॥

अथ उपदशाफलम् ।

अथातः संप्रवक्ष्यामि ग्रहस्योपदशाफलम् ।
सौम्यक्रूरविभिन्नस्य दिनचर्यादिसंमतम् ॥ १ ॥

दिनचर्याके फल जाननेके निमित्त शुभग्रह और क्रूरग्रहके भेद करके भिन्न २ ग्रहोंकी उपदशाका फल कहता हूं ॥ १ ॥

तत्र आदौ रव्युपदशाफलम् ।

ज्वरः शिरोर्तिः पीडा च कलिरुद्वेगकारकः । विग्रहश्च विवादश्च सूर्ये स्वोपदशां गते ॥ २ ॥ धननाशोदरे रोगं कुर्यात्पामां चतुष्प-

दात् । क्षीरं स्नेहं विना भुङ्क्ते चन्द्रे स्वोपदशां गते ॥ ३ ॥ राज्ञो भयं विकारश्चोपद्रवं रिपुविग्रहः । कुधान्यभोजनं सूर्ये भौमस्योपदशाफलम् ॥ ४ ॥ वातश्लेष्मं शत्रुभयं तीक्ष्णं क्षीरं कुभोजनम् । राजपीडा धने हानी राहावुपदशां गते ॥ ५ ॥ हेमाम्बरजयैर्वृद्धिः शत्रुनाशं महासुखम् । मिष्टान्नभोजनं सूर्ये शनेरुपदशा यदि ॥ ६ ॥ नृपपूजा धनं कीर्तिर्विद्याबन्धुसमागमः । भोजनं मधुरान्नस्य रवौ ज्ञोपदशां गते ॥ ७ ॥ दैन्यं परान्नभोजी स्याद्राजपीडा महद्भयम् । शत्रुद्वेषोपदशायां चरेत्केतू रवेर्यदि ॥ ८ ॥ सुखवृद्धिसमानानि धनलाभो महोत्सवः । स्त्रीविलासः सदा सौख्यं रविः सितदशां गतः ॥ ९ ॥

रविअंतर्दशान्तर्गत रविकी उपदशामें ज्वर, शिरका दर्द, पीडा, कलह, उद्वेग, विग्रह और विवाद होता है । रविअंतर्दशान्तर्गत चन्द्रकी उपदशामें धनका नाश, उदर (पेट) में रोग, चौपायोंकरके पातक और दूध घी विना भोजन होता है । रवि अंतर्दशान्तर्गत मंगलकी उपदशामें राजाका भय, विकार, उपद्रव, शत्रुविग्रह और कुत्सित अन्नका भोजन होता है । रवि अंतर्दशान्तर्गत राहुकी उपदशामें वात, कफविकार, तीक्ष्ण शत्रुभय, क्षीर, कुभोजन, राजपीडा और धनका नाश होता है । रवि अंतर्दशान्तर्गत शनिकी उपदशामें सुवर्ण, वस्त्र, जयकी वृद्धि हो, शत्रुका नाश, महान् सुख और मिष्टान्नभोजन प्राप्त होता है । रवि अंतर्दशान्तर्गत बुधकी उपदशामें नृपपूजा, धन, कीर्ति, विद्या, बंधुका समागम और मिष्टान्नका भोजन प्राप्त होता है । रवि अंतर्दशान्तर्गत केतुकी उपदशामें दीनता, पराये अन्नसे भोजन, राजपीडा, महान् भय और शत्रुसे द्वेष होता है । रविअंतर्दशान्तर्गत शुक्रकी उपदशामें सुखकी वृद्धि, सामान्य धनलाभ, महान् उत्सव, स्त्री विलास और सदा सुख होता है ॥ २–९ ॥

इति रव्युपदशाफलम् ॥

अथ चन्द्रोपदशाफलम् ।

धनलाभो महासौख्यं स्त्रीलीलापुत्रसंपदः । वस्त्रान्नपानलाभश्चोपदशासु यदा शशी ॥ १ ॥ वृद्धिर्धनागमो बुद्धिबन्धुस्वजनसौहृदः । रक्तवस्तुकृतो लाभश्चन्द्रस्योपदशां कुजः ॥ २ ॥ राजमानो महासौख्यं भूतिकल्याणवर्द्धनम् । चन्द्रस्योपदशां प्राप्तो राहुः शत्रुभयावहः ॥ ३ ॥ धनधर्मौ महत्तेजो मित्रलाभः सुभोजनम् । सौख्यं च वस्त्रलाभं च चन्द्रस्योपगतो गुरुः ॥ ४ ॥ पुत्रबन्धुकृतोद्वेगयुक्तः स्वस्थान-

वर्जितः । चन्द्रस्योपगते सौरे तुषधान्यादिभोजनम् ॥ ५ ॥ शुक्ल-वस्त्रैः श्रियां लाभो माङ्गल्यं पुत्रसम्पदः । हयभूलाभदश्चैव चन्द्रस्योपगतो बुधः ॥ ६ ॥ विरोधः सर्वधर्माणां जीवितं बहुसंशयम् । सर्पाम्बुविषजा भीतिः शिखी चोपदशां गतः ॥ ७ ॥ जलोदरादिरोगैस्तु रिपुचौरैर्धनक्षयः । अक्षीरं भोजनं रूक्षमिन्दोरुपगते सिते ॥ ८ ॥ विजयं धनसौख्यं च वस्त्रान्नपानलाभकृत् । चन्द्रस्योपदशां भानुः कुरुते नात्र संशयः ॥ ९ ॥

चन्द्रमाके अंतर्दशान्तर्गत चन्द्रमाकी उपदशामें धनका लाभ, महान् सुख, स्त्रीविलास, पुत्रका जन्म संपदा वस्त्र अन्न पानका लाभ होता है। चन्द्र अंतर्दशान्तर्गत मंगलकी उपदशामें धनका आगम होता है, बुद्धि वृद्धि बंधु तथा स्वजनोंसे मित्रता और रक्तवस्तुके व्यापारसे लाभ होता है । चद्रांतर्गत राहुकी उपदशामें राजमान, महान् सौख्य, धन और कल्याणकी वृद्धि और शत्रुसे भय हो। चन्द्रान्तर्गत बृहस्पतिकी उपदशामें धन धर्मका लाभ, अधिक प्रताप, मित्रका लाभ, सुन्दर भोजन, सुख और वस्त्रोंका लाभ होता है। चन्द्रान्तर्गत शनैश्चरकी उपदशामें पुत्र बंधुको कष्ट, स्थानहानि और तुषधान्यादि भोजन प्राप्ति हो । चन्द्रान्तर्गत बुधकी उपदशामें सफेदवस्त्रसे धनलाभ, मांगल्यकार्य, पुत्रका जन्म, संपदा, घोडा और भूमिका लाभ होता है । चन्द्रान्तर्गत केतुकी उपदशामें सब धर्मोंसे विरोध, जीवनमें संशय, सर्प, जल और विषसे भय होता है । चन्द्रान्तर्गत शुक्रकी उपदशामें जलोदरादि रोग तथा शत्रु चोरकरके धनका नाश और क्षीरविना रूक्ष भोजन प्राप्त होता है। चन्द्रान्तर्गत रविकी उपदशामें विजय, धनका सुख, वस्त्र अन्नपानका लाभ होता है ॥ १-९ ॥ इति चन्द्रस्योपदशाफलम् ॥

अथ भौमोपदशाफलम् ।

पीडा शत्रुनरेन्द्राणां रक्तस्रावो भगंदरः । अकस्माज्जायते भौमोपदशासु स्वयं कुजः ॥ १ ॥ कलहं बन्धनं रोगं राजभङ्गं कुभोजनम् । अपमृत्युदशां राहुर्जायते शत्रुपीडितः ॥ २ ॥ कुबुद्धिर्दूषितो रोगी देशेदेशे परिभ्रमः । भौमस्योपदशां जीवे स्वर्ण भवति मृत्तिका ॥ ३ ॥ रक्तस्रावो महात्रासो बन्धनं धनपीडनम् । कोद्रवं च तिलं भोज्यं भौमस्योपदशां शनिः ॥ ४ ॥

भौमान्तर्गत भौमकी उपदशामें शत्रु, राजाकरके पीडा और अकस्मात् रक्तका स्राव और भगंदर रोग होता है। भौमान्तर्गत राहुकी उपदशामें कलह, बंधन, रोग, राज्यका भंग, कुभोजन, अपमृत्यु और शत्रुसे पीडित होता है । भौमान्तर्गत बृहस्पतिकी उपदशामें कुत्सित बुद्धि, दूषित, रोगी, देशदेशमें घूमनेवाला और सोनाभी रक्खाहुआ मट्टी होजाता है। भौमान्तर्गत शनिकी उपदशामें रक्तका प्रवाह, महान् त्रास, बंधन धनपीडा और कोद्रव तथा तिलोंका भोजन प्राप्त होता है१-४

ज्वरार्तिर्मित्रताटस्थ्यं विलंबेन धनक्षयः । भौमस्योपदशां सौम्यस्त्वन्नवस्त्रादिनाशनः ॥ ५ ॥ जृम्भणं च शिरःपीडा रोगमृत्युनृपाद्भयम् । तन्द्रालस्यं कुभोज्यं च केतौ भूसुतमध्यगे ॥ ६ ॥ राजशत्रुभयं त्रासो वमनातीसारतो भयम् । व्रणाजीर्णामयाद्दुःखं भौमस्योपदशां सिते ॥ ७ ॥ भूमेश्च मणिलाभं च धनमित्रसुखावहम् । तीक्ष्णं वै मधुरं भुंक्ते भौमस्योपदशां रवौ ॥८॥ मौक्तिकं शुक्लवस्त्रं च लभते च सुखं यशः । क्षीरमिष्टान्नभोजी स्यात् कुजस्योपदशां शशी ॥९॥

भौमान्तर्गत बुधकी उपदशामें, ज्वरपीडा, मित्रकी उदासीनता थोडा २ करके धनका नाश और अन्न वस्त्रादिका नाश होता है। भौमान्तर्गत केतुकी उपदशामें जृंभण, शिरःपीडा, रोग, मृत्यु, राजासे भय, निद्रा, आलस और कुभोजन प्राप्त होता है। भौमान्तर्गत शुक्रकी उपदशामें राजा तथा शत्रुसे भय, त्रास, वमन, अतीसारसे भय, व्रण, अजीर्णसे भय होता है । भौमान्तर्गत रविकी उपदशामें भूमि मणि लाभ धन मित्र सुख बहुत हो, तीक्ष्ण मधुर भोजनप्राप्ति हो । भौमान्तर्गत चन्द्रमाकी उपदशामें मौक्तिक सफेद वस्त्रका लाभ, सुख यशप्राप्ति और क्षीर मिष्टान्नका भोजन प्राप्त होता है ॥ ५-९ ॥ इति भौमोपदशाफलम् ॥

अथ राहूपदशाफलम् ।

बन्धो व्याधिस्तथा रोगः पीडा भवति दारुणा । स्थानच्युतिः कुभोज्यं च राहुः स्वोपदशाङ्गतः ॥ १ ॥ ज्ञानधर्मार्थनाशश्च कलहं व्यसनं भवेत् । कटुकं मिष्टभोज्यं च राहोरुपदशां गुरुः ॥ २ ॥ लङ्घनं गृहभङ्गश्च हस्तपादाक्षिपीडनम् । बन्धनं बहुजीवश्च राहोरुपगते शनौ ॥ ३ ॥ धनवस्त्रादिहानिश्च पदबुद्ध्योर्विनाशकृत् । भोजनं फलशाकादि राहोरुपदशां बुधः ॥ ४ ॥

राहु अंतर्दशान्तर्गत राहुकी उपदशामें बंधन, व्याधि रोग पीडा दारुण हो, स्थानहानि और कुत्सित अन्नका भोजन होता है । राहु अंतर्दशान्तर्गत बृहस्पतिकी उपदशामें ज्ञान, धर्म और अर्थका नाश, कलह, व्यसन और कटुक मीठा भोजन लाभ होता है । राहुदशान्तर्गत शनिकी उपदशामें लंघन, घरका भंग, हाथ पैर और नेत्रोंमें पीडा, बंधन इत्यादि अशुभफल होता है । राहु अंतर्दशान्तर्गत बुधकी उपदशामें धन वस्त्रादिकी हानि हो पदबुद्धिका नाश, फलशाकादिका भोजन प्राप्त होता है ॥ १-४ ॥

अर्थनाशो विदेशश्च मृत्युचोरनृपाद्भयम् । राहोरुपदशां केतुर्बन्धनं विग्रहो भवेत् ॥ ५ ॥ स्त्रीनाशः कुलनाशश्च योगिनीभूतमातृभिः । पीडनं च कुभोज्यं स्याद्राहोरुपदशां सितः ॥ ६ ॥ सुहृत्पुत्रमहापीडा ज्वररोगान्नहानिकृत् । राहोरुपदशां सूर्यः कुरुते नात्र संशयः ॥ ७ ॥ चित्तभ्रमो मनोभङ्ग उद्वेगोऽथ कलिर्भयम् । भोज्यं स्नेहं हविष्यान्नं राहोरुपदशां शशी ॥ ८ ॥ रोगमृत्युप्रमादश्च रक्तपित्तभगंदरौ । कुभोजनं मानहानी राहोरुपदशां कुजः ॥ ९ ॥

राहु अन्तर्दशान्तर्गत केतुकी उपदशामें अर्थका नाश, विदेशका गमन, मृत्यु चौर तथा राजासे भय बंधन और विग्रह होता है । राहु अंतर्दशान्तर्गत शुक्रकी उपदशामें योगिनी भूत प्रेत तथा मातृग्रहोंकरके स्त्रीका और कुलका नाश, पीडा और कुत्सित भोजन प्राप्त होता है । राहुकी अंतर्दशान्तर्गत सूर्यकी उपदशामें मित्र पुत्रको महान् पीडा, ज्वररोग हो, अन्नकी हानि हो । राहु अंतर्दशान्तर्गत चन्द्रमाकी उपदशामें चित्तभ्रम, मानभंग, उद्वेग, कलह, भय और हविष्यान्न स्नेहका भोजन प्राप्त होता है । राहु अन्तर्दशान्तर्गत मंगलकी उपदशामें रोग, मृत्यु, प्रमाद, रक्तपित्तविकार, भगंदररोग, कुत्सित भोजन और मानहानि होती है ॥ ५-९ ॥

इति राहूपदशाफलम् ॥

अथ जीवोपदशाफलम् ।

यशोदयो महावृद्धिर्धनहेमसमागमः । सुखमिष्टान्नभोज्यं च गुरुश्चोपदशाङ्गतः ॥ १ ॥ हयभूमिपशुप्राप्तिः सर्वत्र सुखमाप्नुयात् । सुभोज्यं बहुधान्यानि जीवस्योपदशां शनिः ॥ २ ॥ विद्यामौक्तिकशस्त्राणां लाभः सुहृद्द्रयागमः । अशनं स्नेहपक्वादि जीवस्योपदशां बुधः ॥३॥ बन्धूनां तस्करादीनां कलितो मृत्युतो भयम् । कुधान्य-

मशनं जीवे केतोरुपदशां गते ॥ ४ ॥ हेमवस्त्रधनप्राप्तिं क्षेमवृद्धिर्विभूषणम् । भोजनं मधुरं क्षीरं जीवस्योपदशां सितः ॥५॥ मातापितृधनं भुङ्क्ते राजपूज्यश्च जायते । भ्रममष्टादशप्राप्तिर्जीवस्योपदशां रवौ॥६॥दधिमधुघृतक्षीरमणिमुक्तेषु लाभदा । जीवस्योपदशा चन्द्रे कुक्षिपादप्रपीडनम् ॥ ७ ॥ शस्त्रशत्रुकृता पीडा गण्डमन्दाग्न्यजीर्णता । कुधान्यभोजनं भौमो जीवस्योपदशां गतः ॥ ८ ॥ चाण्डालव्याधिशत्रुभ्यः पीडनं वमनं भयम् । कटुक्षारं च संभोज्यं जीवस्योपदशां तमः ॥ ९ ॥

बृहस्पति अन्तर्दशान्तर्गत बृहस्पतिकी उपदशामें यशका उदय, धन सुवर्णकी वृद्धि, सुखका समागम और मिष्टान्न भोजन प्राप्त होता है । बृहस्पतिकी अन्तर्देशान्तर्गत शनिकी उपदशामें घोडा, भूमि, पशुओंकी प्राप्ति हो, सर्वत्र सुख हो, सुंदर भोजन मिलै और बहुत धान्य हो । बृहस्पतिकी अन्तर्दशान्तर्गत बुधकी उपदशामें विद्या, मौक्तिक, शस्त्रोंका लाभ, मित्रोंका भय स्नेह पक्कादि भोजन प्राप्त होता है । बृहस्पतिके अन्तरान्तर्गत केतुकी उपदशामें बंधु तथा चौरादिकोंके कलहसे अथवा मृत्युसे भय और कुत्सित अन्नका भोजन प्राप्त होता है । बृहस्पतिके अन्तरान्तर्गत शुक्रकी उपदशामें हेम, वस्त्र, धनका लाभ, क्षेमकी वृद्धि, भूषणोंका लाभ और मधुर क्षीरसंयुक्त भोजन प्राप्त होता है । बृहस्पति अंतर्दशान्तर्गत रविकी उपदशामें माता पिताके धनका भोग, राजासे मान और अठारहों भ्रमोंको प्राप्त होता है । बृहस्पति अन्तर्दशान्तर्गत चन्द्रमाकी उपदशामें दधि (दही) मधु (सहत) क्षीर (घी दूध) मणि तथा मुक्ताके व्यापारमें लाभ और कुक्षि-पादमें पीडा होती है। बृहस्पति अन्तरान्तर्गत मंगलकी उपदशामें शस्त्र शत्रुसे भय, गंड, मंदाग्नि और अजीर्णरोग, कुत्सित धान्यका भोजन लाभ होता है । बृहस्पतिके अन्तरान्तर्गत राहुकी उपदशामें चांडाल, व्याधि तथा शत्रुजनोंकरके पीडा, वमन, भय और कटुक्षारका भोजन प्राप्त होता है ॥ १-९ ॥ इति गुरोरुपदशाफलम् ॥

अथ शनेरुपदशाफलम् ।

जलौकोदेहपीडा च विदेशगमनं भवेत् । कुधान्यतिलमश्नाति शनिः स्वोपदशां गतः ॥१॥ धनबुद्धी रिपोः पीडाऽन्नपानादिहानिकृत् । विना स्नेहरसं भुंक्ते सौरस्योपदशां बुधः ॥ २ ॥ शत्रुचित्तभयं त्रासो दारिद्र्यं च बहुक्षुधा । नीचसङ्गं कुभक्षी च सौरस्योपदशां

शिखी ॥ ३ ॥ द्यूतवेश्याभवद्रव्यं महिषीकृष्यलाभदः । कन्याजन्म तदा गर्भः सौरस्योपदशां सितः ॥ ४ ॥ राजाधिकारस्तेजस्वी व्याधिः पीडा ज्वरो व्यथा । कलत्रकलहं चौरं सौरस्योपदशां रविः ॥ ५ ॥ प्रमाणबुद्धिप्राधान्यं बहुस्त्रीभोगवान् धनी । हविर्मधुक्षीरभोक्ता सौरस्योपदशां शशी।६। शस्त्रवह्निरिपोर्भीतिर्वातरक्तप्रकोपवान् । भोजनं मधुसर्पिर्भ्यां सौरस्योपदशां कुजः ॥ ७ ॥ धनभूमिपशुनाशं कटुतीक्ष्णाम्लभोजनम् । मृत्युर्विदेशगमनं सौरस्योपदशां तमः ॥ ८ ॥ गृहध्वंसो भवेत्स्त्रीभिः क्लेशप्रियो निरुद्यमः । किञ्चित्सौख्यमवाप्नोति सौरस्योपदशां गुरुः ॥ ९ ॥

शनिकी अन्तर्दशान्तर्गत शनिकी उपदशामें जलौकासे देहपीडा, विदेशका गमन, कुधान्य और तिलका भोजन प्राप्त होता है । शनि अन्तरान्तर्गत बुधकी उपदशामें धन बुद्धि, शत्रुका भय हो, अन्नपानादिकी हानि हो और स्नेह रसविना भोजन प्राप्ति हो । शनिदशामें शत्रु, चित्त भय, त्रास, दरिद्रता, बहुत क्षुधा, नीचजनोंका संग और कुत्सित अन्नका भोजन होता है । शनि अन्तरान्तर्गत शुक्रकी उपदशामें द्यूतकर्मसे अथवा वेश्याजनोंसे धनका लाभ, महिषी तथा कृष्णवस्तुसे लाभ और कन्याका जन्म होता है। शनि अन्तरान्तर्गत रविकी उपदशामें राजाधिकार और प्रताप लाभ हो, व्याधि पीडा ज्वर व्यथा हो,कलत्रसे कलह और चोरी हो । शनि अन्तरान्तर्गत चन्द्रमाकी उपदशामें बुद्धिके अनुसार प्रधानता,बहुत स्त्रियोंसे भोग, धनका लाभ और क्षीर मधुयुक्त भोजन प्राप्त होता है । शनि अन्तरान्तर्गत मंगलकी उपदशामें शस्त्र, अग्नि, शत्रुसे भय, वातरक्तविकारका कोप और मधुसर्पियुक्त भोजनका लाभ होता है । शनि अन्तरान्तर्गत राहुकी उपदशामें धन भूमि पशुओंका नाश, कटुतीक्ष्णाम्लका भोजन, मृत्यु और विदेशका गमन होता है । शनि अन्तरान्तर्गत बृहस्पतिकी उपदशामें स्त्रीकरके घरका विध्वंस, प्रियजनोंको कष्ट, उद्यमरहित और किंचित्सौख्य होता है ॥ १-९ ॥ इति शनेरुपदशाफलम् ॥

अथ बुधोपदशाफलम् ।

विद्याबुद्धिर्धनप्राप्तिः स्वर्ण रूप्यं च माणिकम् । लभते धान्यरत्नानि बुधस्योपदशास्वयम् ॥ १ ॥ रक्तपित्तकृता पीडा कुख्यातोदरपीडनम् । वस्त्रार्थशस्त्रहानिश्च सौम्यस्योपदशां शिखी ॥ २ ॥ सौम्यदिक्षु भवेल्लाभः परप्राप्तिर्महत्सुखम् । भुंक्ते मिष्टान्नमाहारं

सौम्यस्योपदशां सितः ॥ ३ ॥ तेजोहानिः शिरःपीडा चोद्वेगश्चल-चित्तकः । दृष्टिदोषो भवेच्छर्दी सौम्यस्योपदशां रविः ॥ ४ ॥ श्रियो लाभस्तथा कन्यासौम्यार्थं पुत्रपौत्रकः । मिष्टान्नभोज्यवस्त्राणि बुधस्योपदशां विधुः ॥ ५ ॥ आममृत्युश्चातिसारं चौराग्निशस्त्रपीडनम् । ज्ञानधर्मधनप्राप्तिः सौम्यस्योपदशां कुजः ॥ ६ ॥ राजशत्रुभयं त्रासः कलहः स्त्रीनिरुत्सहः । स्नेहक्षीरं विना भुक्तं बुधस्योपदशां तमः ॥ ७ ॥ प्रधानपुरुषं राज्यं विद्याबुद्धिविवर्द्धनम् । अन्नपानादि-सौख्यं च बुधस्योपदशां गुरुः ॥ ८ ॥ विकलं वातपातानां वातपीडा महद्भयम् । अन्नपानादिहानिश्च बुधस्योपदशां शनिः ॥ ९ ॥

बुधान्तर्गत बुधकी उपदशामें विद्या, बुद्धि, धन, सोना, चांदी माणिक, धान्य और रत्नादिका लाभ होता है । बुधान्तर्दशान्तर्गत केतुकी उपदशामें रक्तपित्तविकारसे पीडा, उदरपीडा, वस्त्र, अर्थ, शस्त्रहानि होती है । बुधान्तर्गत शुक्रकी उपदशामें उत्तरदिशासे लाभ, सुख और मिष्टान्न भोजन प्राप्त होता है । बुधान्तर्गत रविकी उपदशामें तेजका नाश, शिरःपीडा, उद्वेग, चंचलचित्त, दृष्टिदोष और छर्दीरोग होता है । बुधान्तर्गत चन्द्रमाकी उपदशामें लक्ष्मीका लाभ तथा कन्याका जन्म, शुभ अर्थ, पुत्र पौत्रादिक सुख, मिष्टान्न भोजन और वस्त्रोंका लाभ होता है. । बुधान्तर्गत मंगलकी उपदशामें आमरोगसे मृत्यु, अतिसार, चौर, अग्नि, शस्त्रपीडा, ज्ञान, धर्म और धनका लाभ होता है । बुधान्तर्गत राहुकी उपदशामें राजशत्रुभय, त्रास, कलह, स्त्रीसे निरुत्साह और स्नेह क्षीरविना भोजन प्राप्त होता है । बुधान्तर्गत बृहस्पतिकी उपदशामें राज्यका प्रधान, विद्याबुद्धिकी वृद्धि और अन्नपानादि सौख्य प्राप्त हो । बुधान्तर्गत शनिकी उपदशामें विकलता, घात, गिरना, वातपीडा, महान् भय और अन्नपानादि नाश होता है ॥ १-९ ॥ इति बुधोपदशाफलम् ॥

अथ केतोरुपदशाफलम् ।

धननाशोपघातश्च विदेशे दुःखपूरितम् । सर्वत्र विफलं विन्द्यात् केतोरुपदशां शिखी ॥ १ ॥ अर्थ चतुष्पादहानिर्नेत्ररोगः शिरोव्यथा । श्लेष्मभीत्यर्थहानिश्च केतोरुपदशां भृगुः ॥ २ ॥ मित्रस्वजनजोद्वेगो ह्यल्पमृत्युः पराजयः । भोजनं घृतहीनं च केतोरुपदशां रवौ ॥ ३ ॥ अन्नपानादिनाशं च व्याधितस्य च विभ्रमः । मिष्टान्न-भोजनप्राप्तिः केतोरुपदशां शशी ॥ ४ ॥ वह्नेः शत्रो रणे भीतिर्वात-

कष्टभयं नृपः । कुधान्यं मत्स्यमांसानि केतोरुपदशां कुजः ॥ ५ ॥ शत्रुतो हि भयं स्त्रीणां नीचेभ्योऽधिकपीडनम् । बुभुक्षितं पराधीनं केतोरुपदशां तमः ॥ ६ ॥ विवादं धनहानिश्च वस्त्रमंत्रादिनाशनम् । केतोरुपदशां जीवो रूक्षधान्यादिभोजनम् ॥ ७ ॥ वस्त्रान्नपानहानिश्च सुखमाश्रमपीडनम् । गोमहिष्यादिनाशं च केतोरुपदशां शनिः ॥ ८ ॥ शत्रुपीडा महोद्वेगो विद्याबन्धुधनक्षयः । केतोरुपदशायां हि केतुः सौम्यस्य संशयः ॥ ९ ॥

केतुकी अन्तर्दशान्तर्गत केतुकी उपदशामें धर्मका नाश, उपघात, विदेशमें दुःखप्राप्ति और सर्वत्र कार्य विफल होता है । केतु अन्तरान्तर्गत शुक्रकी उपदशामें अर्थ चतुष्पदादिकी हानि, नेत्ररोग, शिरमें व्यथा, कफविकार और अर्थहानि हो । केतु अंतरान्तर्गत रविकी उपदशामें मित्र और अपने जनोंसे उत्पन्न उद्वेग, अल्प मृत्यु, पराजय और घृतहीन भोजन प्राप्त होता है । केतु अंतरान्तर्गत चन्द्रमाकी उपदशामें अन्नपानादिका नाश, व्याधि, भ्रम और मिष्टान्नभोजन प्राप्त हो । केतुअंतर्गत मंगलकी उपदशामें अग्निभय, रणमें शत्रुसे भय, वातविकारसे कष्ट, राजासे भय, कुधान्य और मछलीमांसका भोजन प्राप्त होता है। केतु अन्तरान्तर्गत राहुकी उपदशामें स्त्रियोंको शत्रुकरके भय और नीचजनोंकरके अधिक पीडा, बुभुक्षित और पराधीन होता है । केतु अंतरान्तर्गत बृहस्पतिकी उपदशामें विवाद, धनहानि, वस्त्र मन्त्रादिका नाश और रूक्षधान्यादिका भोजन प्राप्त हो । केतु अंतरान्तर्गत शनिकी उपदशामें वस्त्र अन्नपानकी हानि सुख और आश्रमपीडा और गौ महिषी आदिका नाश होता है । केतुअंतरान्तर्गत बुधकी उपदशामें शत्रुपीडा, महान् उद्वेग, विद्या बंधु धनका क्षय होता है ॥ १–९ ॥ इति केतूपदशाफलम् ॥

अथ शुक्रोपदशाफलम् ।

माणिक्यसुन्दरीप्राप्तिर्मध्वाज्यक्षीरभोजनम् । श्वेतवस्त्रस्य संप्राप्तिरुपदशास्थः स्वयं भृगुः ॥ १ ॥ राजशत्रुज्वरात्पीडा मनोजंघाशिरोव्यथा । स्वल्पाशनश्च लाभश्च शुक्रस्योपदशां रविः ॥ २ ॥ राज्याधिकप्रदो राज्ये लभते वस्त्रकाञ्चनम् । कन्याजन्मफलप्राप्तिः शुक्रस्योपदशां शशी॥३॥अलाभं ताडनं क्लेशो रक्तपित्तप्रपीडनम् । अन्नपानादिसौख्यं च शुक्रस्योपदशां कुजः ॥ ४ ॥ राजशत्रूद्भवा पीडा स्त्रीशत्रुकलहो भवेत् । भोजने कटुकक्षारं सितस्योपदशां तमः ॥५॥

वज्रमुक्तापदप्राप्तिर्गजाश्वादिगवां भवेत् । कर्पूरमिष्टमाहारं शुक्रस्योपदशां गुरुः ॥ ६ ॥ गवोष्ट्रखरलोहादि लभते स्वल्पलाभकृत् । भोजनं तिलमाषाश्च शुक्रस्योपदशां शनिः ॥ ७॥ बुद्धिर्विज्ञानराज्यश्रीनिध्यधिकारलाभकृत् । भोजनं घृततक्राभ्यां शुक्रस्योपदशां बुधः ॥८॥ भ्रमणं देशग्रामाणां रोगमृत्युमहद्भयम् । लभते द्रव्यधान्यादि- शुक्रस्योपदशां शिखी ॥ ९ ॥

शुक्रान्तर्गत शुक्रकी उपदशामें माणिक्य, सुंदर स्त्री प्राप्ति, मधु नवीन घृत और दूध सहित भोजन और सफेद वस्त्रकी प्राप्ति हो । शुक्रान्तर्गत रविकी उपदशामें राजासे शत्रुसे ज्वरसे पीडा, हृदय, जंघा, शिरमें व्यथा, स्वल्पाशन और लाभ होता है। शुक्रान्तर्गत चन्द्रमाकी उपदशामें राज्यमें राज्यका अधिकारी, वस्त्र कांचनका लाभ, कन्याका जन्म होता है । शुक्रान्तर्गत मंगलकी उपदशामें लाभरहित, ताडना, क्लेशकरके युक्त, रक्तपित्तपीडा और अन्नपानादिका सुख होता है । शुक्रान्तर्गत राहुकी उपदशामें राजासे शत्रुसे भय, स्त्री शत्रुसे कलह और कटुक्षारका भोजन प्राप्त होता है। शुक्रान्तर्गत बृहस्पतिकी उपदशामें वज्र, मुक्ता, अधिकारका लाभ तथा हाथी, घोडे, गौओंका लाभ और सुगंधित मिष्टान्न भोजन प्राप्त होता है । शुक्रान्तर्गत शनिकी उपदशामें गौ, ऊंट, गदहा और लोहादि लाभ, स्वल्प प्राप्ति और तिलमाषका भोजन लाभ होता है । शुक्रान्तर्गत बुधकी उपदशामें बुद्धि, ज्ञान, राज्य, लक्ष्मी, निधि और अधिकारका लाभ, खीर, पूरी आदि सुंदर भोजन प्राप्त होता है। शुक्रान्तर्गत केतुकी उपदशामें देश ग्रामादिकोंमें भ्रमण, रोग मृत्यु महान् भय और द्रव्य धान्यादिका लाभ होता है ॥ १-९ ॥ इति शुक्रोपदशाफलम् ॥

अथ संध्यादशाफलम् ।

तत्रादौ रविसन्ध्याफलम् ।

संध्या दिनेशस्य विपाककाले धनागमं शौर्यनरेन्द्रसौख्यम् ।
धर्मोद्यमं सौख्यमतीव तीक्ष्णं भूपादिसौख्यं विभवादिमानम् ॥ १ ॥
प्रचण्डवित्तं स्वकुलाधिकारं सुवर्णताम्राश्वरथादिकाप्तिः ।
आरोग्यता विद्रुमरत्नलाभं प्राप्नोति कीर्तिं रिपुसंक्षयं च ॥ २ ॥
तुङ्गादिसंस्थः फलमेव सन्ध्या नीचारिभस्थो विशुभं फलं च ।
तदर्थनाशं पितृबन्धुहानिं हृदक्षिपीडाकरपित्तरोगम् ॥ ३ ॥

सूर्यकी संध्यादशामें धनका आगम हो, पराक्रम राजसौख्य बहुत धर्म उद्यम हो, तीक्ष्ण सौख्य हो, भूपादिसे सौख्य हो, विभवादि मानप्राप्ति हो । अधिक धन और अपने कुलमें अधिकारप्राप्ति हो, सुवर्ण, तांबा, घोडे रथादिककी प्राप्ति हो, शरीरमें आरोग्यता हो, विद्रुमरत्नका लाभ हो,कीर्ति हो और शत्रुका नाश हो यह फल उच्चादिस्थानोंमें सूर्यके रहते जानना । यदि सूर्य नीच शत्रुराशिका हो तौ अशुभ फल होता है ।अर्थका नाश, पिताबंधुकी हानि, हृदय-नेत्रपीडा कारक पित्तरोग होता है ॥ १-३ ॥ इति रविसन्ध्याफलम् ॥

अथ चन्द्रसन्ध्याफलम् ।

निशाकरः सन्धिविपाककाले प्राप्नोति वित्तं द्विजमन्त्रिसौख्यम् ।
स्वविक्रमाच्च स्वगुणैः सुवर्णं सुगन्धद्रव्यादिषु कार्यलाभम् ॥ १ ॥
प्रबोधकल्याणधनावरातिरभीष्टसिद्धिर्धनधर्मलाभम् ।
सत्साधुसंपर्ककथानुरक्तं कुलाधिमुख्यं नृपपूजितं च ॥ २ ॥
नीचारिभस्थं कृषिकस्वरूपं मित्रादिहर्त्ता दुहितुः प्रसूतिः ।
अर्थक्षयं शोकरुजादिकष्टं क्रोधोद्भवं विद्रवमृत्युकारी ॥ ३ ॥

चन्द्रमाकी संध्यासमयमें वित्त, ब्राह्मण मंत्रिसौख्यका लाभ, अपने पराक्रम तथा गुणोंकरके सुवर्ण सुगंधद्रव्यादि व्यापारमें कार्यका लाभ, प्रबोध कल्याणकी प्राप्तिवाला, धनका लाभ, अभीष्टसिद्धि, धनधर्मका लाभ, सुंदर साधुजनोंका संग, भगवत्कथामें रति, कुलमें प्रधानता, राजासे पूजित होता है । यदि चन्द्रमा उच्चादिस्थानमें गत हो और यदि नीच शत्रुराशिमें हो तो खेती करनेवाला, मित्रादिका छलनेवाला कन्याका जन्म अर्थका क्षय, शोकरोगादि कष्ट और विद्रवरोगसे और मृत्युकारक क्रोधवाला होता है ॥ १--३ ॥ इति चन्द्रसंध्याफलम् ॥

अथ भौमसन्ध्यादशाफलम् ।

स्वपाककाले धरणीसुतस्य संध्यामवाप्नोति महाप्रतापम् ।
चौर्यं हविस्तस्करपापकर्मा दोर्दण्डतेजोरणसाहसश्च ॥ १ ॥
नृपेश्वरः शस्त्रविषाग्निकर्मनेता च सूर्यान्नृपकूलधर्मैः ।
कान्तादिकार्यैः सततार्थलाभो हेमाङ्गनाताम्रहिरण्यलाभः ॥ २ ॥
मतिं च पूर्वाकटुकैः कषायै रसैः कुमन्त्रैः कुजनेषु सक्तिः ।
स्वभ्रातृबन्धुस्वजनार्थनाशं दाहानुजः शोणितपित्ततेच्छया ॥ ३ ॥

मंगलकी संध्यादशामें बडे प्रतापको प्राप्त, चौर्य, हविका तस्कर, पापकर्मा बाहुप्रतापसे रणसाहसी, राजाओं तथा शस्त्र, विष, अग्निकर्मका नेता, श्रेष्ठ धर्म

करके संयुक्त, कांतादिकार्यमें प्रवीण, निरंतर अर्थका लाभ, हेम अंगना ताम्र हिरण्यके लाभवाला होता है । यदि भौम नीच शत्रुराशिमें स्थित हो तो कटु कषायरसका भोजन प्राप्त, कुबुद्धि, कुजनोंका साथ, अपने भाई बंधु और अपने जनों, अर्थका नाश, कष्ट, रुधिर और पित्तविकारसे भय होता है ॥ १-३ ॥ इति भौ०सं०फलम् ।

अथ बुधसन्ध्यादशाफलम् ।

बुधस्य संध्या विदधाति शश्वद्धनागमं मित्रकलत्रपुत्रैः ।
वणिक्प्रयोगाद्यखिलेषु काव्यैर्महेन्द्रजालैः कुहकादिभिश्च ॥ १ ॥
द्यूतप्रयोगाद्द्विपकर्ममन्त्रैर्दैवज्ञसिद्धान्तरसायनाद्यैः ।
भूहेमलोहस्वनृपात्मजेभ्यो लाभो धनानां सुखसौख्यवृद्धिः ॥ २ ॥
नीचर्क्षसंस्थोऽस्तमितस्य सौम्यस्त्रिधातुपीडा कुरुतेऽर्थनाशम् ।
कलत्रहानिर्नृपबन्धनार्तिः परस्वदुःखं नृपपीडितश्च ॥ ३ ॥

बुधसंध्यादशामें अनेकप्रकारसे मित्र कलत्र पुत्र करके धनका आगम, वाणिज्यकरके संपूर्ण प्रयोगोंकरके काव्यकरके इंद्रजाल और बाजीगरीके जुवांकरके द्विपकर्म करके मंत्रादिकरके ज्योतिषसिद्धान्त रसादिकरके, भूमि, हेम, लोह, अपने राजा और पुत्रकरके धनका लाभ और सुखसौख्यकी वृद्धि हो और बुध यदि नीचशत्रुराशिमें अथवा अस्तको प्राप्त हो तो त्रिधातु विकारसे पीडा, अर्थका नाश, कलत्रहानि, राजबंधन, अधिक दुःख और राजाकरके पीडित होता है ॥१-३॥ इति बु० सं० फलम् ।

अथ गुरुसन्ध्यादशाफलम् ।

गुरुः स्वसन्ध्यां लभतेऽतिसौख्यं हेमाम्बरं रत्नगजाश्वजातम् ।
धनं लभेत्पुत्रसमुच्चयं च स्वधर्मसिद्धिं द्विजदेवपूजाम् ॥ १ ॥
जनागमं चात्र सुरेश्वरस्य वेश्मप्रवेशस्त्वपि चार्थसिद्धिः ।
स्वजन्मसम्मानमतिप्रहर्षं भूपालसौख्यं विविधार्थलाभम् ॥ २ ॥
विदेशनिम्ने कृतगोविवर्णैर्गुरुः स्वपाके सुकृदर्थनाशनम् ।
भूपालभङ्गं सुतकष्टरोगं करोति पाके बहुदुःखकारी ॥ ३ ॥

बृहस्पतिकी संध्यादशामें अत्यन्त सुखका लाभ, हेम, गज, अश्व, रत्न आदिके व्यापारसे धनका लाभ होता है । पुत्रसुख, अपने धर्ममें सिद्धि, देवता, ब्राह्मणकी पूजा, अपने जनोंका आगम, देवस्थानका प्रवेश, अर्थकी सिद्धि, सम्मान, अति आनंद, भूपाल सौख्य और विविध अर्थका लाभ होता है और नीचादिमें बृहस्पति स्थित हो तो विदेशका गमन, सुकृत अर्थका नाश, राज्यका भंग, पुत्रकष्ट, रोग और बहुत दुःख होता है ॥ १-३ ॥ इति जीवसंध्याफलम् ॥

अथ शुक्रसंध्याफलम्।

दैत्येन्द्रपूज्यस्य करोति सन्ध्या महार्थलाभं सुमहच्च सौख्यम्।
नृपेश्वरत्वं स्वकुलाधिकारं प्राप्नोति वित्तं मणिमौक्तिकानि ॥ १ ॥
गजाश्वयानासनमानहर्षैः प्रख्यातकर्मा क्रयविक्रयाणाम्।
धनागमं भूकृषिणा महोक्षैः कलत्रवृद्धिः सुखसौख्यदं च ॥ २ ॥
शुक्रेऽरिगे निम्नगृहेऽल्पमायुर्योधैर्जितो वारवलिप्तिगुप्तिः।
दुष्टाङ्गनासङ्गमसौख्यहर्त्ता धनक्षयं स्त्रीसुतधर्मनाशम् ॥ ३ ॥

शुक्रकी सन्ध्यादशामें महान् अर्थकी प्राप्ति हो, बहुत सौख्य हो, राजत्व प्राप्त हो, अपने कुलका अधिकारी हो, वित्त मणि मौक्तिकादि प्राप्त हो, हाथी घोडे सवारी सन्मान और हर्षकरके संयुक्त हो और क्रयविक्रयके कर्ममें प्रसिद्ध होता है। खेती भूमि आदिसे धनका आगम, कलत्र वृद्धि और महान् सौख्य होता है और शुक्र शत्रु नीचराशिका हो तो थोडे धनका लाभ, योद्धाओंकरके पीडित, गुप्तभय, कष्ट, दुष्टस्त्रीके संगमकरके सौख्यका नाश, धनका क्षय, स्त्री, पुत्र और धर्मका नाश होता है ॥ १-३ ॥

अथ शनिसन्ध्याफलम्।

प्राप्नोति तीक्ष्णांशुसुतस्य संध्या ददाति लाभं स्वकुलाधिकारम्।
खरोष्ट्रगोपाक्षिकधान्यवस्त्रकुलित्थमाषादिककोद्रवाप्तिम् ॥ १ ॥
वृन्देश्वरं ग्रामपदाधिपत्यं कुलोन्नतिं हीनजनप्रमाणम्।
सुलोहसीसत्रपुसन्महिष्यैर्धनागमं मृत्युं चतुष्पदाच्च ॥ २ ॥
नीचोऽरिभस्थोऽस्तमितोदितस्य सौरस्य पाके कुरुते च कष्टम्।
सद्बन्धुभार्यात्मज अर्थनाशं देहे रुजा तीव्रतराऽनिलोत्था ॥ ३ ॥

शनिकी सन्ध्यादशामें लाभ, अपने कुलका अधिकार, गदहा ऊंट गौ पाक्षिक धान्य वस्त्र कुलथी माषादिक कोदोंका लाभ, वृन्दका स्वामी, ग्रामपदका स्वामी, कुलकी उन्नति, नीचजनोंमें प्रमाण, लोहा, सीसा, त्रपु, महिषी आदिकरके धनका आगम, चौपायेसे मृत्यु होती है। नीच शत्रुराशिमें हो तो अथवा अस्तको प्राप्त हो तो कष्ट, भाई, स्त्री, पुत्र, अर्थका नाश, देहमें रोग और वातविकारसे रोग होता है १-३।

उक्तानि वै द्वादशभिः प्रकारैर्नैसर्गिकादीनि दशान्तराणि।
तत्रापि संध्याफलपाक उक्तः स चिन्तनीयः सदृशः फलानि ॥ १ ॥

नैसर्गिक आदिक बारह प्रकारकरके पूर्व जो दशा अन्तर कहा है तहां भी सन्ध्यादशाफल उसके समानही चिंतन करै ॥ १ ॥ इति सन्ध्यादशाफलं संपूर्णम् ॥

अथ पाचकदशाफलम्।

तत्र रविमध्ये रव्यादिपाचकफलम्।

राजमानं सुखं चैव सम्मानं शत्रुनाशनम्। लभते सौख्यलाभं च रविमध्ये स्वयं रविः॥ १॥ रोगादिनाशं धनधान्यलाभं शत्रुक्षयं प्रीतिसुखोदयं च। सूर्यस्य चन्द्रान्तरसंधिपाके तत्रास्तभाद्द्वित्रिशुभं करोति॥ २॥ दिवाकरस्यान्तरगः कुजश्च लाभो भयं विक्रमहेमताम्रम्। संग्रामधुर्याजयवाहनानि प्रचण्डतां भूपसुखं करोति॥ ३॥ देहे च कष्टं ज्वररोगदौस्थ्यं करोति शोकं क्षयशत्रुवैरम्। अर्थक्षयं रोगरुजाप्रवासं बुधो विपाके दिवसेश्वरस्य॥ ४॥ पापादिरोगव्यसनादिमुक्तिधर्मौ स्वयं ज्ञानसुखागमं च। सूर्यस्य चेज्योऽन्तरगो विपाके करोति लक्ष्मीं धनवर्धनं च॥ ५॥ दद्र्वादिरोगान् गलरोगदोषाञ्छूलं ज्वरं वा सुहृदस्तु कष्टम्। शस्त्राद्भयं नैव दिवाकरस्य संध्या शुभं दैत्यगुरोः करोति॥ ६॥ कार्यार्थनाशं क्षितिपालभङ्गं देहे रुजा पित्तसमुद्भवा च। विद्युद्भयं बुद्धिविनाशदैन्यं संध्या तु सौरेर्दिवसेश्वरस्य॥ ७॥

रविके अन्तर्गत रविदशामें राजासे मान प्रतिष्ठा, सुख, सम्मान, शत्रुका नाश और सौख्यका लाभ होता है। रविके अन्तर्गत चन्द्रमाकी दशामें रोगादिका नाश, धनधान्यका लाभ, शत्रुका क्षय, प्रीति सुखका उदय हो और जो उच्चादिस्थानमें हो तौ दूना तिगुना शुभ फल होता है। रविके अन्तर्गत मंगलकी दशामें पराक्रम, हेमताम्रका लाभ, अभय, संग्राममें जय, वाहनादिसुख और प्रचंडतापूर्वक राजसुख होता है। रविके अन्तर्गत बुधकी दशामें शरीरमें कष्ट, ज्वर, रोग, शोक, क्षय शत्रुवैरका अर्थका क्षय, प्रबल रोग और विदेश गमन होता है। रविके अन्तर्गत जब बृहस्पतिकी दशा होती है तो पाप रोग, व्यसनसे रहित, मुक्ति धर्मकरके संयुक्त, ज्ञान सुखका आगम, लक्ष्मी और धनकी वृद्धि हो। रविके अन्तर्गत शुक्रकी दशामें दाद आदि रोग, गलरोग, दोष, शूल, ज्वर, मित्रका कष्ट, शस्त्रसे भय और कल्याणरहित होता है। रविके अन्तर्गत शनिकी दशामें कार्य अर्थका नाश, राजासे भय, पित्तसे उत्पन्न शरीरमें रोग, विद्युद्भय, बुद्धिका नाश और दीनता होती है॥ १-७॥ इति रविपाचकदशाफलम्॥

चन्द्रमध्ये चन्द्रान्तरफलानि।

मणिमुक्ताफलं चैव सौख्यानि विविधानि च। वस्त्रप्राप्तिः सुखप्राप्तिः

स्वपाके तु यदा शशी ॥१॥ रक्तवस्तु भवेल्लाभो विदेशगमनं भवेत् । सुखसन्तानमाप्नोति चन्द्रे भौमस्य पाचके ॥ २ ॥ दुःखं सुखं समं चैव लाभहानी तथैव च । उद्वेगवशगो नित्यं चन्द्रस्यान्तर्गते बुधे ॥ ३ ॥ स्वर्णलाभं पुत्रजन्म ह्यानन्दं हर्षसंयुतम् । मणिर्मुक्ताफलं चैव चन्द्रस्यान्तर्गते गुरौ ॥ ४ ॥ उत्तमस्त्रीजनैर्योगो दिव्यकन्यासमुद्भवः । धर्मयुक्ता धनप्राप्तिश्चन्द्रस्यान्तर्गते सिते ॥ ५ ॥ वेश्यागमं करोत्येव विवादं स्त्रीसमागः । अकस्माद्धनलाभश्च चन्द्रमध्ये शनिर्यदा ॥ ६ ॥ मणिविद्रुमलाभं च सर्वसौख्यसुखागमम् । प्रतापं गन्धसंयुक्तं कर्पूरादि शशी रवेः ॥ ७ ॥

चन्द्रमाके अंतर्गत चन्द्रमाकी दशामें मणिमुक्तादि फलप्राप्ति, विविध सौख्य, वस्त्रप्राप्ति और सुखप्राप्ति होती है। चन्द्रमाके अंतर्गत मंगलकी दशामें लालवस्तुसे लाभ, विदेशका गमन, संतानसुख होता है। चन्द्रमाके अंतर्गत बुधकी दशामें दुःख सुख तथा लाभ हानि समानही होता है और सदा व्याकुलतायुक्त होता है। चन्द्रमाके अंतर्गत बृहस्पतिकी दशामें सोनेका लाभ, पुत्रका जन्म, आनन्दकरके युक्त और मणिमुक्ताफलका लाभ होता है । चन्द्रमाके अन्तर्गत शुक्रकी दशामें उत्तम स्त्रियोंसे संयोग और सुंदरकन्याकी उत्पत्ति और धर्मयुक्त धनकी प्राप्ति होती है। चन्द्रमाके अंतर्गत शनिकी दशामें वेश्याका गमन, विवाद, स्त्रीसमागम और अकस्मात् धनका लाभ होता है। चन्द्रमाके अंतर्गत सूर्यकी दशामें मणि विद्रुमका लाभ, सर्वसौख्य, सुखका आगम, प्रताप और गंधयुक्त कर्पूरादि प्राप्त होता है॥१-७॥ इति चं०फ०॥

अथ भौममध्ये भौमादिपाचकफलम् ।

भौमे शत्रुविमर्दः स्यात्कलहो बन्धुभिर्नृणाम् । स्वान्तरे बहुपीडा स्याद्वृद्धस्त्रीगणिकारतिः ॥ १ ॥ फलं मानं सुखं चैव धनलाभसुखागमम् । लभते मानवो नित्यं भौममध्ये बुधो यदा ॥ २ ॥ सौभाग्यसौख्यमतुलं नानाशत्रुविमर्दनम् । लभते सुखसौभाग्यं भौममध्ये गुरुर्यदा ॥ ३ ॥ स्वदेहपीडां धनमानहानिं महाप्रतापं सुखवर्जितं च । ददाति भौमान्तरगो भृगुश्च धर्मार्थसिद्धिं विजयं तथैव ॥ ४ ॥ स्वदेहभङ्गं कुरुते शनौ कुजो विपाककाले सुखवर्जितं च । धनागमं ह्यर्थविनाशनं च सेवा भवेन्नीचजनप्रतापे ॥ ५ ॥ सूर्यो रोगविनाशं

च श्वेतवस्तुफलप्रदम्। सम्मानं चैव भूपालात् सर्वसौख्यधनागमम् ॥६॥ ददाति हेमाम्बरसौख्यलाभं धनं तथा भोगसुखं च संततिम्। मित्रागमं भ्रातृपितुश्च भक्तिं ददाति चन्द्रान्तरगः कुजश्च ॥ ७॥

भौमके अंतर्गत मंगलकी दशामें शत्रुका नाश, बंधुओंके साथ कलह, बहुतपीडा, वृद्धस्त्री तथा वेश्याओंसे संग होता है। भौमके अंतर्गत बुधकी दशामें मान, सुख, धनधान्यका सुख और सुखका आगम सदा होता है। भौमके अंतर्गत बृहस्पतिकी दशामें सौभाग्य, अतुल सौख्य, शत्रुओंका नाश और सुखसौभाग्यका लाभ होता है। भौमके अन्तर्गत शुक्रकी दशामें शरीरमें पीडा, धन-मानकी हानि, बहुत प्रतापयुक्त परंतु धनकरके सहित, धर्मार्थकी सिद्धि और विजय होती है। भौमके अन्तर्गत शनिकी दशामें अपने शरीरका भंग, सुखकरके रहित, धनका आगम, अर्थका नाश और नीचजनोंकी सेवा करनेवाला होता है। भौमके अंतर्गत रविकी दशामें रोगका, नाश श्वेतवस्तुसे लाभ,राजसम्मान, सर्वसौख्य और धनका आगम होता है। भौमके अंतर्गत चन्द्रमाकी दशामें हेम, अंबर, सौख्यलाभ, धनलाभ, भोग सुख, संतानसुख, मित्रका आगम, भाई पितामें भक्ति होती है ॥ १-७ ॥ इति भौमादिपाचकफलम् ॥

अथ बुधमध्ये बुधादिपाचकदशाफलम्।

स्वबोधबुद्धिदं चैव शत्रूणां च क्षयंकरम्। द्रव्यलाभं धनं सौख्यं स्वपाके बुधगे सदा ॥ १ ॥ हेमाम्बरे भवेल्लब्धिर्विदेशगमनं भवेत्। बुधस्यान्तर्गते जीवे धनधान्यसुखं भवेत् ॥ २ ॥ बुधमध्ये यदा शुक्रो भवत्येव सुखागमः। धनधान्यसमृद्धं स्याद्बहुसौख्यं करोति च ॥ ३ ॥ बुधस्य सन्ध्यामध्ये तु सौरपाको यदा भवेत्। तदा राजा भवेन्मानसुखसन्तानकारकः ॥ ४ ॥ वातपित्तकृता पीडा हानिकारी नरो भवेत्। पाककाले बुधस्यापि यदा चान्तरतो रविः ॥ ५ ॥ देहपीडा च उद्वेगः कलहश्च गृहे भवेत्। अत्यंतहानिकारी च बुधमध्ये तु चन्द्रमाः ॥ ६ ॥ अग्निदाहं ज्वरं तीव्रं भवेद्रक्तविकारकम्। शत्रुघातरुजं चैव बुधमध्ये कुजे सदा ॥ ७॥

बुधके अंतर्गत बुधकी दशामें अपने बोध बुद्धिकी प्राप्ति, शत्रुओंका नाश, द्रव्य लाभ और धनका सुख होता है। बुधके अंतर्गत बृहस्पतिकी दशामें हेम अंबरके व्यापारसे लाभ, विदेशका गमन और धनधान्यका सुख होता है। बुधके अंतर्गत शुक्रकी दशामें सुखका आगम, धनधान्यकी वृद्धि और बहुत सुखी होता है।

बुधके अंतर्गत शनिकी दशामें राजासे मान, सुख और पुत्रका जन्म होता है । बुधके अंतर्गत रविकी दशामें वातपित्त विकारसे उत्पन्न पीडा और हानि होती है । बुधके अंतर्गत चन्द्रमाकी दशामें देहपीडा, उद्वेग, कलह और अत्यंत हानि होती है । बुधके अंतर्गत मंगलकी दशामें अग्निका दाह, विषमज्वर, रक्तविकार, शत्रुघात और रोग होता है ॥ १-७ ॥ इति बुधपाचकदशाफलम् ॥

जीवमध्ये जीवादिपाचकदशाफलम् ।

पापैश्च रोगैश्च भवेद्विमुक्तो धर्मौ जयं प्राप्य समस्तकाले । जीवः स्वपाके फलमातनोति धनागमं मित्रकलत्रपुत्रैः ॥ १ ॥ कार्यार्थनाशं च महाविरोधं विशेषमाप्नोति नरोऽतिसौख्यम् । शृङ्गारकोशस्य नरैश्च सौख्यं यदा भवेज्जीवगतो भृगुश्च ॥ २ ॥ शनैश्चरे पाकगतेऽथ जीवे दानं करोत्येव हि सर्वसौख्यम् । द्रव्यापहारं व्यसनादियुक्तं ज्वराभिघातं व्यसने च सक्तिम् ॥ ३ ॥ सन्ध्या गुरोः पाकरविः स्वकाले धनागमं मित्रकलत्रकं च । चिरं वसेद्देशविदेशलाभं महत् प्रतापं विजयं च सौख्यम् ॥ ४ ॥ तीर्थागमे भवेत्सौख्यं पुत्रमित्रसमागमम् । धनलाभो भवेच्चैव गुरुपाके शशी यदा ॥ ५ ॥ अग्निचोरभयं नास्ति धनप्राप्तिः पदेपदे । राजमानं गृहे सौख्यं जीवमध्ये कुजे गते ॥ ६ ॥ जीवान्तरगते सौम्ये धान्यं पुत्रसुखं गृहे । मांगल्यं च भवेन्नित्यं वस्त्रपातं सुखं भवेत् ॥ ७ ॥

बृहस्पतिके अंतर्गत बृहस्पतिकी दशामें पाप रोग इनकरके रहित सदाकाल धर्म जय और धन मित्र कलत्र पुत्र इनका आगम वा सुख होता है । बृहस्पतिके अंतर्गत शुक्रकी दशामें कार्य अर्थका नाश, अत्यन्त विरोध, सुखयुक्त शृंगार कोश और मनुष्योंकरके सुखलाभ होता है । बृहस्पतिके अंतर्गत शनैश्चरकी दशामें दान करनेसे सुख, द्रव्यका नाश, व्यसनादिकरके युक्त, ज्वरकरके घात और व्यसनमें रत होता है । बृहस्पतिके अंतर्गत रविकी दशामें धनका आगम, मित्र, कलत्रका सुख अपने देशमें आनन्दपूर्वक वास, देशविदेशसे लाभ, बहुत प्रताप विजय और सौख्य होता है । बृहस्पतिके अंतर्गत चन्द्रमाकी दशामें तीर्थका गमन, सौख्य, पुत्रका जन्म, मित्रका समागम और धनका लाभ होता है । बृहस्पतिके अंतर्गत मंगलकी दशामें अग्नि वा चौरभय करके रहित, पद पदमें धनका लाभ, राजमान और घरमें

सुख होता है। बृहस्पति अंतर्गत बुधकी दशामें धान्यका लाभ, पुत्रका सुख, घरमें कल्याण, नित्य मांगलिक कार्य, वस्त्रलाभ और सुख होता है॥ १–७॥ इति जीवान्तराणि।

अथ शुक्रमध्ये अन्तरफलम्।

स्वपाककाले भृगुनन्दनोऽपि हेमाम्बरं सौख्यमतीव दत्ते। वस्त्रादिप्राप्तिं च सुखागमं च धनं लभेत्पुत्रसमन्वितं च॥१॥ राज्याभिमानं सुखसम्पदं च परोपकारी व्ययमाप्नुवन्ति। मित्रादितोऽपि व्यसनैः समेतं माङ्गल्यकार्यं च सुखावहं च॥ २॥ कार्यनाशं गृहे सौख्यं भुञ्जन्ति प्रभवः सदा। विपाके सूर्यशुक्रे च मानवो लभते फलम्॥ ३॥ ददाति वित्तं बहुसौख्ययुक्तं वस्त्राम्बरं रत्नसमुच्चयं च। सौख्यार्थलाभं स्वगृहे च सौख्यं यदा भवेच्छत्रुगतो हिमांशुः॥ ४॥ भृगोर्विपाके धरणीसुतोऽपि कार्यार्थलाभं बह्वर्थयुक्तम्। महत्प्रतापं सुखसङ्गमं च ददाति प्राप्नोति भयं कुतश्च॥ ५॥ ददाति मौक्तिकं चैव सुखसौभाग्यपुत्रदम्। कन्याजन्म गृहे सौख्यं भृगुमध्ये गते बुधे॥ ६॥ सुखं करोति सौभाग्यं व्यवहारे महत्सुखम्। लाभं कार्यस्य सिद्धिः स्याच्छुक्रमध्ये गते गुरौ॥ ७॥

शुक्रदशाके अंतर्गत शुक्रहीकी दशामें नित्य हेम वस्त्र सौख्यका लाभ, वस्त्रादि प्राप्ति, सुखका आगम, धनका लाभ और पुत्रका सुख होता है। शुक्रके अंतर्गत शनिकी दशामें राज्य, अभिमान सुख, संपदासे युक्त, परोपकारी, धनका खर्च, मित्रादिके व्यय और व्यसनकरके सहित, मांगल्यकार्य और बहुत सुख होता है। शुक्रके अंतर्गत रविकी दशामें कार्यका नाश, घरमें सुख, विभव भोग संयुक्त होता है। शुक्रके अंतर्गत चन्द्रमाकी दशामें बहुत धन सौख्य करके संयुक्त, श्रेष्ठवस्त्र, रत्नका संग्रह, सौख्य अर्थलाभ, घरमें कल्याण और सौख्य होता है। शुक्रके अंतर्गत मंगलकी दशामें कार्यार्थलाभ, बहुत धनकरके युक्त, महान् प्रताप, सुखका संगम और कुछ भय भी होता है। शुक्रके अंतर्गत बुधकी दशामें मौक्तिक, सुख, सौभाग्यका लाभ, पुत्रका अथवा कन्याका जन्म और घरमें कल्याण होता है। शुक्रके अंतर्गत बृहस्पतिकी दशामें सुख सौभाग्य, व्यापारमें महान् सौख्यलाभ और कार्यकी सिद्धि होती है॥ १–७॥

शनिमध्ये पाचकफलम्।

शनेर्विपाके कुरुतेऽभिमानं महत्सुखं लोहगतादिवृद्धिः। लाभं प्रतापं च शरीरकष्टं प्रान्ते ददात्येव हि सूर्यपुत्रः॥ १॥ धनहानि-

र्भवेन्नित्यं हानिशोकौ भयं तथा। विदेशे भ्रमणं शीलं शनेः पाके गतो रविः ॥ २ ॥ सुखदं रोगनिर्मुक्तं लाभदं हानिजं तथा । करोति शनिपाके च शशाङ्कोऽन्तर्गतः शनेः ॥ ३ ॥ महीसुतेऽन्तरगते कलहं चाप्युपद्रवः। अग्निदाहं ज्वरं तीव्रं विफलं विगतं भवेत् ॥ ४ ॥ सौरान्तरगते सौम्ये राजमानं करोति च । मध्यसंपद्धि गेहे च कार्यप्राप्तिः सवस्त्रदम् ॥ ५ ॥ करोति जीवो बहुबुद्धिसौख्यं राज्याभिधं देशपुराधिपत्यम् । परोपकारं सुखसंपदश्च करोति सौरे च गुरुः सदैव ॥६॥ ददाति वित्तं भृगुनन्दनः सुखं सुखार्थविद्यागमनं भवेत् स्वयम् । सुनिर्मलं बाहुप्रतापयुक्तं विदेशयाने च नरः सुखं लभेत् ॥ ७ ॥

शनिसंध्यान्तर्गत शनिकी दशामें अभिमान, महान् सुख, लोहादिधातुसे लाभ, प्रताप, शरीरमें कष्ट यह फल होता है । शनिके अंतर्गत सूर्यकी दशामें धनकी हानि, शोक तथा भय और विदेशमें गमन होता है । शनिके अंतर्गत चन्द्रमाकी दशामें सुख, शरीर रोगरहित, लाभ हानि समानही होता है । शनिके अंतर्गत मंगलकी दशामें कलह और उपद्रव, अग्निदाह, विषमज्वर और कार्य विफल होता है । शनिके अंतर्गत बुधकी दशामें राजमान, घरमें मध्यमसंपदा, कार्यका लाभ और वस्त्र प्राप्त होता है । शनिके अंतर्गत बृहस्पतिकी दशामें बहुत बुद्धि, सौख्य, राज्य, देश पुरादिका मालिक, परोपकारी और सुखसंपदाकरके युक्त होता है । शनिके अंतर्गत शुक्रकी दशामें वित्तलाभ, सुख, सुखार्थ विद्याका आगम, निर्मल बाहुप्रतापकरके युक्त और विदेशगमनसे लाभवाला होता है ॥ १-७ ॥ इति पाचकदशाफलानि ॥

अथ योगिनीदशा ।

नत्वा गणेशं गिरमब्जयोनिं विष्णुं शिवं सूर्यमुखान्महेन्द्रान् । वक्ष्ये स्फुटं सूर्यकृताद्यशास्त्राद्दशाक्रमं वा किल योगिनीजम् ॥ १ ॥ अथ जनस्य विधिवत्प्रसवं विचार्य संवत्सरर्त्वयनमासदिनर्क्षकालैः । यस्मिन्भवेद्दिवसभे जननं जनस्य तद्भं पिनाकनयनैः सहितं विधेयम् ॥२॥ गौरीशमूर्त्या विभजेच्च शेषं यत्संख्यकं सैव दशा जनस्य । यया जनः कर्मफलस्य पक्तिः शुभाशुभस्य स्फुटतामुपैति ॥ ३ ॥

श्रीगणेशजीको तथा सरस्वती, ब्रह्मा, विष्णु, शिव तथा सूर्य आदि ग्रहोंको नमस्कार करके सूर्यकृत शास्त्रसे योगिनीदशाओंका क्रम स्फुटरीतिकरके कहताहूं

विधिपूर्वक जन्म लेनेवाले मनुष्यका जन्म संवत्, ऋतु, अयन, मास, दिन, नक्षत्र तथा इष्ट समयको विचारकर जिस नक्षत्रमें जन्म हुआहो उस नक्षत्र संख्यामें तीन और मिलाकर आठसे भाग लेय। जो शेष बचै उससे मंगला आदि जन्मसमय दशा जानै. जिस दशामें जन्म हो उसका शुभाशुभ फल चिंतन करै ॥ १–३ ॥

दशानामानि।

मङ्गला १ पिङ्गला २ धन्या ३ भ्रामरी ४ भद्रिका ५ तथा। उल्का ६ सिद्धा ७ सङ्कटा ८ च एतासां नामवत्फलम् ॥ ४ ॥ एकं द्वौ गुण-वेदबाणरससप्ताष्टाङ्कसंख्याक्रमात्स्वस्वीया च दशा विपाकसमये ज्ञेयं शुभं वाऽशुभम्। षट्कृत्वो विभजेच्च षट्कृतिरसैकाद्वित्रिवेदेषुषट् सप्ताष्टग्रदशा भवेयुरिति ता एवं दशान्तर्दशाः ॥ ५ ॥ गतर्क्षनाडी-गुणिता दशाब्दाः सर्वे च नाडीविहृताः फलं यत्। वर्षाधिकं भुक्त-फलं ततश्च भोग्यं दशायाः प्रविचार्य लेख्यम् ॥ ६ ॥

मंगला १, पिंगला २, धन्या ३, भ्रामरी ४, भद्रिका ५, उल्का ६, सिद्धा ७, संकटा ८ ये आठ दशा नामसमान फलदायक जानना। एक, दो, तीन, चार पांच, छः, सात, आठ वर्ष संख्याक्रमसे मंगला आदि दशाओंके जानना अर्थात् मङ्गला एक वर्ष रहती है, पिंगला दो वर्ष, धन्या तीन, भ्रामरी चार, भद्रिका पांच, उल्का छः, सिद्धा सात और संकटा आठ वर्षकी होती है, इनका फल दशाप्रवेश-समयमें अपने २ नामके समान शुभाशुभ जानना। दशावर्ष संख्याके दिन करके उसको छत्तीससे भाग देकर जो भागाकार आवै वह दिवस सर्वदशामें मंगलान्तरके होते हैं. अनंतर वही भागाकार १।२।३।४।५।६।७।८। इससे गुणै तौ पिंगलादि योगिनी इनके अंतर्दशामें दिवस होते हैं। जन्मसमयके नक्षत्रकी गत-नाडियोंको दशावर्षसे गुणाकरके कुल नक्षत्रकी नाडियों (भभोग) से भागदे तौ लब्धि वर्षादि भुक्तदशाका होता है. भुक्तदशाको सर्व वर्षदशामें हीन करदे तौ भोग्य-दशा वर्षादि आताहै उसको लिखे ॥ ४–६ ॥

अथ मङ्गलादियोगिनीदशान्तर्दशाफलम्।

सद्धर्मे द्विजदेवगोपुरमनोत्कर्षप्रदात्री नृणां नानाभोगयशोऽर्थस-न्नृपपराश्वेभाङ्गजातिप्रदा। सन्माङ्गल्यविभूषणाम्बरवयःस्त्रीभोगसं-दायिनी ज्ञानानन्दकरी दशा भवति सा ज्ञेया सदा मङ्गला ॥ ७ ॥ स्यात्पुंसां यदि पिङ्गला प्रसवतो हृद्रोगशोकप्रदा नानारोगकुसङ्गदेह-

मनसो व्याध्यर्दितार्तिप्रदा । कृष्णासृग्ज्वरपित्तशूलमलिनस्त्रीपुत्रभृत्याप्तसन्मानध्वंसकरी धनव्ययकरी सत्प्रेमहंत्री खला ॥ ८ ॥ धन्या धन्यतमा धनागमसुखव्यापारभोगप्रदा पुंसां मानविवृद्धिदा रिपुगणप्रध्वंसिनी सौख्यदा । विद्याराजजनप्रबोधसुरताज्ञानाङ्कुरावर्द्धिनी सत्तीर्थामरसिद्धसेवनरतिर्लभ्या दशा भाग्यगाः ॥ ९ ॥

मंगलादशा उत्कर्षताकरके अच्छे धर्ममें ब्राह्मण देवता गौमें भक्तिको देनेवाली, नानाभोग, यश, अर्थ, राजसम्मान और सुंदरपुत्रको देनेवाली मांगलय विभूषण, वस्त्र, आयु, स्त्रीभोगको देनेवाली और ज्ञानद आनंदकारी होती है। पिंगला दशा लगतेही हृदयरोग, शोक, अनेक रोग, कुसंग, देह मानसी पीडा, शत्रुपीडा काला शरीर, ज्वर, पित्त, शूल, रोग, मलीनताको देनेवाली, स्त्री पुत्र नौकरसे प्राप्ति सन्मानको नाश करनेवाली, धनका खर्च करानेवाली दयाको नाश करनेवाली होती है। धन्यादशा धन्यतमा धनके आगम सुख व्यापार भोगको देनेवाली, मानकी वृद्धि करनेवाली, शत्रुजनोंको नाश करनेवाली, सौख्य देनेवाली, विद्या राजजनोंसे सन्मान ज्ञान अंकुरको बढानेवाली, अच्छे तीर्थके और देवतासिद्धके सेवनमें रति देनेवाली और भाग्यकारक होती है ॥ ७–९ ॥

दुर्गारण्यमहीधरोपगहनारामातपव्याकुला दूराद्दूरतरं भ्रमन्ति मृगवत्तृष्णाकुलाः सर्वतः । भूपालान्वयजा दशामधिगता ये वै नृपा भ्रामरी स्वं राज्यं प्रविहाय ते स्फुटतरं क्ष्माधो लुठन्ते मुहुः ॥ १० ॥ सौहार्दं निजवर्गभूसुरसुरेशा वा सुहृन्मानता माङ्गल्यं गृहमण्डलेऽखिलसुखव्यापारसक्तं मनः। राज्यं चित्रकपोलपालितिलकासप्ताङ्गनाभिः समं क्रीडामोदभरो दशा भवति चेत्पुंसां हि भद्राभिधा ॥ ११ ॥ उल्का चेद्यदि योगिनी गुरुदशा मानार्थगोवाहनव्यापाराम्बरहारिणी नृपजनक्लेशप्रदा नित्यशः। भृत्यापत्यकलत्रवैरजननी रम्यापहन्त्री नृणां हृन्नेत्रोदरकर्णदानपदजो रोगः स्वदेहे भृशम्।१२॥

भ्रामरीदशामें दुर्ग, वन, पर्वत, झाडी, बागादि तथा धूपसे दुःख पानेवाला, दूरसे दूर पियासे मृगके समान भ्रमण करनेवाला, राजाके घरमेंभी पैदाहुआ इस दशामें अपने राज्यको छोडकर पृथ्वीपर भिक्षुककी तरह मारामारा फिरता है । भद्रिकादशाके प्रवेशमें अपने जनों ब्राह्मणों तथा देवताओंमें भक्ति, मित्रसे सन्मान, घरमें

मांगलिक कार्य श्रेष्ठ व्यापारमें आसक्त मन, राज्य, सुंदर कपोल तिलकावली आदिसे विभूषित सप्त अप्सराओंके समान स्त्रियोंसे भोग क्रीडा आनंद और कल्याण होता है। उल्कादशा मान अर्थ गौ वाहन व्यापार अंबर आदिको नाश करनेवाली, सदा राजासे क्लेश देनेवाली, नौकर पुत्र स्त्रीसे शत्रुता करानेवाली आरामको नाश करनेवाली, हृदय, नेत्र, उदर, कर्ण और पादमें रोगको देनेवाली और शरीरको नष्ट करनेवाली होती है॥ १०–१२॥

सिद्धा सिद्धिकरी सुभोगजननी मानार्थसंदायिनी विद्याराजजनप्रतापधनसद्धर्माप्तसज्ज्ञानदा। व्यापाराम्बरभूषणादिकमतोद्वाहोऽपि माङ्गल्यदा सत्सङ्गान्नृपदत्तराज्यविभवो लभ्या दशा पुण्यतः॥१३॥ राज्यभ्रंशाग्निदाहो ग्रहपुरनगरग्रामगोष्ठेषु पुंसां तृष्णारोगाङ्गधातोः क्षणविकृतिरथो पुत्रकान्तावियोगः। चेतस्यान्मोहोऽरिभीतिः कृशतनुलतिकासङ्कटाया विरोधो नो मृत्युर्जन्मकालाद्यममपि हि विना सङ्कटं योगिनीजम्॥ १४॥भ्रामर्यां च तथोल्कायां सङ्कटान्तर्गता भवेत्। तदा तु यमराजस्य सदनं प्राप्यते नृणाम्॥ १५॥

सिद्धादशा कार्यसिद्धि करानेवाली, सुंदरभोगको देनेवाली, मान अर्थको देनेवाली विद्या राजजन प्रताप धन और अच्छे धर्मकी प्राप्ति एवं ज्ञान करनेवाली व्यापार अंबर भूषणादि और विवाहमांगल्यको देनेवाली सत्संगति तथा पुण्यसे राज्यविभवको देनेवाली कही है। संकटाकी दशामें मनुष्योंके राज्यका भ्रंश अग्निदाह पुर नगर ग्रामगोष्ठी आदि अग्निकरके दाह तृष्णा अंग धातुक्षयरोग विकलता, पुत्रस्त्रीका वियोग मोह, शत्रुभय, शरीर दुर्बल, विरोध और प्राणोंमें भी संकट होता है। भ्रामरी तथा उल्कादशाके अन्तर्गत संकटादशामें मनुष्य यमराजके सदनको जाता है अर्थात् मृत्यु अथवा मृत्युसमान कष्ट होता है॥ १३–१५॥

इति मंगलादियोगिनीदशाफलम्॥

अथ अन्तर्दशाफलम्।

स्वस्या दशाया दिवसादिनिघ्ना स्वांतर्दशाया दिवसैः क्रमेण। षड्भिर्विभक्ता घटिकास्तया च स्युर्मङ्गलाद्याः क्रमशो नितान्तम्॥१॥

मंगलादिदशाओंमें अपने दशावर्षोंको दिनमानकरके मंगलाके (सर्वदशाओंमें) अंतरदिवसोंको क्रमसे गुणा करदे और ६ से भागले तौ लब्धि घटिकादि प्रत्यंतरदशा होगी॥ १॥

मंगलान्तरफलम् ।

मित्रपुत्रकलत्राङ्गव्यापारसुखदायिनी । मङ्गलाऽत्यर्थदा जाता मङ्गला मङ्गलप्रदा ॥ २ ॥ कलहः स्वजनः सार्द्ध मानसोद्वेगमेव हि । विविधार्तिप्रदा नित्यं पिंगला मङ्गलां गता ॥ ३ ॥ गजाश्वगोधनप्राप्तिः सुतमित्रसुखं महत् । विलासो विविधः पुंसां धन्या स्यान्मङ्गलां गता ॥४॥ स्त्रीमित्रकलहो नित्यं प्रवासो धननाशनम् । नरेन्द्रैः सह सांगत्यं भ्रामरी मङ्गलांगता ॥५॥ धनधान्यसुतस्त्रीभिः प्रीतिः स्यात्स्वजनैः सह । प्रमोदः सुरभिज्ञो वा भद्रा चेन्मङ्गलां गता ॥६॥ धनकीर्तिसुतोद्वेगस्त्रीमित्रपशुपीडनम् । भूपतेर्हानिदा नित्यमुल्का स्यान्मङ्गलां गता ॥ ७ ॥ भवेत्पुत्रधनस्त्रीभिर्विलासो विविधं सुखम् । बन्धुमित्रसमं योगः सिद्धा चेन्मङ्गलां गता ॥ ८ ॥ जलाग्निचोरभूपालपीडनं कलिवर्द्धनम् । मृत्युतुल्यं तथा ज्ञेयं सङ्कटा मंगलां गता ९

मंगलाके अन्तर्गत मंगलादशा मित्र, पुत्र, स्त्री तथा शरीरके सुखको देनेवाली, अर्थ और मांगल्य देनेवाली होती है । मंगलाके अंतर्गत पिंगलादशामें अपने जनोंके साथ कलह मानस उद्वेग और अनेक पीडा हो । मंगलाके अंतर्गत धन्यादशामें हाथी, घोडा, गोधनकी प्राप्ति, पुत्र, मित्र, सुख और अनेक प्रकारका विलास प्राप्त होता है । मंगलाके अंतर्गत भ्रामरीदशामें स्त्रीमित्रसे कलह, सदा विदेशवास, धनका नाश, राजासे कष्ट प्राप्त होता है । मंगलाके अंतर्गत भद्रिका दशामें धनधान्यका लाभ, पुत्र स्त्रीसे प्रीति तथा स्वजनोंसे प्रीति, प्रमोद और सुरभिज्ञता होती है । मंगलाके अन्तर्गत उल्कादशामें धन, कीर्ति, सुत, उद्वेग, स्त्री, मित्र, पशुपीडा और राजासे हानि हो । मंगलाके अंतर्गत सिद्धादशामें स्त्री, धन, पुत्र इनकरके विलास और विविध सुख और बंधुमित्रका समागम होता है । मंगलाके अंतर्गत संकटादशामें जल, अग्नि, चौर तथा राजासे पीडा कलहकी वृद्धि, मृत्युके समान कष्ट यह फल हो २–९

पिंगलान्तरफलम् ।

पिङ्गला स्वदशां प्राप्ता रुक्शोकव्यसनार्तिदा । मानसोद्वेगसंतापक्लेशभ्रमणदा मता ॥ १० ॥ धन्या धन्यार्थदात्री च विलाससुतकामदा । पिङ्गलान्तर्गताऽरण्ये रमणी सुखदा नृणाम् ॥११॥ देशत्यागो गृहग्रामपुरलोकधनक्षतिः । कलहः स्वजनैः सार्द्धं भ्रामरी पिंगलां

गता ॥ १२ ॥ भद्रा भद्रकरी प्रोक्ता पिङ्गलान्तर्गता यदा। स्थानान्तराद्यशः पुत्रो व्यापारे धनलाभता ॥ १३ ॥ उल्कादशा यदा पुंसां पिङ्गलामध्यतो भवेत्। विग्रहो बन्धुभिः सार्द्धं राजचोरजनार्दनम् ॥ १४ ॥ सिद्धिदा मंत्रयन्त्राणां सिद्धा धान्यधनप्रदा। पिङ्गलामध्यमा पुंसां कासश्वासप्रमेहदा ॥ १५ ॥ पिङ्गलान्तर्यदा जाता सङ्कटा धनहानिदा। दुष्टव्याधिविरोधित्वं शत्रुराजभयं तथा ॥ १६ ॥ मङ्गला विविधव्याधिशोकमोहभयार्तिदा। पिङ्गलान्तर्गता पुंसां मासिसिद्धिकरी तथा ॥ १७ ॥

पिंगलाके अंतर्गत पिंगला दशामें रोग, शोक, व्यसन, पीडा, मानसी उद्वेग, संताप, क्लेश और भ्रमण होता है। पिंगलाके अंतर्गत धन्यादशामें धन, अर्थ, भोग, विलास, पुत्र, काम और स्त्री सुख होता है। पिंगलाके अंतर्गत भ्रामरीदशामें घर ग्राम देशका तथा पुरलोकका त्याग, धनका नाश और अपने जनोंके साथ कलह होता है। पिंगलाके अंतर्गत भद्रिकादशामें कल्याण, स्थानान्तरसे कीर्ति प्राप्ति, पुत्रका लाभ और व्यापारसे धनका लाभ होता है। पिंगलाके अंतर्गत उल्कादशामें बांधवोंके साथ विग्रह, राजा चौरसे भय और जनपीडा हो। पिंगलाके अंतर्गत सिद्धादशामें मन्त्र यंत्रोंकी सिद्धि, धनधान्य लाभ और कास श्वास और प्रमेहका रोग होता है। पिंगलाके अंतर्गत संकटादशामें धनकी हानि, दुष्टव्याधि, विरोध तथा शत्रु राजभय होता है। पिंगलाके अंतर्गत मंगलाके दशामें विविध व्याधि, शोक, मोह, भय, पीडा इत्यादि अशुभफल होता है ॥ १०-१७ ॥ इति पिंगलान्तरफलम् ॥

अथ धन्यादशान्तरफलम्।

धन्या स्वीयदशां प्राप्ता भूग्रामधनधान्यदा। नृपस्वजनस्त्रीपुत्रसुखं स्याद्विविधं नृणाम् ॥ १८ ॥ धन्यान्तर्भ्रामरी चेत्स्याद्भ्रमणक्लेशहानिदा। अन्यस्थानाश्रयाल्लाभः स्वजनैश्च विरोधिता ॥ १९ ॥ भद्रा सौभाग्यजननी ग्रहामित्रसुखप्रदा। धन्यान्तर्नृपमंत्रीशवाहनाम्बरभूमिदा ॥२०॥ विविधं कष्टमुत्पातमुल्का धन्यान्तरं गता। तत्र हृत्कटिशूलादिपीडनं धननाशनम् ॥ २१ ॥ सिद्धा धन्यान्तरं याता सुतमित्रोत्सवप्रदा। नानाभोगप्रदा नित्यं ज्ञेया सा तु विचक्षणैः॥२२॥

धन्यासूपगता यत्र सङ्कटा बन्धनप्रदा । नीतिव्यापारभूपाल-मानसोत्साहदा मता ॥ २३ ॥ पिङ्गला यदि धन्यान्तर्विव्यथा हास्ति-भूधनः । सोत्साहो नृपतेर्भीतिः शिरोरुक्शूलभासुरः ॥ २४ ॥

धन्यादशाके अंतर्गत धन्यादशामें भूमि, ग्राम, धन धान्यका लाभ, राजा स्वजन स्त्री पुत्रका सुख होता है। धन्याके अंतर्गत भ्रामरीदशामें भ्रमण, क्लेश, हानि, अन्य स्थानसे लाभ और अपने जनोंकरके विरोध होता है । धन्याके अंतर्गत भद्रिका दशामें सौभाग्य, मित्रसुख, लाभ, मंत्राधिकार, वाहन, अंबर भूमिका लाभ होता है। धन्याके अंतर्गत उल्कादशामें विविध कष्ट, उत्पात, हृदय, कटिमें शूल आदि पीडा और धनका नाश होता है। धन्याके अंतर्गत सिद्धा दशामें सुत मित्र उत्सव और अनेक भोगविलास प्राप्त होते हैं। धन्याके अंतर्गत संकटादशामें बंधन नीति व्यापार, राजसम्मान और उत्साह लाभ होता है । धन्याके अंतर्गत पिंगलादशामें उग्र-पीड़ासे हाथी तथा भूमि धनका लाभ, उत्साह, राजासे भय, शिरोरोग, शूलपीडा हो ॥ १८–२४ ॥ इति धन्यादशान्तरफलम् ।

भ्रामर्यन्तरफलम् ।

भ्रामरी स्वदशामध्ये भ्रान्तिमोहविषार्त्तिदा । स्वस्थाने स्वजने शैलो वैरिदुष्टजलार्त्तिदा ॥ २५ ॥ भद्रायां भ्रामरीमध्ये विदेशगमनं भवेत् । निजमित्रसमायोगो विद्यासम्मानभूपतिः ॥ २६ ॥ उल्का तु भ्रामरीमध्ये ज्वरशूलासृगार्तिदा । धनपुत्रकलत्राङ्गपीडाहानिकरी मता ॥ २७ ॥ सिद्धा सिद्धिप्रदा नित्यं भ्रामरीमध्यतो यदा । विवेक-विद्यानिधिदा भयरोगार्तिनाशिका ॥ २८ ॥ संकटा मरणं क्लेशः शोकं मोहं गतं गदः । राजचोरजनख्यातिप्रदा भ्रामरिमध्यगा ॥ २९ ॥ विलासो विविधं सौख्यं नृपसेवातिपुष्टता । भ्रामर्यन्तर्गता यत्र मंगला सहमङ्गला ॥ ३० ॥ पिङ्गला भ्रामरीमध्ये गुदाङ्घ्रिमुखरोगदा । गजाश्व-महिषव्याघ्रव्रणभीतिप्रदा भवेत् ॥ ३१ ॥ भ्रामर्युपगता धन्या धन-वाहनभोगदा । नृपैः प्रीतिकरी भिल्लैर्वैरहानिकरी मता ॥ ३२ ॥

भ्रामरीके अंतर्गत भ्रामरीदशामें भ्रांति, मोह, विषपीडा, अपने स्थानमें वा स्वज-नोंमें शत्रु, दुष्टजन तथा जलसे भय, पीडा हो । भ्रामरीके अंतर्गत भद्रिकादशामें विदेशका गमन, मित्रका समागम, विद्यालाभ और राजसम्मान होता है। भ्रामरीके अंतर्गत उल्कादशामें ज्वर, शूलरोगसे पीडा, धन पुत्र स्त्री और देहकी पीडा और

हानि होवै । भ्रामरीके अंतर्गत सिद्धादशामें कार्यसिद्धि, विवेक, विद्या, निधिका लाभ, भय, रोग और पीडाका नाश होवै। भ्रामरीके अंतर्गत संकटादशामें मरण, क्लेश, शोक, मोह, रोग, राजा तथा चोर जनोंमें ख्याति होवै । भ्रामरीके अंतर्गत मंगलादशामें विविध भोगविलास, सौख्य, राजसेवा, अधिक पुष्टि और मंगल होता है । भ्रामरीके अंतर्गत पिंगलादशामें गुदा, अंघ्रि, मुख इनमें रोग हो, हाथी घोडा भैंसा व्याघ्र व्रण इनकरके भय होता है । भ्रामरीके अंतर्गत धन्यादशामें धन वाहन भोगका लाभ, राजासे प्राप्ति और भिल्लोंकरके शत्रुताकी हानि हो ॥ २५-३२ ॥ इति भ्रा. फ. ॥

अथ भद्रिकान्तरफलम् ।

भद्रा भद्रागता यत्र यशोभद्राऽऽतिदा तथा । व्यसनार्तिहरा पुण्यमार्गरोधकरी मता॥३३॥ उल्का भद्रान्तरं याता विवादकृतरोगदा । स्थानभ्रंशो द्रव्यहानिकारिण्युद्वेगदायिनी ॥ ३४ ॥ सिद्धा भद्रान्तर्गता तु द्विजदेवार्चने रतिः। पुत्रमित्रकलत्राङ्गगृहग्रामजनोत्सवान् ॥ ३५ ॥ भद्रादशां समायाता सङ्कटा सङ्कटार्तिदा । मोहशोकादिव्यसनभ्रान्तिदेशगमार्त्तिदा ॥ ३६ ॥ सम्मानधनभूकीर्तिर्व्यापारे सुतसौख्यदा । मङ्गला भद्रिकामध्ये पितृवंशविवृद्धिदा॥३७॥यदा मध्ये तु भद्रायाः पिङ्गला पित्तरोगदा । कृषिवाणिज्यभूवृद्धाश्रयतो विविधप्रदा ॥ ३८ ॥ रुधिराग्नियमाद्भीतिर्भद्रायां भ्रामरी यदा । गृहक्षेत्ररिपुध्वंसो निजबन्धुजनैः सुखम् ॥ ३९ ॥

भद्रिकाके अंतर्गत भद्रिकादशामें यश, कल्याणकी वृद्धि, व्यसन, पीडाका नाश और धर्ममार्गमें विघ्न होता है । भद्रिकाके अंतर्गत उल्कादशामें विवाद, रोग, स्थानका भ्रंश, द्रव्यकी हानि और उद्वेग होवै । भद्रिकाके अंतर्गत सिद्धादशामें देवता ब्राह्मणके पूजनमें रति, पुत्र, मित्र, कलत्र, अंग, गृह, ग्रामसे उत्पन्न उत्सव होता है । भद्रिका अंतर्गत संकटादशामें संकट, पीडा, मोह, शोकादि व्यसन, भ्रांति, परदेशगमन और आर्ति होवै । भद्रिकाके अंतर्गत मंगलादशामें सम्मान, धन, भूमि, कीर्तिका लाभ, व्यापारमें लाभ, सुत सौख्य और पितृवंशकी वृद्धि होवै । भद्रिकाके अंतर्गत पिंगलादशामें पित्तरोग, कृषि, वाणिज्यसे भूमि धनलाभ और वृद्धमनुष्यके आश्रयसे विविध सौख्य प्राप्त होता है । भद्रिकाके अंतर्गत भ्रामरी दशामें रुधिर, अग्नि और यमसे भय, गृह क्षेत्र शत्रुका नाश और अपने बंधुजनकरके सुख होता है । इति. भ. फ. ॥ ३३-३९ ॥

अथोल्कान्तरफलम् ।

शत्रुभिः साहसं हानिर्द्रव्यस्य महती व्यथा । उल्कामध्ये यद्युल्का च राज्यभ्रंशात्तु भीतिदा ॥ ४० ॥ सिद्धा तु स्वफलं त्यक्त्वा परस्य फलदायिनी । उल्कान्तरं समायाता विदेशगमनप्रदा ॥ ४१ ॥ उल्काया मध्यगा यत्र सङ्कटा मरणप्रदा । स्त्रीपुत्रभृत्यसंक्लेशो जनहानिः कुलक्षयः ॥४२॥ उल्काया मध्यगा यत्र मङ्गला मोहकारिणी । धनमित्रविवेकस्त्रीसुखदा मलहारिणी ॥४३॥ कुष्ठकम्बुशिरोरोगैः पीडितो धरणीतले । भ्रमते नात्र संदेहो यद्युल्कायां तु पिङ्गला ॥ ४४ ॥ नो लाभो न सुखं किंचिद्वातव्याधिकफादयः । धन्योल्कायां समायाता स्त्रीपुत्रस्वजनैः कलिः ॥ ४५ ॥ उद्विग्नं मानसं मोहो भ्रमः पुंसोऽरिजं भयम् । नानाक्लेशसमायोगो भ्रामर्युल्कान्तरं गता ॥ ४६ ॥ उल्कामध्ये तु संप्राप्ता भद्रा भद्रार्थदायिनी । भूषणाम्बरहानिः स्यात्कुलमित्रजनात्सुखम् ॥ ४७ ॥

उल्कादशाके अंतर्गत उल्कादशामें शत्रुकरके साहस, धनकी हानि, महान् व्यथा और राज्यभ्रंशसे भय होता है । उल्काके अंतर्गत सिद्धादशा अपने फलको छोड़कर दूसरेके फलको देनेवाली और विदेशमें गमन करानेवाली होती है । उल्काके अंतर्गत संकटादशामें मरण समान कष्ट, स्त्री पुत्र नौकर इनको कष्ट हानि और अपने कुलका नाश होवै । उल्काके अंतर्गत मंगला दशामें मोह धन मित्र विवेक स्त्री इनका सुख और मलका नाश होता है । उल्काके अंतर्गत पिंगलादशामें कुष्ठ ग्रीवा तथा शिरोरोगकरके पीडित और पृथ्वीपर भ्रमण करनेवाला मनुष्य होता है । उल्काके अंतर्गत धन्यादशामें न लाभ और न कुछ सुख, वातव्याधि, कफका उदय और स्त्री पुत्र स्वजनोंमें कलह होवै । उल्काके अंतर्गत भ्रामरीदशामें उद्विग्नचित्त, मोह, भ्रम, शत्रुभय और अनेक क्लेश प्राप्त होते हैं। उल्काके अंतर्गत भद्रिकादशामें कल्याण, अर्थका लाभ, भूषण अंबरकी हानि, कुलसे तथा मित्रजनोंसे सुख प्राप्ति होती है ॥ ४०-४७ ॥ इत्युल्कान्तरफलम् ॥

अथ सिद्धान्तरफलम् ।

सिद्धा सिद्धार्थसंदात्री स्वजनैस्सह सौख्यदा । सिद्धायामथवैश्वर्यसुखमित्रसुखप्रदा ॥ ४८ ॥ बन्धनं नृपचौरेभ्यो धनहानिर्मह-

द्भयम्। देशत्यागो भवेन्नूनं सिद्धायां सङ्कटा यदा ॥ ४९ ॥ विलासः स्वजनैः सौख्यं धनलब्धिर्नृपाद्भवेत्। मङ्गला सिद्धिदा सिद्धा सङ्गता विविधा यदा॥५०॥सिद्धायां पिङ्गला चेत्स्यान्मानं क्रोधाग्निदाहनम्। वैरोदयं निजैः सार्द्धं परद्रव्याभिधारणम् ॥ ५१ ॥ पुंसां धन्या तु सिद्धायां प्राक्पुण्यनिचयो भवेत्। मनःप्रकल्पितं सर्वं सिद्धिमायाति सर्वतः ॥ ५२ ॥ भ्रामरी यदि संप्राप्ता सिद्धायां यस्य जन्मनि। स्वस्थानाद्व्यसनैस्त्यागो ननु राजकुलाद्भयम् ॥ ५३ ॥ मांगल्यभोगजननी विद्यासौख्यगुणप्रदा। नराणां सिद्धिदा भद्रा सिद्धायामुपजायते ॥ ५४ ॥ उल्का सिद्धां समापन्ना धनधान्यविनाशिनी। क्लेशशोकव्यसनदा गुदरुङ्मोहकारिणी ॥ ५५ ॥

सिद्धादशाके अन्तर्गत सिद्धादशामें अर्थका लाभ, स्वजनोंके साथ सुख, ऐश्वर्य सुख और मित्रका सुख होता है। सिद्धाके अन्तर्गत संकटादशामें बंधन, चोर करके राजाकरके धनहानि, महान् भय और देशका त्याग होता है। सिद्धाके अन्तर्गत मंगलादशामें भोग विलास, स्वजनोंकरके सुख, राजासे धनका लाभ और विविध सिद्धि प्राप्ति हो। सिद्धाके अन्तर्गत पिंगलादशामें मान, क्रोध, अग्निका दाह, अपने जनोंके साथ वैरका उदय और पराये द्रव्यका लाभ होता है। सिद्धाके अन्तर्गत धन्यादशामें पूर्वपुण्योंका संचय और सर्वत्र मनमानी सिद्धिका लाभ होता है। सिद्धाके अंतर्गत भ्रामरीदशामें व्यसन, स्थानत्याग और राजकुलसे भय होता है। सिद्धाके अंतर्गत भद्रिका दशामें मांगल्य, भोगविलास, विद्या, सौख्य, गुणका लाभ और कार्यकी सिद्धि होवै। सिद्धाके अंतर्गत उल्कादशामें धनधान्यका नाश, क्लेश शोक व्यसन करके युक्त, गुदारोग और मोह होता है ॥ ४८–५५ ॥ इति सिद्धान्तरफलम् ॥

अथ संकटान्तरफलम्।

सङ्कटा स्वदशां प्राप्ता करोति मरणं ध्रुवम्। राजवंशाच्च हानिश्च देशत्यागो धनक्षयः ॥ ५६ ॥ शिरोरुग्विविधै रोगैर्व्याधिभिर्व्यसनैस्तथा। कलत्रक्लेशनिरतो मङ्गला संकटां गता ॥ ५७ ॥ अकस्माद्धनहानिः स्यात्पुत्रशोकोऽरिजं भयम्। पिंगला सङ्कटां याता वियोगः स्वजनैः सह ॥ ५८ ॥ गुल्मोदरकृता पीडा निजेषु प्रमुखं महत्।

स्वदेशजनताकीर्तिर्धन्या तु सङ्कटां गता ॥ ५९ ॥ भ्रामरी सङ्कटामध्ये भ्रमणं पृथिवीतले । देशग्रामपुरद्वारराज्यभ्रंशोऽरिजं भयम् ॥ ६० ॥ विद्यालङ्कारवस्त्राणि विविधानि महद्यशः । विग्रहोऽन्यजनैः सार्द्धं भद्रा चेत्संकटां गता ॥ ६१ ॥ उल्कापातधनग्रामहारिणी मृत्युकारिणी । सङ्कटामन्तरेणैव पशुमात्रकुलार्दनी ॥ ६२ ॥ उत्साहो विविधः पुंसां निजपुत्रसुखोदयम् । मनः प्रसन्नतामेति सिद्धा चेत्सङ्कटां गता ॥ ६३ ॥

संकटादशाके अंतर्गत संकटादशामें मरण, राजवंशसे हानि, देशका त्याग और धनका क्षय होता है । संकटाके अंतर्गत मंगलाके दशामें शिरोरोग तथा व्याधि, व्यसन, अनेक रोग, स्त्रीकष्ट यह फल होता है । संकटाके अंतर्गत पिंगलादशामें अकस्मात् धनकी हानि, पुत्रशोक, शत्रुसे भय और स्वजनोंसे वियोग होता है । संकटाके अंतर्गत धन्यादशामें गुल्म उदरविकारसे पीडा, अपने जनोंमें महान् प्रमुख और देशमें कीर्तिका लाभ होता है। संकटाके अंतर्गत भ्रामरीदशामें पृथ्वीपर भ्रमण, देशत्याग, ग्राम, पुर, द्वार, राज्यका नाश और शत्रुसे भय होता है । संकटाके अंतर्गत भद्रिका दशामें विद्या, अलंकारादियुक्त वस्त्र, महान् यशका लाभ, अन्यजनोंके साथ विग्रह यह फल होता है । संकटाके अंतर्गत उल्कादशामें धन और ग्रामका नाश, मृत्युसमान कष्ट, पशुओंमें और कुलमें कष्ट पीडा होवै । संकटाके अंतर्गत सिद्धादशामें विविध उत्साह, निजपुत्र लाभसे सुखका उदय और मन प्रसन्न होता है । ॥ ५६-६३ ॥ इति संकटान्तरफलम् ॥ इति योगिनीदशान्तर्दशाफलं समाप्तम् ॥

अथ योगिनीदशास्वामिनः ।

चन्द्रः सूर्यो वाक्पतिर्भूमिपुत्रश्चान्द्रिर्मन्दो भार्गवः सैंहिकेयः ।
एते नाथा मङ्गलान्तःप्रदिष्टाः सौम्यासौम्या नामनिष्ठाःखलाना म् १ ॥

यः खेटोऽस्तगृहं तथाऽरिभवनं नीचं प्रयातो यथा
वर्षेशाद्रिपुगो हि तस्य गदिता सर्वा दशा मध्यमा ।
यश्चोच्चस्थलमाश्रितः स्वभवने मूलत्रिकोणे खगो
मित्रागारमुपागतो निगदिता तस्याखिला सौख्यदा ॥ २ ॥

चन्द्रमा, सूर्य, बृहस्पति, मंगल, बुध, शनैश्चर, शुक्र और राहु ये क्रमसे मंगलादि दशाओंके स्वामी जानना और शुभग्रहोंसे शुभ तथा पापग्रहोंसे अशुभ फल

कहना चाहिये। जो ग्रह अस्तको प्राप्त हो तथा शत्रुके घरमें स्थित हो अथवा नीच-राशिमें हो इसी प्रकार वर्षेशसे शत्रुस्थानमें प्राप्त हो तौ उसकी दशाका फल मध्यम कहा है तथा जो ग्रह उच्चमें अपने ही राशिमें हो मूलत्रिकोणमें अथवा मित्रके स्थानमें हो उसकी दशा सौख्यदायक जानना ॥ १ ॥ २ ॥

पिंगलातो भवेत्सूर्यो मङ्गलातो निशाकरः। भ्रामरीतो भवेत् क्ष्माजो धन्यातोऽभूद्विधोः सुतः ॥ ३ ॥ भद्रिकातो गुरुरभूत्सिद्धातः कविसंभवः। उल्कातो भानुतनयः सङ्कटातो ह्यभूत्तमः ॥ ४॥ अस्या एव दशान्ते च केतुरेव विधीयते ॥ ५ ॥

पिंगलादशाका स्वामी सूर्य, मंगलाका चन्द्रमा, भ्रामरीका मंगल, धन्याका बुध, भद्रिकाका बृहस्पति, सिद्धाका शुक्र, उल्काका शनैश्चर और संकटादशाका राहु स्वामी है। इनके अंतमें केतुकी दशा होती है ॥ ३-५ ॥ इति श्रीरुद्रयामले योगिनीदशाक्रमः समाप्तः ॥

वर्षप्रवेशसमयसाधनम्।

इष्टः शको जन्मशकेन हीनस्त्रिधा सपादो दलितश्च सार्धम्। समन्वितो जन्मगवारपूर्वैः स्फुटा भवेदब्दनिवेशवेला ॥ ६ ॥

वर्तमानशाकेमें जन्मकालिक शाकेको हीन करै अर्थात् घटाय देवै जो अंक शेष रहै वही गतवर्ष जानना; उसको तीन स्थानोंमें स्थापित करै पहिले स्थानमें सवाया; दूसरे स्थानमें आधा; तीसरे स्थानमें डेवढे करे। फिर उनमें जन्मवार आदि (वार, घटी, पल) संयुक्त करै तौ वर्षप्रवेशवेला (समय इष्टकाल) स्फुट होता है। वारादि पिछले वर्षके ध्रुवामें युक्त एक, पन्द्रह, इकतीस, तीस (१।१५।३१।३०) करदे तौ अगले वर्षका ध्रुवा होता है। जिस दिन वर्षप्रवेश समयका सूर्य जन्म समयके सूर्यांशोंसे बराबर होता है उसी दिन वर्षप्रवेश होता है। इस प्रकार वर्षप्रवेशका इष्ट समय जानकर पूर्व द्वितीय अध्यायमें कहीहुई रीतियोंसे लग्नसहित द्वादशभाव तथा ग्रहोंको स्पष्ट करलेवै तो वर्ष बनजाता है॥ ६ ॥

ग्रन्थकर्तृप्रशस्तिः।

आसीद्गुर्जरमण्डले द्विजवरः शाण्डिल्यगोत्रोद्भवः
श्रीमद्याज्ञिकवंशमण्डनमणिर्ज्योतिर्विदामग्रणीः।
श्रौतस्मार्तरतो जनार्दन इति ख्यातः स्वकीयैर्गुणै-
स्तत्सूनुर्हरजी दशां स्फुटतरां चक्रे परां योगिनीम् ॥ १ ॥

गुर्जरदेशमें रहनेवाला, ब्राह्मणोंमें श्रेष्ठ, शांडिल्यगोत्रमें उत्पन्न; याज्ञिक वंशको प्रकाश करनेवाला, ज्योतिर्विदोंमें अग्रगण्य, श्रौतस्मार्तमें रत, जनार्दन नामकरके प्रसिद्ध तिंसका पुत्र हरजी नामकने अपने गुणकरके योगिनीदशाचक्रोंको स्फुट-रीतिसे वर्णित किया है ॥ १ ॥

भाषाटीकासमाप्तिसमयः।

अभ्ररसनिधीन्द्वब्दे १९६० फाल्गुनस्यासिते दले।
त्रयोदश्यां रवेर्वारे ग्रन्थोऽयं पूर्णतां गतः ॥ १ ॥
बालानां सुखबोधाय मानसागरिपद्धतौ।
वंशीधरेण विदुषा भाषाटीका समापिता ॥ २ ॥

श्रीसंवत् १९६० फाल्गुनकृष्णपक्ष त्रयोदशी (महाशिवरात्रि) रविवारमें मान-सागरी पद्धति भाषाटीकासहित बालकोंके सुखपूर्वक बोधके अर्थ राजपण्डित वंशीधरकरके पूर्णताको प्राप्त हुई ॥ १ ॥ २ ॥

इति मानसागरीपद्धतिः समाप्ता।

पुस्तक मिलनेका ठिकाना—

गङ्गाविष्णु श्रीकृष्णदास,
" लक्ष्मीवेङ्कटेश्वर " स्टीम्-प्रेस,
कल्याण-बम्बई.

खेमराज श्रीकृष्णदास,
" श्रीवेङ्कटेश्वर " स्टीम्-प्रेस,
खेतवाड़ी-बम्बई.